7

BIBLIOTHECA BUDDHICA. XXI.

# SPHUṬĀRTHĀ

# ABHIDHARMAKOÇAVYĀKHYĀ

THE WORK OF

## YAÇOMITRA

## SECOND KOÇASTHĀNA

EDITED BY

prof. U. Wogihara and prof. Th. Stcherbatsky

AND CARRIED THROUGH THE PRESS BY

E. E. Obermiller

ЛЕНИНГРАД — 1931 — LENINGRAD

ИЗДАТЕЛЬСТВО АКАДЕМИИ НАУК СССР

XIX. Тибетский перевод сочинений Saṃtānāntarasiddhi Dharmakīrti и Saṃtānāntarasiddhiṭīkā Vinītadeva вместе с тибетским толкованием, составленным Агваном Дандар-Лхарамбой, изд. Ф. И. Щербатской. 2 Fsc.

XX. Тибетский перевод Abhidharmakoçakārikāḥ и Abhidharmakoçabhāṣyam сочинений Vasubandhu. Изд. Ф. И. Щербатской. Fsc. I, II.

XXI. Sphuṭārthā Abhidharmakoçavyākhyā the work of Yaçomitra. Edited by Prof. S. Lévi, Prof. Th. Stcherbatsky and U. Wogihara. Fsc. I, II.

XXII. Бадзар Барадийн. Статуя Майтреи в Золотом храме в Лавране. 1 Fsc.

XXIII. Abhisamayālaṅkāra-prajñāpāramitā-upadeśa-śāstra of Bodhisattva Maitreya. Edited, explained and translated by Th. Stcherbatsky and E. Obermiller. Fsc. I.

XXIV. Indices verborum Sanscrit-Tibetan and Tibetan-Sanscrit to the Nyāyabindu of Dharmakīrti and the Nyāyabinduṭīkā of Dharmottara. I. Sanscrit-Tibetan Index. Compiled by E. Obermiller.

XXV. Indices verborum Sanscrit-Tibetan and Tibetan-Sanscrit to the Nyāyabindu of Dharmakīrti and the Nyāyabinduṭīkā of Dharmottara. II. Tibetan-Sanscrit Index. Compiled by E. Obermiller.

XXVI. Buddhist Logic by Th. Stcherbatsky, in two volumes. Vol. II containing translation of the short treatise of logic by Dharmakīrti and its commentary by Dharmottara, with notes, appendices and indices.

XXVII. Suvarṇaprabhāsa. Das Goldglanz-Sūtra. Aus dem Uigurischen übersetzt von W. Radloff nach dem Tode des Übersetzers mit Einleitung von S. Malov herausgegeben.

XXVIII. Bodhicaryāvatāra (Çāntideva), монгольский перевод Chos-Kyi Ḥod-zer'a с трехъязычными указателями, издал Б. Я. Владимирцов. I. Текст.

## Печатаются: Sous presse:

VII. Nyāyabindu и Nyāyabinduṭīkā (санскритский текст). Изд. Ф. И. Щербатской. Fsc. II.

VIII. Nyāyabindu и Nyāyabinduṭīkā (тибетский перевод). Изд. Ф. И. Щербатской. Fsc. III.

XVI. Buddhapālita. Mūlamadhyamakavṛtti. Tibetische Übersetzung. Herausgegeben von M. Walleser. Fsc. III.

XX. Тибетский перевод Abhidharmakoçakārikāḥ и Abhidharmakoçabhāṣyam сочинений Vasubandhu. Изд. Ф. И. Щербатской. Fsc. III.

XXI. Sphuṭārthā Abhidharmakoçavyākhyā the work of Yaçomitra. Edited by Prof. S. Lévi, Prof. U. Wogihara and Prof. Th. Stcherbatsky. Fsc. III.

XXVI. Buddhist Logic by Th. Stcherbatsky. Vol. I.

*См. на 3-й стр. обложки*

BIBLIOTHECA BUDDHICA. XXI.

# SPHUṬĀRTHĀ

# ABHIDHARMAKOÇAVYĀKHYĀ

THE WORK OF

## YAÇOMITRA

## SECOND KOÇASTHĀNA

EDITED BY

prof. U. Wogihara and prof. Th. Stcherbatsky

AND CARRIED THROUGH THE PRESS BY

E. E. Obermiller

ЛЕНИНГРАД — 1931 — LENINGRAD
ИЗДАТЕЛЬСТВО АКАДЕМИИ НАУК СССР

**Напечатано по распоряжению Академии Наук СССР**
**Январь 1931 г.**
**Непременный Секретарь академик *В. Волгин***

**Редактор издания академик С. Ф. Ольденбург**

Тит. л. + 96 стр.
Ленинградский Областлит № 72412. — $6^2/_{16}$ печ. л. — Тираж 850
Типография Академии Наук СССР. В. О., 9 линия 12

## द्वितीयं कोशस्थानम् 3. II. 1

उक्तानीन्द्रियाणीति प्रथमस्य द्वितीयस्य च कोशस्थानस्य संबन्धोपनिपाततां दर्शयन्नाह । उक्तानीन्द्रियाणीति प्रथमकोशस्थानावसाने यस्मात् 96.2 (1a-6)

धर्माधर्ममिन्द्रियम्

इत्युक्तं[1] । तस्मादिदमायातमिति संबन्धः ॥ **कः पुनरिन्द्रियार्थ** इति । वैयाकरणैरन्यथा इन्द्रियशब्दार्थव्युत्पत्तिः कृतेति । अतः प्रश्नयति कः पुनरिन्द्रियार्थ इति ॥ **इदि परमैश्वर्ये** इति[2] पठ्यते । तस्य धातोरिन्दन्तीतीन्द्रियाणीति रूपं द्रष्टव्यं । कथं कृत्वा । इन्दन्तीति इन्द्राणि रप्रत्यय औणादिकः । इन्द्राण्येवेन्द्रियाणीति स्वार्थे घस्तद्धितः[3] ॥ अथ वा इन्दन्तीतीन्द्रियं । बहुत्वात्तु बहुवचनेन कृतो निर्देशः इन्दन्तीतीन्द्रियाणीति । तस्मात् इन्दन्तीत्यस्य[4] शब्दस्य इन्द्रियमित्यादेशः । कथम् । अवर्णस्य रभावः तिशब्दस्य चेयादेशः । तेन नैरुक्तेन विधानेन इन्द्रियमिति भवति । तद्यथा कुञ्जर इति । वैयाकरणैर्हि कुञ्जो ऽस्यास्तीति कुञ्जर इति मत्वर्थीयेन[5] कुञ्जरशब्दो व्युत्पाद्यते ॥ नैरुक्तैस्तु तदना-

कुञ्जरः कुञ्जचारित्वादिति नैरुक्तेन न्यायेन साध्यते । तद्वदिहापि द्रष्टव्यं । यदि हि वैयाकरणनयेन इन्द्रस्य लिङ्गमिन्द्रियमिति व्युत्पाद्येत । **आधिपत्यार्थ** इन्द्रियार्थो हीयेत ।

---

1 Kārikā I, 47 C. 2 Dhātupāṭha I, 64. 3 घस् denotes a Taddhita-suffix इय. 4 इंदती° C, इंदंती° T. om. Tib. 5 मतु denotes a Taddhita-suffix मत्.

96.12 (1b—2) आधिपत्यार्थश्चेष्यते तस्मादित्थमिन्द्रियशब्दस्य व्युत्पत्तिर्निष्टव्येति ॥ **दृष्ट्वा श्रुत्वा च विषमपरिवर्जनादिति** । दृष्ट्वा श्वभ्रादि श्रुत्वा च व्याघ्रादिरुतं । श्वभ्रादिव्याघ्रादिरुत-

96.13 (1b—3) विषमपरिवर्जनात् ॥ **ससंप्रयोगयोरिति** सचेतसिकयोः ॥ **रूपदर्शनशब्दश्रवणयो-श्चेति** । चक्षुः पश्यति श्रोत्रं शृणोतीत्यादि वैभाषिकाणां सिद्धान्तः । तेनालम्बनविशे-[1]

97.2 (1b—4) षलक्षणयोर्दर्शनश्रवणयोरसाधारणकारणत्वे चक्षुःश्रोत्रयोराधिपत्यं ॥ **आत्मभावशोभायां पूर्ववदिति** । घ्राणादीनां सत्त्वानां अकान्तरूपत्वात् अकान्तात्मभावत्वादित्यर्थः ॥

97.3 (1b—5) **तैः कवडीकाराहारपरिभोगादिति** । तैर्घ्राणादिभिस्तत्परिभोगादिति । कथं गन्धस्य कवडीकाराहारत्वं । नासिकयोर्गन्धग्रासव्यवच्छेदेन कवडीकरणात् । कथं स्प्रष्टव्यस्य कवडीकाराहारत्वं । कायेन स्नानाभ्यङ्गादिकस्प्रष्टव्यस्य रोमकूपमुखग्रासव्यवच्छेदेन कवडीकरणात् ।

96.7 (1a—9) **द्वयोः किल**

इति । किलशब्दः परमतद्योतने स्वमतमस्य[2] पश्चाद्वक्ष्यते । द्वयोरिति प्रत्येकमभिसंबन्धः ॥

97.10 (1b—7) **सत्त्वभेदः स्त्रीपुरुष** इति । स्त्रीत्येको निकायसभागः पुरुष इत्यपरः तयोर्भेदः ॥

97.11 (1b—8) **सत्त्वविकल्प इति** स्तनादेः संस्थानस्य स्वरस्याचारस्य चान्यथात्वं विशेष

97.12 (1b—9) इत्यर्थः ॥ **संक्लेशव्यवदानयोरित्यपर** इति पूर्वाचार्यः । न सत्त्वभेदविकल्पयोः । अन्तरेणा-

97.13 (1b—10) पि पुरुषेन्द्रियं रूपावचराणां विकल्पसिद्धेः । विकल्पकृतश्च[3] सत्त्वभेद इत्यभिप्रायः । **तद्वियुक्तविकलानामिति** । वियुक्ताश्च ते विकलाश्च वियुक्तविकलाः । ताभ्यां स्त्रीपुरुषेन्द्रियाभ्यां वियुक्तविकलास्तद्वियुक्तविकलाः । के । **षण्ढपण्डकोभयव्यञ्जनाः** तद्वियुक्ताः । षण्ढपण्डकाः तेषां स्त्रीपुरुषेन्द्रियाभावात् । षण्ढपण्डकानां पुनः कः प्रतिविशेषः । षण्ढकाः स्वभावतो निःस्त्रीपुरुषेन्द्रियाः । पण्डका उपक्रमेणोपहतेन्द्रियाः । विनये तु

---

1 तेनालोच MSS. གཏོད་པར་བྱེད་པ་. 2 स्वमतमल्प N, स्वमतस्य T. རང་གི་གཞུང་འཕུགས་ནི་ Qu. स्वमतम् or स्वमतं तु? 3 °ल्पकृतश्च NT. བྱས་པ་ཡིན་ནོ་.

पण्डका एव पञ्च पठ्यन्ते। प्रकृतिपण्डकः ईर्ष्यापण्डकः पक्षपण्डकः आसेक्यपण्डकः लूनपण्डकश्चेति। तत्र प्रकृतिपण्डकः षण्ढ इहाभिप्रेतः। यस्य हि प्रकृत्या व्यञ्जनं नास्ति स प्रकृतिपण्डकः। शेषा इह पण्डका इष्यन्ते। लूनपण्डको हि तावदिन्द्रियच्छेदाद् इन्द्रियविकल इति स्फुट एषः। पक्षपण्डकादयस्त्विन्द्रियाकर्मण्यत्वेन तद्विकला एव। इन्द्रियकर्मण्यत्वकाले ऽपि तद्विकला इति व्यवस्थाप्यन्त एव। तदिन्द्रियकर्मण्यत्वस्य पुरुषसुखविशेषाजनकत्वात्प्रसवाजनकत्वाच्च इन्द्रियसद्भावाशङ्कानिवृत्त्यर्थमेव चेह षण्ढपण्डका इति पृथक्पाठः। अन्यथा हि विनयवदिहाप्यभिधर्मे[1] पण्डका इत्येवं[2] पठेरन्। उभयव्यञ्जनास्तद्विकलाः स्थानभ्रंशवैकल्यादल्पसुखहेतुत्ववैकल्याच्च। अपरे व्याचक्षते। तद्वियुक्ताः षण्ढाः। तद्विकलाः पण्डकाः उपक्रमवैकल्यात्। उभयव्यञ्जनाश्च तद्विकलाः स्थानभ्रंशवैकल्यात् अल्पसुखहेतुत्ववैकल्याच्चेति। तेषामसंवरादीनि न 97.15 (2a–1) भवन्ति।

नृणामसंवरो हित्वा षण्ढपण्डद्विधाकृतीन्[3]।
आनन्तर्यं षण्ढादीनां तु नेष्यते।
अल्पोपकारालज्जित्वात्[4]।
छिनत्ति स्त्री पुमान् दृष्टिचरितः[5]।

इति वचनात्। स्त्रीपुरुषाणां तु तानि भवन्ति। अतः संक्लेशे आधिपत्यं स्त्रीपुरुषेन्द्रिययोः। संवरफलप्राप्तिवैराग्याणि चेति। संवरस्त्रिविधः प्रातिमोक्षसंवरो 97.16 (2a–1) ध्यानसंवरो ऽनास्रवसंवरश्च। तेषामेको ऽपि संवरो न भवति किमङ्ग सर्वः।

संवरो ऽप्येवम्

इति[6] वचनात्। अत एव च स्रोतआपत्त्यादिफलप्राप्तिः कामादिवैराग्यं च तेषां न संभवति। स्त्रीपुरुषाणां तु भवतीति। अतो व्यवदाने ऽपि स्त्रीपुरुषेन्द्रिययोराधिपत्यमिति॥

---

1 °र्मे MSS. 2 °vaṃ CN. ཕོ་ད་. 3 kārikā IV, 44$^{ab}$. 4 kārikā IV, 98$^{abc}$. 5 K. IV, 81$^{ab}$. 6 K. IV, 44$^{c}$.

97.17 (2a–2) निकायसभागसंबन्धसंधारणायोरिति । जीवितेन्द्रियस्य निकायसभागोत्पत्तौ । नि-
97.19 (2a–3) कायसभागसंबन्धे तस्याधिपत्यं व्यवस्थाप्यते । निकायसभागसंधारणे चाधिपत्यं ।
जीवितेन्द्रियवशेन तदूर्ध्वमवस्थानात् ॥ मनइन्द्रियस्य पुनर्भवसंबन्ध इति । क्लिष्टेन
पुनर्भवसंबन्धात् । जीवितेन्द्रियादस्य को विशेषः । जीवितेन्द्रियस्य अन्तराभव एव
संबन्धनं । मनइन्द्रियस्य तूपपत्तिभवे ऽपि । समानकालं च जीवितेन्द्रियं निकायसभागेन
तत्संबन्धनं करोति । मनइन्द्रियं तु भिन्नकालमपि पुनर्भवे[1] तत्संबन्धनं करोति ।
वशिभावानुवर्तनं इति । चित्तस्य वशिभावमनुवर्तते लोको धर्मो वा यथोक्तं । चित्तेनायं
98.5 (2a–5) लोको नीयत इति विस्तरः । गाथायामप्युक्तं ।

चित्तेन नीयते लोकश्चित्तेन परिकृष्यते[2]
एकधर्मस्य चित्तस्य सर्वधर्मा वशानुगा

98.10 (2a–9) इति ॥ रागादीनां तदनुशायित्वादिति । तेषु सुखादिषु अनुशायितुं शीलमेषा-
मालम्बनतः संप्रयोगतो वा । त इमे तदनुशायिनो रागादयः । तद्भावस्तदनुशायित्वं ।
तस्मादिति । यथोक्तं सुखायां वेदनायां रागो ऽनुशेते दुःखायां द्वेषः अदुःखासुखायां
98.12 (2a–10) मोह इति[3] ॥ तैर्हि व्यवदायत इति । तैर्विशुध्यतीत्यर्थः । तदेवं क्लेशविशुद्धा-
वेषां श्रद्धादीनामाधिपत्यमुक्तं भवति ॥ व्यवदाने ऽपि सुखादीनामाधिपत्यमित्यपर
इति । न केवलं संक्लेशे सुखादीनामाधिपत्यं । किं तर्हि । व्यवदाने ऽपीत्यपिशब्द-
स्यार्थः । आभिधार्मिकाः केचिदेवमाहुः । व्यवदाने ऽपि तेषामाधिपत्यमस्तीति आग-
98.14 (2b–1) ममानयन्ति यस्मात् सुखितस्य चित्तं समाधीयत इत्युक्तं सूत्रे । दुःखोपनिषच्छ्र-
द्धा । दुःखमुपनिषदस्याः सेयं श्रद्धा दुःखोपनिषद् दुःखहेतुकेत्यर्थः । दुःखे सति
कस्यचिद्धर्मे रत्नत्रये वा श्रद्धा जायते प्रव्रज्यां वाभिलषति[4] । षण्णैष्क्रम्याश्रिताः सौ-

---

1 °र्भव MSS. 2 °रिकृष्यते MSS. ཡོངས་སུ་དྲངས་པ་ཡིན་. 3 論 三 3b4. 4 चा° NT. འམ་.

मनस्याद्य इति । षण्णैष्क्रम्याश्रितानि सौमनस्यानि षण्णैष्क्रम्याश्रितानि दौर्मनस्या-
नि षण्णैष्क्रम्याश्रिता उपेक्षाः । नैष्क्रम्यं सास्रवो ऽनास्रवो[1] मार्गः । धातोः संसाराद्वा नि-
ष्क्रमणं वैराग्यमित्यपरे । यथोक्तं सूत्रे । चक्षुर्विज्ञेयानि रूपाणि प्रतीत्योत्पद्यते सौ-
मनस्यं नैष्क्रम्याश्रितं नैष्क्रम्यालम्बनमित्यर्थः । नैष्क्रम्यानुकूलमिति वा । एवं याव-
न्मनः प्रतीत्य धर्मांश्च[2] उत्पद्यते सौमनस्यं नैष्क्रम्याश्रितमिति । तथा चक्षुर्विज्ञेयानि
रूपाणि प्रतीत्य उत्पद्यते दौर्मनस्यं नैष्क्रम्याश्रितम् । एवं यावन्मनः । तथा चक्षुर्विज्ञे-
यानि रूपाणि प्रतीत्योत्पद्यते उपेक्षा नैष्क्रम्याश्रिता । एवं यावन्मनः । नैष्क्रम्यं
प्राप्स्यामीति कस्यचित्सौमनस्यं । न नैष्क्रम्याय मया यत्नः क्रियते इति कस्यचिद्दौ-
र्मनस्यं । कस्यचित्प्रतिसंख्यायोपेक्षा तेषु रूपादिषु भवति ॥

**अपरे पुनराहुरिति** सौत्रान्तिकाः । **विज्ञाय विषमपरिहारादिति** । विज्ञानेन 98.17 (2b–2)
विषमपरिहारः क्रियते । न चक्षुःश्रोत्रेणेत्यभिप्रायः । **नापि विज्ञानादन्यद्रूपदर्शनं** 99.1 (2b–3)
**शब्दश्रवणं वास्तीति** । न रूपदर्शनशब्दश्रवणं ग्रहणाव्यतिरिक्तं विचार्यमाणं लभ्यते ।
ग्रहणं च विज्ञानमेवेति नान्यद्भवति । तस्माच्चक्षुःश्रोत्रविज्ञानयोः ससंप्रयोगयोरुत्प-
त्तौ यदाधिपत्यमुक्तं तदेव तद्भवति । नान्यत्राधिपत्यमेतदित्यभिप्रायः ॥ १ ॥ 99.10 (3a–1)

**मनसः पुनः सर्वार्थोपलब्धाविति**[3] ।

स्वार्थोपलब्ध्याधिपत्याद्[4]

इत्येव सिद्धे मनसः सर्वार्थोपलब्धाविति वचनं । धर्मधातोरसर्वधर्मस्वभावत्वात् ।
व्याख्यातं चैतत्पुरस्तात् ॥ **ननु चार्थानामप्यत्राधिपत्यमिति** । द्वयं प्रतीत्य वि- 99.12 (3a–2)
ज्ञानस्योत्पत्तिरिति वचनात् ॥ **अधिकं हि प्रभुत्वमाधिपत्यमिति** । अधिकः प्रभुर- 99.13 (3a–3)
धिपतिः तद्भाव आधिपत्य[5]मिति । **सर्वरूपोपलब्धौ सामान्यकारणत्वादिति** । नील- 99.14 (3a–4)

---

1 सास्रवानास्रवो MSS. 2 °र्मांश्च MSS. 3 °पलंभाविति MSS.
དམིགས་པར་བྱ་བ་ལ་བྱ་བ་ནི་. 4 Kārikā II, 2ᵃ. 5 आधेपत्य° NT, आधे-
त्य° C. ལྷག་པར་དབང་བྱེད་པ་ཉིད་.

99.17 (3a—5) पीतादिसर्वरूपोपलब्धौ एकरूपस्य चक्षुषः कारणत्वात्। न[1] तु रूपस्यैकरूपस्य नील-
पीतादिसर्वरूपोपलब्धौ कारणत्वं। न हि नीलरूपं पीतरूपोपलब्धौ कारणं भवति। **तत्पटुमन्दताद्यनुविधानाच्चोपलब्धेरिति**। यस्मादुपलब्धिश्चक्षुरादिपटुमन्दताम-नुविधत्ते। तद्यथा पटुनि चक्षुषि पट्वी तदुपलब्धिः मन्दे मन्देति। आदिशब्देन अकुश-लकुशलसवेदनावेदनानुविधानं। अकुशले मनसि अकुशलोपलब्धिः। कुशले कुशला। सवेदने सवेदना। अवेदने ऽवेदनेति[2] न रूपस्य पटुमन्दताद्यनुविधत्ते उपलब्धिः। तेनाह **तद्विपर्ययादिति**। तस्माच्चक्षुरादीनामधिकमैश्वर्यं न रूपादीनां॥

99.7 (2b—6) **कायात्स्त्रीपुरुषेन्द्रिये**

इत्यत्र साधनं। कायेन्द्रियस्वभावं स्त्रीपुरुषेन्द्रियं स्प्रष्टव्यविज्ञानजनकत्वात् अस्त्रीपुरु-
100.6 (3a—9) षेन्द्रियस्वभावकायेन्द्रियवत्। वैधर्म्येण चक्षुरिन्द्रियवत्॥ **स्त्र्याकृतिस्वरचेष्टाभि-प्राया इति**। स्त्र्यभिप्रायपुरुषाभिप्राययोर्विपर्ययेण। तदेवं सति सत्त्वविकल्प एव स्त्रीपुरुषेन्द्रिययोराधिपत्यं॥ २॥

100.15 (3b—2) **निकायसभागस्थितौ जीवितेन्द्रियस्याधिपत्यं**। न तु वैभाषिकवत् निका-यसभागसंबन्धे। तत्र मनस एवाधिपत्यात्॥ **संक्लेशे वेदनानामिति**। अत्र वैभाषिकैः
101.2 (3b—5) सार्धमैकमत्यं॥ **तथा हि तैरिति** विस्तरः। **तथा हि तैः** श्रद्धादिभिः **क्लेशाश्च विष्कम्भ्यन्ते** लौकिकमार्गगतैर्**मार्गश्चावाह्यते** निर्वेधभागीयादिगतैः। तदेवं व्यवदान-संभारे श्रद्धादीनां प्रत्येकमाधिपत्यमुक्तं भवति॥ ३॥

101.14 (3b—10) **न ह्यविमुक्तचित्तस्यास्ति परिनिर्वाणमिति**। आज्ञातावीन्द्रियं क्षयज्ञा-नादि अनास्रवमिन्द्रियं। तदेव च विमुक्तं क्लेशविमुक्त्या संतानविमुक्त्या च। तत्प्रा-

---

1 ननु MSS. . . ནི . . . མ་ཡིན་.  2 तिवावेनेति N, वावेदनेति C. चावेद-नेति T. ཚོར་བ་མེད་པ་ཡིན་ནོ་ཞེས་བྱ་བ་ཡིན་ནོ་.

मस्य निरुपधिशेषनिर्वाणं[1] भवति । तस्मादाज्ञातावीन्द्रियस्य निरुपधिशेषनिर्वाणा[1]-माधिपत्यं व्यवस्थाप्यते ॥ **दृष्टधर्मसुखविहारं प्रतीति** विस्तरः । दृष्टो धर्मो 102.2 (4a—) दृष्टधर्मः । दृष्टजन्मेत्यर्थः । सुखो विहारः सुखविहारः । दृष्टधर्मे सुखविहारः दृष्टधर्म-सुखविहारः । तं प्रत्याज्ञातावीन्द्रियस्याधिपत्यं । **विमुक्तिप्रीतिसुखप्रतिसंवेद-नादिति** । विमुक्तिः क्लेशप्रहाणं । प्रीतिः सौमनस्यं । सुखं प्रश्रब्धिसुखं । विमुक्त्या प्रीतिसुखस्य प्रतिसंवेदनं विमुक्तिप्रीतिसुखप्रतिसंवेदनं । तस्मादिति । तदुक्तं भवति विमुक्तिप्रीतिसुखप्रतिसंवेदनमेव दृष्टधर्मसुखविहार इति ॥

**वाक्पाणिपादपायूपस्थानामपि चेन्द्रियत्वमुपसंख्यातव्यमिति** । सांख्या- 102.7 (4a—6) श्चक्षुरिन्द्रियादिव्यतिरिक्तानि वागिन्द्रियादीनि कल्पयन्ति । वागिन्द्रियं येन वचनं क्रियते । पाणीन्द्रियं येन किंचिद्द्रव्यमादीयते । पादेन्द्रियं येन विहरणं क्रियते चंक्रमणमित्यर्थः । पाय्विन्द्रियं येन पुरीषोत्सर्गः क्रियते । उपस्थेन्द्रियं कायेन्द्रिये-कदेशव्यतिरिक्तं येनानन्दः सुखविशेषः प्राप्यते ॥ **न खलूपसंख्यातव्यमविद्यादी-** 102.10 (4a—7) **नामिन्द्रियत्वं** येनार्थेन भगवता द्वाविंशतिरिन्द्रियाण्युक्तानि । तत्राविद्यादीनामयो-गात् ॥ ४ ॥

को ऽसावर्थ इत्याह

**चित्ताश्रयस्तद्विकल्प** 102.12 (4a—6)

इति विस्तरः । चित्तस्याश्रयस्तदाश्रयस्य विकल्पः ।

**स्थितिः**

**संक्लेशो**

व्यवदाने

**संभारो व्यवदानं च ।**

इति । एतच्च षडायतनं मौलं सत्त्वद्रव्यमिति । तदितरेषां तदाश्रितत्वात् । तथा 102.18 (4b—1) हि षडिन्द्रियाधिपत्यसंभूतमिन्द्रियाधिष्ठानं । षड्वा विषया विज्ञानकायाश्च[2] । तदेतदपि

---

1 °शेषे नि° N. ཕྱུང་པོའི་ལྷག་མ་མེད་པའི་མྱ་ངན་ལས་འདའ་བར.   2 °श्चा MSS.

सत्त्वद्रव्यमिष्यते । न तु मौलं । न ह्यधिष्ठानाद्याधिपत्यसंभूतं षडायतनमिति ॥

103.3 (4b—3) **व्यवदानसंभरणं पञ्चभिरिति** । श्रद्धादिभिः ॥ **व्यवदानं त्रिभिरिति** । अनाज्ञात-
माज्ञास्यामीन्द्रियादिभिः ॥ ५ ॥

103.13 (4b—5) **अपरः कल्पः**

103.7 (4b—6) **प्रवृत्तेराश्रयोत्पत्तिर्**

इति विस्तरः । प्रवृत्तिपक्षं निवृत्तिपक्षं चाधिकृत्योच्यते ।

**प्रवृत्तेः**

संसारस्याश्रय उत्पत्तिः

**स्थितिः उपभोगश्च ॥**

निवृत्तेरपि निर्वाणस्याश्रय उत्पत्तिः स्थितिरुपभोगश्च । एतावता च पुरुषार्थपरिसमा-
प्तिरिति निरर्थिका तदन्येन्द्रियप्रज्ञप्तिः । भवतामपि पुरुषार्थपरिसमाप्तिः पठ्यते । तस्य
शब्दाद्युपलब्धिरादिर्गुणपुरुषान्तरोपलब्धिरन्त[1] इति ॥ तत्र षडायतनं मूलसत्त्वद्रव्यभूतं
103.14 (4b—9) संसरतीति **प्रवृत्तेराश्रयः** । **उत्पत्तिः स्त्रीपुरुषेन्द्रिये** इति । उत्पद्यतेऽस्या इत्युत्प-
त्तिः । कस्मादित्याह **तत उत्पत्तेः** । कस्य । षडायतनस्य । मनःकायेन्द्रिययोः साक्षात्ताभ्या-
मुत्पत्तेः । चक्षुरादीनां चतुर्णां क्रमेणोत्पत्तेः । **स्थितिर्जीवितेन्द्रियेण** षडायतनावस्था-
नात् । **उपभोगो वेदनाभिः** सुखादिभिः ॥ **श्रद्धादयो हि निवृत्तेराश्रय** इति । श्रद्धा-
103.16, 18 (4b—10, 5a—1) दीनां प्रतिष्ठाभूतत्वात् । **आज्ञास्यामीन्द्रियं प्रभव** इति आदिभवः[2] प्रथमतोऽनास्रवो-
104.1 (5a—2) त्पत्तेः । **स्थितिराज्ञेन्द्रियं** प्राबन्धिकत्वात् । **उपभोग आज्ञातावीन्द्रियेणेति** । तेन वि-
104.4 (5a—3) मुक्तिप्रीतिसुखप्रतिसंवेदनात् । **अत एतावन्त्येवेन्द्रियाणीति** नाविद्यादीनामिन्द्रियत्व-

---

1 °रंतर N. མཐའ་ཡིན་ནོ་.   2 आदिभवतः N, आभवः C. དང་པོར་སྐྱེ་བ་སྟེ.

मिष्टमित्यर्थः। अत एव चैषामेषो ऽनुक्रम इति। चक्षुरिन्द्रियं यावद्घ्राणातावीन्द्रियमि-
ति प्रवृत्तिनिवृत्त्योराश्रयादिभावात् ॥ वाचस्तु नेन्द्रियत्वं। वचने शिक्षाविशेषापेक्ष- 104.5 (5a—4)
त्वात्। जातमात्रो हि बालको विनैव शिक्षया चक्षुषा रूपाणि पश्यति। न त्वेवं वचनं
करोति। तस्मादिन्द्रियकर्मातिक्रान्तत्वात् न वागिन्द्रियं भवितुमर्हतीति। जिह्वेन्द्रियादधि-
ष्ठानस्यैव त्वेतत्कर्म वचनमिति॥ पाणिपादस्य चादानविहरणादनन्यत्वादिति। पा- 104.7 (5a—5)
णिरेव ह्यन्यथान्यत्र चोत्पन्न आदानमुच्यते। पाद एव चान्यथान्यत्र चोत्पन्नो वि- 104.9 (5a—6)
हरणमिति। कर्माभावात् स्वात्मनि च वृत्तिविरोधात्[1] न पाणिपादस्येन्द्रियत्वं ॥ उरग-
प्रभृतीनामिति। सर्पादीनां पाणिपादं नास्ति। अथ च तेषामादानविहरणं भवति न
पाणिपादस्येन्द्रियत्वं। तेषामप्यस्ति सूक्ष्ममिति चेत्। न। साध्यत्वात्॥ पायोरपि नेन्द्रि- 104.10 (5a—7)
यत्वम् उत्सर्ग इति अशुच्युत्सर्गे। गुरुद्रव्यस्य यस्य कस्यचिदाकाशे छिद्रे सर्वत्र 104.11 (5a—8)
पायुस्थानादन्यत्रापि पतनात्। गुरुद्रव्यस्य गुरुत्वादेव स्वयं पतनं नेन्द्रियकृतं। वायु-
ना च तत्प्रेरणादिति। वायुना तस्य गुरोरशुचिद्रव्यस्य प्रेरणा वायोरेव तत्कर्म
स्यात् न पाय्विन्द्रियस्य। तदनुपलब्धेः॥ उपस्थस्यापि नेन्द्रियत्वं आनन्द इति। काये- 104.13 (5a—9)
न्द्रियैकदेशस्त्रीपुरुषेन्द्रियव्यतिरिक्तकल्पितस्य उपस्थस्य नेन्द्रियत्वं आनन्दे कायेन्द्र-
यैकदेशभूतस्त्रीपुरुषेन्द्रियकृतं हि तत्। क्लिष्टं सौख्यमिति वाक्यार्थः॥ कण्ठदन्ता- 104.15(5a—10
क्षिवर्त्माङ्गुलिपर्वणामपीति विस्तरः। यदि यथोक्तात्कारणात् एतावन्त्येवेन्द्रिया-
णीति नेष्यते। कण्ठस्याभ्यवहरणे। दन्तस्य चर्वणे। अक्षिवर्त्मन उन्मेषनिमेषे।
पर्वणः अस्थिसंधिसंकोचविकासक्रियायामिन्द्रियत्वं प्रसज्येत ॥ सर्वस्य वा 104.17 (4b—1)
कारणभूतस्येति विस्तरः। सर्वस्य वा कारणभूतस्य बीजादेः स्वस्यां क्रियायां
स्वकार्यक्रियायां अङ्कुरादिलक्षणायामिन्द्रियत्वं प्रसज्येतेति अधिकृतं। यदि यस्य
यत्र पुरुषकारो ऽस्ति। तस्य तत्रेन्द्रियत्वमिष्यते। स च नियमहेतुः पूर्वोक्तो नेष्यते।
तस्मादयुक्तं वागादीनामिन्द्रियत्वं ॥

---

1 °त्तिनिरोधात् MSS. འགལ་བའི་ཕྱིར་

104.19 (5b—3) तत्र चक्षुरादीनामिति विस्तरः । तत्रेति वाक्योपन्यासे । कृतो निर्देश इति ।

तद्विज्ञानाश्रया रूपप्रसादाश्चक्षुरादयः ।[1]

कायात्स्त्रीपुरुषेन्द्रियं[2] ।

विज्ञानं प्रतिविज्ञप्तिः[3] ।

इति ॥ जीवितेन्द्रियस्येति ।

आयुर्जीवितमाधारः ऊष्मविज्ञानयोर्हि य

105.3 (5b—3) इत्यत्र ॥ श्रद्धादीनां चैत्तेष्विति ।

श्रद्धाप्रमादः प्रश्रब्धिः

इत्यत्र[5] प्रदेशे ॥ ननु च वेदनाया अपि[6] कृतो निर्देशः । चैत्तेषु च करिष्यते ।

वेदनानुभव

इति[7] ॥

वेदना चेतना संज्ञा ।

इति[8] वचनात् ॥ सत्यं सामान्यं रूपं वेदनाया उक्तं वक्ष्यते च । विशेषविभागरूपं त्विह विवक्षितं इति सुखादीनां कर्तव्यो निर्देश इति आह ॥ आज्ञास्यामीन्द्रियादीनां तर्हि 105.2 (5b—4) न कर्तव्यः । यस्मान्मनसो लक्षणमुक्तं श्रद्धादीनां चैत्तेषु करिष्यते । सुखसौमनस्योपेक्षाणामिह क्रियते । एषामपि कर्तव्य एव । यस्मान्नवद्रव्यस्वभावत्वं एषां दर्शयितव्यं ।

---

1 Kārikā I, $9^{cd}$. 2 Kārikā II, $2^{c}$. 3 Kārikā I, $16^{a}$. 4 K. II, $46^{ab}$. 5 K. II, $26^{a}$. 6 अवि MSS. ཨཝི. 7 K. I, $14^{c}$. 8 K. II, $25^{a}$.

एतस्यां चावस्थायामेतानि नव द्रव्याणि अनाज्ञातमाज्ञास्यामीन्द्रियाख्यां लभन्ते । एतस्यामवस्थायामाज्ञेन्द्रियाख्यामेतस्यामाज्ञातावीन्द्रियाख्यां लभन्त इति । स एषामवस्थाविशेषो दर्शयितव्य इत्यतः सूत्रमेतत् सुखादीनामाज्ञास्यामीन्द्रियादीनां च कर्तव्य इति ॥ ६ ॥

### असाता या कायिकी वेदना 105.6 (5b–7)

इति । असातेति सातानिवृत्त्यर्थं । कायिकीति मानसीनिवृत्त्यर्थं ॥ तत्र कायाश्चक्षुरादयः पञ्च परमाणुसंचयात्मकत्वात् । तत्र काये भवा कायेन वा आश्रयेण सह चरतीति कायिकी । या **उपघातिका** पञ्चेन्द्रियाश्रया वेदना । तत् 105.11 (6a–1)

### दुःखेन्द्रियम् 105.7,8 (5b-7)

इत्यवगन्तव्यं ।

### सुखं साता

इति । अत्रेन्द्रियमित्यनुवर्तते कायिकीति च । सातेति ग्रहणमसातानिवृत्त्यर्थं । तदेतदुक्तं भवति । **तत्सुखेन्द्रियं** । **यानुग्राहिका** पञ्चेन्द्रियाश्रया वेदनेति ॥ 105.13 (6a–2)

### ध्याने तृतीये तु चैतसी सा सुखेन्द्रियम् 105.8 (5b–7)

इति । तृतीये तु ध्याने चैतस्यपि साता वेदना सुखेन्द्रियमिति व्यवस्थाप्यते । कस्माच्चैतस्येव साता तत्र गृह्यते । न कायिकीति अत आह । **न हि तत्र कायिकी** 105.16 (6a–3) **वेदनास्ति[1] पञ्चविज्ञानकायाभावादिति** । तृतीये ध्याने[2] कस्मात्सा न[2] सौमनस्ये-

---

1 °दनानास्ति NT. ཚོར་བ་ནི་མེད་དོ་. 2 . . 2 कस्मान्मान MSS. ཅིའི་ཕྱིར་····དེ་···མ་ཡིན་.

106.7 (6a–5) न्द्रियं । अत आह । तृतीये तु ध्याने प्रीतिवीतरागत्वात् सुखेन्द्रियमेव सा । न सौमनस्येन्द्रियं । सातत्वाद्धि सुखमुच्यते । न प्रीतिरसंप्रहर्षाकारत्वात् । तथा हि सूत्र उक्तं । प्रीतेर्विरागादुपेक्षको विहरतीति विस्तरेण यावत्स्मृतिमान्[1] सुखविहारी तृतीयं ध्यानमुपसंपद्य विहरतीति ॥ सौमनस्यादन्या प्रीतिरिति चेत् । अत
106.9 (6a–6) आह । प्रीतिर्हि सौमनस्यमिति ॥ ७ ॥

106.2 (5b–8) असाता चैतसी पुनः
दौर्मनस्यम्

(6a–7) इत्युपघातिका चैतसिकी वेदना दौर्मनस्यं ।

106.3 (5b–8) उपेक्षा तु मध्या

इति । उपेक्षेन्द्रियं तु या मध्या वेदना । नैव साता नासातेत्यर्थः ।

उभयी

इति । उभयावयवावस्था उभयी । कायिकी चैतसिकीत्यर्थः ।

अविकल्पनाद्

106.16 (6a–10) इति । अभिनिरूपणाविकल्पाभावादित्यर्थः ॥ प्रायेणेति अह्णां समाधिजविपाकजप्रीतिसुखपरिवर्जनार्थं । न तु कायिकमिति । न तु कायिकं सुखदुःखं विकल्पनादु-
106.17 (6b–1) त्पद्यते । किं कारणमित्याह । विषयवशादर्हतामप्युत्पत्तेरिति । प्रहीणप्रियाप्रियविकल्पानामप्यर्हतां विषयवशेनैव कायिकसुखदुःखोत्पादात् । अतस्तयोरिन्द्रियत्वेन भेद इति । तयोः कायिकचैतसिकयोः सुखयोर्दुःखयोश्च इन्द्रियत्वेन भेदः पृथक्त्वं सुखेन्द्रियं

---

1 ०मान MSS. དྲན་པ་དང་ལྡན་ཞིང་.

सौमनस्येन्द्रियं दुःखेन्द्रियं दौर्मनस्येन्द्रियमिति। **उपेक्षा तु स्वरसेनैव**अनभिसंस्कारेणा- 107.1 (6b—2)
**विकल्पयत एवानभिनिरूपयत**[1] **एवोत्पद्यते कायिकी चैतसिकी वा** विपाकजा
नैष्यन्दिकी वा। **तस्मादेकमिन्द्रियं क्रियते** इन्द्रियत्वेनाभेद उपेक्षेन्द्रियमिति॥ **अन्यथा** 107.2 (6b—3)
**च कायिकमिति** विस्तरः। अन्येनानुभवरूपविशेषेण **कायिकं सुखमनुगृह्णाति**।
अन्येन **चैतसिकं**। स्थिरं हि कायिकं। अस्थिरं हि चैतसिकं। **एवं दुःखमन्येना-**
**नुभवरूपविशेषेण कायिकमुपहन्ति** अन्येन **चैतसिकमिति**॥ **उपेक्षायां त्वेष वि-** 107.5 (6b—4)
**कल्प इति**। एष स्वरूपविशेषलक्षणो विकल्पो **नास्ति**। अत **उपेक्षणां प्रति** उपे-
क्षायां[2] प्रति **अविकल्पनात्** अस्वभावविशेषाद्भेदः॥

## दृग्भावनाशैक्षपथ 107.7 (5b—9)

इति। दृग्दर्शनं दृशो भावनाया अशैक्षस्य च पन्था

दृग्भावनाशैक्षपथः॥

तस्मिन्नेव **मार्गत्रये** यानि मनःसुखसौमनस्योपेक्षाश्रद्धावीर्यस्मृतिसमाधिप्रज्ञा- 107.13 (6b—5)
ख्यानि नव द्रव्याणि। तानि **दर्शनमार्गे अनाज्ञातमाज्ञास्यामीन्द्रियं भाव-** 107.14 (6b—6)
**नामार्गे आज्ञेन्द्रियमशैक्षमार्गे आज्ञातावीन्द्रियमिति** व्यवस्थाप्यन्ते। अन्योन्य-
मपेक्ष्यमाणानि तानि नव द्रव्याणि तत्तन्नाम लभन्ते। **नवेति** च कलापान्तरा-
पेक्षयैवमुक्तं[3]। न त्वेकस्मिंश्चित्तकलापे नव द्रव्याणि भवन्ति। सुखसौमनस्योपे-
क्षेन्द्रियाणामेकतरस्यैव भावात्। यदि हि स मार्गो ऽनागम्यध्यानान्तरचतुर्थध्या-
नाकाशविज्ञानाकिंचन्यायतनभूमिकः। तत्रोपेक्षेन्द्रियमेव। न सुखसौमनस्येन्द्रिये। यदि
प्रथमद्वितीयध्यानभूमिकः। तत्र सौमनस्येन्द्रियमेव। यदि तृतीयध्यानभूमिकः। तत्र

---

1 °पयित N. མངོན་པར་རྟོག་པ་མེད་པ'. 2 Sic MSS. བཏང་སྙོམས་སུ་བྱ་བ' = ? उपेक्षाकार्य. 3 °क्ष्यै N, °क्षे CT. བལྟོས་ནས'.

107.17 (6b–8) सुखेन्द्रियमेव नान्यदिति ॥ **अनाज्ञातमाज्ञातुं प्रवृत्त** इति । **अनाज्ञातं** सत्यचतुष्टयं आज्ञातुं वेदितुं प्रवृत्तः आज्ञास्यामीति प्रारब्धः । तस्येन्द्रियमनाज्ञातमाज्ञा-
107.18 (6b–9) स्यामीन्द्रियं अलुक्समासः आख्यातप्रतिरूपकश्चायमाज्ञास्यामीति शब्दः ॥ **भाव-**
108.1 (6b–10) **नामार्गे नास्त्यपूर्वमाज्ञेयं** । तदेव तु सत्यचतुष्टयमाजानाति **शेषानुशयप्रहाणार्थं** । भावनाहेयक्लेशप्रहाणार्थं । तस्याज्ञस्य पुद्गलस्येन्द्रियमाज्ञेन्द्रियम् । आज्ञमेवे-
108.2 (7a–1) न्द्रियमिति वा ॥ **अशैक्षमार्गे त्वाज्ञातमित्यवगमः आज्ञाताव** इति । अर्थ[1]कथनमात्रमेतत् । शब्दविग्रहस्त्वेवं कर्तव्यः । आज्ञातमित्याव[2] आज्ञातावः । अवतेः घञि[3]
108.3 (7a–2) रूपमेतदाव इति । सो[4] ऽस्यास्तीति मत्वर्थीयः[5] **आज्ञातावी** ॥ **आज्ञातमवितुं शीलमस्येति वेति** । ताच्छीलिको णिनिः[6] ॥ **तथाभूतस्येन्द्रियमिति** । तथाभूतस्य पुद्गलस्येन्द्रियं आज्ञाताविन इत्यर्थः ॥ ८ ॥

107.8 (7a–6) **अमलं त्रयम्**

इति । अमलमेव त्रयमित्यवधार्यते ॥ ननु चायमनास्रवसास्रवप्रकारभेदः उक्तो धातुनिर्देशे

अनास्रवा मार्गसत्यम्

इति[7] । तथा

सास्रवानास्रवा एते त्रयः शेषास्तु सास्रवाः

इत्यादिवचनात्[8] ॥ सत्यमुक्तो ऽयमेवमादिः प्रकारभेदः । स तु सामान्यरूपेणोक्तो न भेदरूपेण । अतः शिष्यसुखप्रतिपत्त्यर्थमयमेवमादिप्रकारभेदः प्रतिपदरूपेण पुनरभिधीयत इत्येवमवगन्तव्यं ॥

---

1 अथ MSS. དོན་. 2 °मित्येव MSS. ཀུན་དུ་རྟོགས་པ་ནི་. 3 घञ् denotes a Kṛt-suffix अ. 4 सा MSS. 5 मतु denotes a Taddhita-suffix मत्. 6 णिनि denotes a Kṛt-suffix इन्. 7 Kārikā I, 5ª. 8 Kārikā I, 31ªᵇ.

द्विधा नवेति न सूत्रयितव्यं[1]। एकान्तानास्रवसास्रवनिर्धारणादेव हि द्विधा नवेति सिद्धः। यदि ह्येतानि नवैकान्तनानास्रवाणि स्युः एकान्तानास्रवेषु आज्ञास्यामीन्द्रियादिषु पठ्येरन्। तथैकान्तसास्रवाणि स्युः। एकान्तसास्रवेषु रूपीन्द्रियजीवितदुःखदौर्मनस्येषु पठ्येरन्[2]। न चैवं[3]। अतो

नव द्विधा

इति सिद्धं। अस्त्येतदेवं। मतान्तरनिवृत्त्यर्थं तु पुनरिदमुच्यते।

**नव द्विधा** 107.10 (7a—7)

इति। द्विधैव नव। नानास्रवाणि यथैके कथयन्ति। तत्सिद्धये चागममानयन्ति। यस्ये- 109.2 (7b—2)
मानीति विस्तरः। **सर्वेण सर्वाणि न सन्तीति**। सर्वेण प्रकारेण मृदुमध्याधिमा-
त्रभेदेन। सर्वाणीति पञ्चापि न सन्तीत्यर्थः। **पृथग्जनपक्षावस्थितं वदामीति** वच- 109.3 (7b—3)
नात्। अर्थादेतदुक्तं भवति यस्येमानि सन्ति। स आर्य इति॥ **नेदं ज्ञापकं**। तेषा-
**मनास्रवत्वमधिकृत्येत्याचार्यः**। तथा ह्यार्यपुद्गलव्यवस्थानं **कृत्वा यस्येमानीत्या-** 109.6 (7b—4)
**हेति**। कथं। पञ्चेमानि भिक्षव इन्द्रियाणि। कतमानि पञ्च। श्रद्धेन्द्रियं यावत्प्रज्ञेन्द्रियं। एषां पञ्चानामिन्द्रियाणां तीक्ष्णत्वात्परिपूर्णत्वादर्हन्भवति। ततस्तनुतरैर्मृदुतरैरनागामी भवति। ततस्तनुतरैर्मृदुतरैः सकृदागामी। ततस्तनुतरैर्मृदुतरैः स्रोतआपन्नः। ततो ऽपि तनुतरैर्मृदुतरैर्धर्मानुसारी। ततस्तनुतरैर्मृदुतरैः श्रद्धानुसारी। इति हि भिक्षव इन्द्रियपारमितां प्रतीत्य फलपारमिता प्रज्ञायते। फलपारमितां प्रतीत्य पुद्गलपारमिता प्रज्ञायते। यस्येमानि पञ्चेन्द्रियाणि सर्वेण सर्वाणि न सन्ति। तमहं बाह्यं पृथग्जनपक्षावस्थितं वदामीति। तदेवमार्यपुद्गलव्यवस्थानं कृत्वा यस्येमानीत्याह भगवानिति॥

---

1 °व्यः MSS. 2 पश्येरन् NT, मध्यरन् C. སྟོན་པར་འགྱུར་བ་ཞིག་ན.
3 नवैवं MSS. དེ་ལྟ་ཡང་མ་ཡིན་པས.

109.8 (7 b—5) पृथग्जनो वा द्विविध इति । आभ्यन्तरकश्च बाह्यकश्च । असमुच्छिन्नकुशलमूल
109.9 (7 b—6) आभ्यन्तरको बौद्धसंगृहीतत्वात् । समुच्छिन्नकुशलमूलस्तु बाह्यकस्तद्विपर्ययात् ।
अत एव च बाह्यमिति विशेषणं । इतरथा हि पृथग्जनपक्षावस्थितं वदामीत्येवाव-
109.11 (7 b—7) क्ष्यत् । उक्तं च सूत्र[1] इति । अथ भगवतो ऽचिराभिसंबुद्धस्यैतदभवत् । अधिगतो मे धर्मो गम्भीरो गम्भीरावभासः दुर्दर्शो दुरवबोधः अतर्क्यो ऽतर्कावचरः सूक्ष्मो निपुणः पण्डितविज्ञवेदनीयः । तं चाहं परेषामावेदयेयं । तं च परे न विजानीयुः । स मम स्याद्विघातः । स्यात्क्लमथः । स्याच्चेतसो ऽनुदयः । यन्न्वहमेकाकी अरण्ये प्रवणे दृष्टधर्मसुखविहारतायोगमनुयुक्तो विहरेयं ॥ अथ ब्रह्मणः सहापतेर्ब्रह्मलोके स्थितस्यैतदभवत् । नश्यति बतायं लोकः । प्रणश्यति बतायं लोकः । यत्रेदानीं कदाचित्कर्हिचित्तथागता अर्हन्तः सम्यक्संबुद्धा लोके उत्पद्यन्ते । तद्यथा उडुम्बरपुष्पं । तस्य चाद्य भगवतो ऽल्पोत्सुकविहारतायां चित्तं क्रामति । न धर्मदेशनायां । यन्न्वहं गत्वाध्येषयेयं । अथ ब्रह्मा सहापतिः तद्यथा बलवान् पुरुषः सम्मिञ्जितं बाहुं प्रसारयेत् । प्रसारितं वा सम्मिञ्जयेत् । एवमेव ब्रह्मा सहापतिः ब्रह्मलोके ऽन्तर्हितो भगवतः पुरस्तात् प्रत्यस्थात् । अथ ब्रह्मा तस्यां वेलायां गाथामभाषत ।

प्रादुर्बभूव मगधेषु पूर्वं
धर्मो ह्यशुद्धः समलानुबद्धः ।
अपावृणीष्व अमृतस्य द्वारं
वदस्व धर्मं विरजं[2] निरङ्गणं[3] ॥

अथ भगवान् तस्यां वेलायामिमे गाथे अभाषत् ।

---

[1] Cf. 根本說一切有部毘奈耶破僧事 (寒三 23[b] 18 以下), Vinaya-piṭaka (Mahāvagga) I, 4 l. 32 et seq., Lalitavistara (Lefmann) 392 l. 8 et seq. [2] °रजो MSS. [3] °गनं MSS.

कृच्छ्रेण मे अधिगतो ब्रह्मन् खिलां प्रविदाल्य[1]
भवरागपरीतैश्च नायं धर्मः सुसंबुधः[2] ।
प्रतिस्रोतोपमं मार्गं गभीरमतिदुर्दृशं
न द्रक्ष्यन्ते रागरक्तास्तमःस्कन्धेन चावृताः ॥

ब्रह्मावोचत् । **सन्ति भदन्त सत्त्वा लोके जाता लोके वृद्धास्तीक्ष्णेन्द्रिया अपि** 109.11 (7b–8)
**मध्येन्द्रिया अपि मृद्विन्द्रिया अपीत्यप्रवर्तिते एव धर्मचक्र** इति विस्तरः ॥
इन्द्रियाणि श्रद्धादीनि । यैः ते भव्या उक्ताः । यस्मादप्रवर्तितेऽपि धर्मचक्रे सन्ति ती-
क्ष्णेन्द्रिया इत्याद्युक्तं । **तस्मात्सन्त्येव सास्रवाणि श्रद्धादीनीति** ॥ **सदेवकाल्लोका-** 109.14, 18. (7b–9, 10)
**दिति** विस्तरः । न तावदहमस्मात्सदेवकाल्लोकात्समारकात्सब्रह्मकात्सश्रमणब्राह्म-
णिकायाः प्रजायाः सदेवमानुषाया मुक्तो निःसृतो विसंयुक्तो विप्रयुक्तो विपर्यासाप-
गतेन चेतसा बहुलं व्यहार्षमिति[3] विस्तरवचनं । **न चानास्रवाणामेष[4] परीत्ता-** 109.19 (8a–1)
**प्रकार** इति । न ह्यनास्रवाणां आस्वाद आदीनवो निःसरणं वा युज्यते ॥ ६ ॥

**अर्हन्निति** । नानागामी क्लेशाविमुक्तसंतानत्वात् । **ऋद्धिमानिति** प्राप्ताभिज्ञः । 110.10 (8a–9)
**चेतोवशित्वं प्राप्त** इति असमयविमुक्तः ॥ **जीवितपरिष्कारमिति** । जीविताय परि- 110.12 (8a–10)
ष्कारस्तदनुगुणत्वात् । **दत्त्वा तत्प्रणिधायेति** । तदायुः प्रणिधाय चेतसिकृत्वेत्यर्थः । 110.13 (8b–1)
कथमित्याह । यन्मे भोगविपाकं कर्म[5] । तदायुर्विपाकं भवत्विति ॥ **प्रान्तकोटिक-**
**मिति** ।

वृद्धिकाष्ठागतम्[6]

इति[7] लक्षणमस्य वक्ष्यते । **चित्तमुत्पादयति वाचं च भाषत** इति । चित्तवाचावपि

---

1 Sic MSS. contra metrum ? विदालिय. 2 °संबोधः MSS. contra metrum; cf. Vinayapiṭaka I, 5, 9. 3 व्यवहार्षमि NT, °हर्षमि C. གནས་པར་མི་འགྱུར་རོ་. 4 °मेव NC. འདི་. 5 Om. all MSS. and Tib. But see below. 6 °द्धिकोष्ठा N, °द्धिकोष्टा T, °द्धिकाष्ठा C. འཕེལ་བའི་རབ་ཏུ.
7 Kārikā VII, 46$^{c}$.

तत्सिद्धये कुर्यात् । नैककारणसाध्यं हि कार्यं । तदनेन विपाक एव जीवितेन्द्रियमिति
110.14 (8b–2) दर्शयति । यन्मे[1] भोगविपाकं कर्म[2] । तदायुर्विपाकदायि भवत्विति । ध्यानभावना-
110.18 (8b–3) बलं तु तस्याकर्षकमिति ॥ विपाकोच्छेषं विपाचयत[3] इति । अकालमरणेनापरिसमा-
111.2 (8b–4) प्तफलस्य त्यक्तस्य जन्मान्तरकर्मणो भावनाबलेन विपाकोच्छेषमाकृष्य प्रति-
111.13 (9a–2) संवेदयते ॥ तेषां तादृश इति । तेषां योगिनां पूर्वकर्मजं स्थितिकालावेधमिति ।
पूर्वस्मिञ्जन्मनि कर्म पूर्वकर्म । ततो जातः पूर्वकर्मजः । स्थितिरिन्द्रियमहाभूतानां
प्रवाहः । स्थितेः कालः स्थितिकालः । तस्यावेध आक्षेपः । स्थितिकालावेधस्ताव-
त्संसारक्षणानुबन्धसामर्थ्यमाक्षेपः[4] । तेन ह्यसौ स्थितिकाल आविध्यते । तं पूर्वकर्मजं
111.14 (9a–3) स्थितिकालावेधमिन्द्रियमहाभूतानां व्यावर्तयन्ति योगिनः । अपूर्वं च समाधिज-
मागन्तुकमाक्षिपन्ति ॥

111.17 (9a–5) प्रश्नात्प्रश्नान्तरमुपजायत इति । अथ यदर्हन्भिक्षुरायुःसंस्कारान्स्थापयति तज्जी-
वितेन्द्रियं कस्य विपाक इति[5] अस्मात्प्रश्नात्किमर्थमायुःसंस्कारानधितिष्ठन्तीति
111.18 (9a–6) प्रश्नान्तरं । परहितार्थं शासनस्थित्यर्थं चेति । परहितार्थं बुद्धा भगवन्तः । शा-
112.1 (9a–8) सनस्थित्यर्थमेव श्रावकाः ॥ रोगादिभूतं[6] चात्मभावमिति । रोगगण्डशल्यादिभूतं त्रि-
112.7 (9b–2) दुःखतायोगात् ॥ क्व कस्य चेति । क्वेत्यस्य प्रश्नविसर्जनं मनुष्येष्वेव त्रिषु द्वीपेष्वि-
112.9 (9b–3) ति । कस्येत्यस्य विसर्जनं स्त्रीपुरुषयोरसमयविमुक्तस्यार्हतः प्रान्तकोटिध्यानला-
112.11 (9b–4) भिन इति । तस्य हीति विस्तरः । समाधौ च वशित्वं प्रान्तकोटिकध्यानलाभिनः
तीक्ष्णेन्द्रियत्वात् । क्लेशैश्चानुपस्तब्धा संततिर्निरवशेषक्लेशप्रहाणात् । दृष्टिप्राप्तस्य
यद्यपि समाधौ वशित्वमस्ति । न तु तस्य क्लेशैरनुपस्तब्धा संततिः । समयविमुक्तस्य

---

1 यद्धि MSS. corrected by the Tibetan version of the Kośa-bhāṣyam བདག་གི་····གང་ཡིན་པ་. 2 °स्त NT, त्त C. དེ་. Cf. above 17, 16. 3 °पच्यत All MSS. རྣམ་པར་སྨིན་པར་བྱེད་. 4 MSS. संस्कार°, but Tib. འཁོར་བའི་···. 5 論 三 8ª 7, 8. 6 °गाभिभू° MSS. ནད་ལ་སོགས་པར་གྱུར་པ་.

यद्यपि क्लेशैरनुपस्तब्धा संततिः न तु समाधौ वशित्वम् । असमयविमुक्तस्य तूभयम-
स्ति ॥ बहुवचनमिति । जीवितसंस्कारानिति यद्वचनं । तद्बहुवचनं । कस्मादित्याह । 113.1 (9b–8)
बहूनामिति विस्तरः । बहूनां संतानवर्तिनां जीवितसंस्काराणामुत्सर्जनाधिष्ठा-
नात् । न ह्येकस्य क्षणस्य उत्सर्जने ऽधिष्ठाने वा प्रयोजनमस्ति । प्रवाहेण पर-
कार्या[1]भिनिष्पादनात् । एकस्य च क्षणस्यापीडाकरत्वात् ॥ न च कालान्तरस्थावरमि- 113.4 (9b–9)
ति । कालान्तरस्थानशीलं कालान्तरस्थावरं अक्षणिकं । तच्चैतदायुर्द्रव्यं न भवतीति 113.6 (9b–10)
द्योतनार्थं बहुवचनमित्येके ॥ बहुष्वेव संस्कारेष्विति सौत्रान्तिकानामयं पक्षः ।
एकस्मिन्नपि क्षणे बहवस्ते संस्कारा येष्वायुरिति प्रज्ञप्तिः नैकमायुर्नाम द्रव्यम-
स्ति । ते च संस्काराः पञ्चस्कन्धस्वभावाश्चतुःस्कन्धस्वभावा वा द्रष्टव्याः । अन्यथा 113.6 (10a–1)
हि नैव संस्कारग्रहणमकरिष्यत । एवं तु वक्तव्यमभविष्यत् भगवान् जीवि-
तान्यधिष्ठाय आयूंषि उत्सृष्टवानिति ॥ मरणावशित्वज्ञापनार्थमिति । मरणे वशि- 113.9 (10a–2)
त्वमस्तीति ॥ त्रैमास्यमेव नोर्ध्वमिति । त्रयो मासाः समाहृतास्त्रिमासं । त्रिमा- 113.10 (10a–3)
समेव त्रैमास्यं ॥ अत्र कालाध्वनोरत्यन्तसंयोगे[2] द्वितीया भवति नोर्ध्वं त्रैमास्या-
द्विनेयकार्याभावात् । सुभद्रावसानत्वात् बुद्धकार्यस्य ॥ तस्यापि संपादनार्थमि- 113.11 (10a–4)
ति । प्रतिज्ञातसंपादनार्थम् । अन्यथा वचनमात्रं स्यादिति । [3]कल्पावशेषः कल्प 13.13 (110a–5)
एकः सकलः । कल्पाधिकः कल्पः सातिरेक इत्यर्थः[3] ॥ स्कन्धमरणामारयोरिति । 113.14 (10a–6)

---

1 S. MSS. གཞན་གྱི་དོན་ and Sde-dge edition reads simply: དོན་ ? परार्थ° or अर्थ°

2 Pāṇini 2, 3, 5. 3 . . . 3 Sic MSS. བསྐལ་པ་ལས་ལྷག་པ་ཞེས་བྱ་བ་ལ། བསྐལ་པ་ནི་བསྐལ་པ་གཅིག་རྫངས་པ་ཡིན་ནོ། །བསྐལ་པ་བས་(? ལས་)ལྷག་པ་ནི་བསྐལ་པ་བས་(? ལས་)ལྷག་པ་ཡིན་ཏེ། བསྐལ་པ་བས་(? ལས་)ཐལ་བ་ཞེས་བྱ་བའི་ཐ་ཚིག་གོ། According to Tib. perhaps to read: kalpâvaśeṣa iti. kalpa eka-kalpaḥ sakalaḥ. kalpâvaśeṣaḥ kalpâdhikaḥ. kalpaḥ sâtireka ity arthaḥ. And Tibetan version has here the equivalent of तस्यापि संपादनार्थमिति । प्रतिज्ञातसंपादनार्थम् । अन्यथा वचनमात्रं स्यादिति ॥

चत्वारो माराः । देवपुत्रमारः क्लेशमारः स्कन्धमारः मरणमारश्च । तत्र प्रथमे यामे
113.16 (10a–7) देवपुत्रमारो निर्जितः । द्वितीये यामे दिव्येन चक्षुषा लोकं व्यवलोक्य । तृतीये यामे क्लेशमारो निर्जितः । वैशाल्यां तु त्रैमास्यं जीवितसंस्कारानधिष्ठाय आयुःसंस्कारानुत्सृष्टवान् । स्कन्धमारनिर्जयार्थमुत्सृष्टाः स्कन्धाः । तेषूत्सृष्टेषु मर्तव्यं स्यात् । अतो मरणमारनिर्जयार्थमधिष्ठिता इति वैभाषिकाः ॥ निष्ठितमानुषाङ्गिकं यत्प्रश्नात्प्रश्नान्तरमुपजातं ॥

110.3 (8a–6) द्वेधा[1] द्वादश

इति । द्वेधैव द्वादश एवेत्यवधार्यते ।

110.4 (8a–5) ऋते ऽन्त्यादष्टकाच्

श्रद्धादिकादाज्ञातावीन्द्रियपर्यन्तात् ।

दौर्मनस्याच्च ।

113.20 (10a–9) जीवितेन्द्रियादेकान्तविपाकात् । अन्यानि द्वादशेन्द्रियाणि विपाकश्चाविपाकश्च ॥
114.2 (10a–10) तत्र चक्षुरादीनि पुरुषेन्द्रियावसानानि सप्त स्वप्राप्त्यभिनिर्वृत्तानि औपचयिकानि
114.5 (10b–1) अविपाकः । मनोदुःखसुखमिति विस्तरः । यानि मनआदीनि कुशलाक्लिष्टानि । तानि अविपाकः । यानि च यथायोगमैर्यापथिकशैल्पस्थानिकनैर्माणिकस्वभावानि अव्याकृतानि । तानि अविपाकः । यथायोगमिति विशेषणं ऐर्यापथिकादीनां मानसत्वेन दुःखेन्द्रियासंभवात्सुखसौमनस्ययोश्च क्वचिदसंभवात् । तत्र कामधातावैर्यापथिकं मनइन्द्रियं तत्संप्रयुक्ते च सौमनस्योपेक्षेन्द्रिये अविपाकः । रूपधातावैर्यापथिकं मनइन्द्रियमविपाकः । वेदनेन्द्रियं च तत्संप्रयुक्तं यथाभूमि । नैर्माणिकं पञ्चभूमिकं । तत्र

---

1 द्वेषो MSS. གཉིས་.

चोपेक्षेन्द्रियमेवाविपाकः । ऐर्यापथिकशैल्पस्थानिकनैर्माणिकानि नित्यमुपेक्षेन्द्रियेण संप्रयुक्तानीति भदन्तानन्तवर्मा[1] । **शेषाणि विपाक** इति । कुशलक्लिष्टैर्यापथिकशैल्पस्थानिकनैर्माणिकस्वभावेभ्यो मनइन्द्रियादिभ्यो ऽन्यानि मनइन्द्रियादीनि विपाकजानि विपाकः । **शेषाण्यविपाक इति सिद्धमिति** । जीवितेन्द्रियं द्वादश चक्षुरादीनि हित्वा तदवधारणादेव शेषाण्यविपाक इति सिद्धं । कतमानि पुनस्तानि । दौर्मनस्येन्द्रियं न विपाकः कुशलाकुशलत्वात् । तथा हि वक्ष्यति ।

तत्रैकं सविपाकम्

इति[2] ॥ श्रद्धादि

अष्टकं कुशलम्

इति[3] अविपाकः ।

विपाको ऽव्याकृतो धर्मः सत्त्वाख्य

इति[4] विपाकलक्षणाभावात् ॥

**यदि दौर्मनस्येन्द्रियं न विपाक** इति । अनेनागमविरोधं दर्शयति ॥ **संप्रयोगवेद-** 114.13 (10b–4)
**नीयतामधिकृत्येति** । वेदनीयं वेदना । दौर्मनस्यं वेदनीयमस्मिन्निति दौर्मनस्यवेदनीयं
कर्म[5] ॥ **सौमनस्योपेक्षावेदनीये अपीति** । संप्रयोगमात्रवचनाद्दौर्मनस्यवत् सौमनस्योपेक्षे 114.17 (10b–6)
अपि न विपाकः प्राप्नुत इति परस्याभिप्रायः ॥ **संप्रयोगे ऽपि न दोषो विपाके** 114.19 (10b–7)
**ऽपीति** । सौमनस्यं वेदनीयं अस्मिन्सौमनस्यवेदनीयं कर्म । तथा सौमनस्यं विपाकत्वेन वेदनीयमस्य सौमनस्यवेदनीयं कर्मेति ॥ **अगत्या ह्येतदेवं गम्येतेति** । यदि दौर्मनस्यं युक्त्या परिच्छिन्नं न विपाक इति । तत एवमगत्याख्यायेत संप्रयोगवेदनीयतामधिकृ-
त्योक्तमिति । तेनाह । **का पुनरत्र युक्तिर्दौर्मनस्यं न विपाक** इति । अथ वा अग- 115.1 (10b–8)
त्या ह्येतदेवं गम्येत क्वचित्संप्रयोगवेदनीयता क्वचिद्विपाकवेदनीयतेति । ब्रूयास्त्वं सर्व-

---

1 भदंतानंतधर्मा MSS. བཙུན་པ་གོ་ཆ་མཐའ་ཡས་. 2 Kārikā II, 11a.

3 Kārikā II, 12a. 4 Kārikā II, 58ab. 5 कः MSS. ལས་སོ་

त्रैव तर्हि संप्रयोगवेदनीयतेति। अत एतदत्राभिप्रायमभिसमीत्याह। का पुनरत्र युक्ति-
र्दौर्मनस्यं न विपाक इति। दौर्मनस्यं हीति। अनिष्टचिन्तनादिकैः परिकल्पविशेषै-
115.4 (10b–9) रुत्पाद्यते च [व्युत्पाद्यते च][1] व्युपशाम्यते च। सौमनस्यमप्येवमिति। परिकल्प-
115.10 (11a–3) विशेषैरिष्टचिन्तनादिभिरुत्पाद्यते च व्युपशाम्यते च॥ वीतरागादीनां तर्हीति।
यस्माद्वीतरागादीनां दौर्मनस्यं व्यावर्तते। न हि चक्षुरादिको विपाकभूतो वीतरागा-
दीनां व्यावर्तते। दौर्मनस्यं तु व्यावर्तते। वचनात् दौर्मनस्येन कामवीतरागो ऽसम-
न्वागत इति[2]। सूत्रे ऽप्युक्तं। अवीतरागस्य द्विशल्या वेदनोक्ता कायिकं दुःखं प्रतिसं-
वेदयते चैतसिकं च दौर्मनस्यमिति वचनात्। वीतरागस्य च एकशल्या कायिकमेव
115.12 (11a–4) दुःखं प्रतिसंवेदयत इति॥ सौमनस्यमप्येषामिति विस्तरः। वीतरागाणामव्याकृतं
विपाकरूपं सौमनस्यं कीदृशं स्यात्। समापत्तिसंगृहीतं तेषां सौमनस्यं संभवति। तच्च
115.13 (11a–5) कुशलत्वान्न विपाकः। अतो वक्तव्यं कीदृशं तेषां सौमनस्यं विपाक इति। यादृशं
115.14 (11a–6) तादृशमस्त्विति। अपरिच्छिद्यमानमपि तदस्त्येवेति दर्शयति। तस्यास्ति विपाकाव-
काशो न दौर्मनस्यस्य। सर्वथाप्यसमुदाचारात्समापत्त्यवस्थायामप्यसमापत्त्यवस्था-
115.16, 19, (11a–7, 8) यामपीत्यतो न विपाक इति सिद्धं॥ मनइन्द्रियमुभयोरुभयस्येति। उभयोः सुग-
तिदुर्गत्योः। उभयस्य कुशलाकुशलस्य। विपाक इत्यधिकारः॥ इदमुत्सृष्टं जीवि-
तेन्द्रियाष्टमानि सुगतौ कुशलस्य विपाक इति[3]। तत्र कथमुभयव्यञ्जनं असाधुसम्मतं
116.3 (11a–10) कुशलस्य विपाक इत्याह। सुगतावुभयव्यञ्जनस्याकुशलेन तत्स्थानप्रतिलम्भ
इति। स्थानमस्य अष्टमतो ऽस्याकुशलेन प्रतिलम्भो विप्रयुक्तो धर्मः। उभयं तु
व्यञ्जनं कुशलस्यैव विपाक इत्यभिप्रायः॥

110.5 (11b–3) **तत्त्वेकं सविपाकम्**

116.8 (11b–5) इति। तदेकं सविपाकमेवेत्यर्थः। तेनाह। तुशब्द एवकारार्थो भिन्नक्रमश्चेति। भि-

---

1 Sic MSS. To be left out as Tib. 2 論 三 $17^{a}$ 6. 3 論 三 $11^{a}$ 7.

नस्थान इत्यर्थः। तदेकं सविपाकं विति हि क्रमो न भिन्नः स्यात्। श्लोकबन्धानुगुण्येन
त्वेवमुक्तं। न हि तदव्याकृतमिति। सविपाकमेवेत्यवधारणे युक्तिं दर्शयति। द्वे हि 116.10 (11b–7)
वस्तुनी अविपाके इष्येते[1]। अव्याकृतमनास्रवं च। विकल्पविशेषोत्पाद्यत्वान्न तद-
व्याकृतं। असमाहितत्वाच्च नानास्रवं। अव्याकृतं हि पूतिबीजवन्न विपाकदानाय
समर्थं। अनास्रवं तु तृष्णानभिष्यन्दितत्वान्नालं विपाकदानायानभिष्यन्दितसारबीजवत्।
पारिशेष्यादकुशलं वा तद्भवेत्कुशलसास्रवं वा। अतः सविपाकमेव नास्त्यविपाकं
दौर्मनस्यं ॥ १० ॥

## दश द्विधा 110.6 (11b–1)

इति। दशैव द्विधा। द्विधैव च दशेत्यवधारणं। द्विधेति सविपाकाविपाकानि।

## मनो ऽन्यवित्तिश्रद्धादीनि च 116.15 (11b–8)

इति। मनश्च अन्यवित्तयश्च श्रद्धादीनि चेति। वित्तिर्वेदना। अन्यग्रहणेन दौर्मनस्य- 117.1 (11b–10)
वर्जितं गृह्यते दौर्मनस्यस्योक्तत्वात्। श्रद्धादीनि श्रद्धावीर्यस्मृतिसमाधिप्रज्ञाः।
गृह्यन्त इति अधिकृतं॥ अन्यदविपाकमिति। यथोक्तदौर्मनस्याद्यवधारणात् जीवितं 117.11 (12a–2)
रूपाणि च सप्तेन्द्रियाणि आज्ञास्यामीन्द्रियादीनि च त्रीण्यविपाकानीति सिद्धं।
अव्याकृतत्वात् अनास्रवत्वाच्च यथाक्रमं॥

## अष्टकं कुशलम् 116.16 (12a–5)

इत्यष्टकं कुशलमेवेत्यवधारणं॥

## द्विधा दौर्मनस्यम्

इति। द्विधैव दौर्मनस्यं दौर्मनस्यमेव च द्विधेति अवधारणं। द्विधेति कुशलं चाकु- 117.15 (12a–8)
शलं च। अन्यदपि द्वैधमस्ति। कुशलं चाव्याकृतं च। अकुशलं चाव्याकृतं चेति।

---

1 इष्यते MSS.

तत्कथमिदमवधार्यते कुशलं चाकुशलं चेति । व्याख्यानतो विशेषप्रतिपत्तिः । अथ वा दौर्मनस्यं सविपाकमेवेति निर्धारितं । तस्मादिदमेव द्वैधं भवति नान्यत् ॥

116.17 (12a–5) **अन्या च वित्तिर्**

इति । दौर्मनस्यवर्ज्यं वेदनाचतुष्टयं तस्योक्तत्वात् ।

**त्रेधा**[1]

इति । कुशलाकुशलाव्याकृतानि । त्रयः प्रकारास्त्रेधा । द्वित्र्योश्च धमुञ् एधा-च्चेति[2] त्रेधेत्येधाशब्दव्युत्पत्तिः । अलोभादिसंप्रयुक्तानि कुशलानि । लोभादिसंप्रयुक्तानि अकुशलानि । अतो ऽन्यान्यव्याकृतानि ।

**अन्यदेकधा**

117.18 (12a–9) इति । **जीविताष्टममन्यदेकधैवे**त्यवधार्यते । **अव्याकृतमेवे**त्यर्थः । एतदर्थं च पुनरस्य करणं । अन्यथा ह्यकुशलमेव कुशलाव्याकृतमेवाकुशलाव्याकृतमेव वा तत्संभाव्यते । तस्मादभीप्सितैकधात्वप्रसिद्ध्यर्थं पुनरुच्यते । यस्यैकधात्वं संभवति तद्भवति । किं च संभवत्यव्याकृतत्वमिति ॥ ११ ॥

118.1 (12b–1) **कामाप्तममलं हित्वा**

118.7 (12b–3) इति । अमलमेव हित्वा कामाप्तं भवति । **तद्योगाप्रतिसंयुक्तमेवे**[3]ति अधातुपतितमेवेत्यर्थः ॥

118.2, 3 (12b–1) **रूपाप्तं स्त्रीपुमिन्द्रिये**

---

1 त्रिधेति MSS. 2 Simply एधा MSS. See Pāṇini 5, 3, 45 & 46.

3 तेद्यप्र° N, तद्यप्रतिसंप्रयु C, तध्यप्रतिसंप्रयु T. དེ་ཏེ་དེ་ལྡན་པ་མ་ཡིན་པ་.

इति विस्तरः। स्त्री च पुमांश्च स्त्रीपुमांसौ। समासान्ते[1] विधिरनित्य इति परिभाषया समासान्तो न भवति। तयोरिन्द्रिये स्त्रीपुमिन्द्रिये ॥

दुःखे च

इति। दुःखवेदनास्वभावे इन्द्रिये दुःखदौर्मनस्ये इत्यर्थः। ते स्त्रीपुंमिन्द्रिये दुःखदौर्मनस्ये अमलं चेत्यनुवर्तमानं हित्वा। शेषं रूपाप्तमिन्द्रियं भवति ॥ **क्वोच्यत** इति पृष्टे 118.13 (12b—7)
सूत्रं दर्शयति। **अस्थानमनवकाश** इति विस्तरः। अत्र सूत्र इत्यभिप्रायः ॥ **अन्यः** 118.16 (12b—8)
**पुरुषभावो ऽस्ति यः कामधातौ पुरुषाणां भवतीति**। स्तनादिसंस्थानस्वराचारा-
न्यथात्वं ॥ **दुःखेन्द्रियं नास्तीति आश्रयस्याच्छत्वात्** तदभिघातजं नास्ति। **अकुश-** 118.17 (12b—9)
**लाभावाच्च** विपाकजं च नास्ति ॥ **दौर्मनस्येन्द्रियं नास्ति शमथस्निग्धसंतानत्वा-** 119.1 (12b—10)
**दिति**। यस्माच्च शमथेन समाधिना प्रतिघविगमात् रौद्र्यं संताने नास्ति। तस्माद्दौर्मनस्येन्द्रियं नास्ति। **आघातवस्त्वभावाच्चेति**। आघातः कोपः। तस्य वस्तु विषयः आघातवस्तु। नव चाघातवस्तूनि। अनर्थं मे अकार्षीत् करोति करिष्यति चेत्याघातवस्तुत्रयं। मित्रस्य मे अनर्थमकार्षीत् करोति करिष्यति अपरमाघातवस्तुत्रयं। अमित्रस्य मे अर्थमकार्षीत् करोति करिष्यति चेत्यपरमाघातवस्तुत्रयम्। इत्येषां नवानामाघातवस्तूनामभावात् विषयकृतमपि दौर्मनस्यं नास्ति। न केवलं हेतुकृतं नास्तीति दर्शयति। हेतुकृतं हि तद्यत्स्वसंतानप्रतिघकृतं। प्रत्ययकृतं च तद्यन्नवाघातवस्तुकृतमिति ॥

सुखे चापोह्य रूपि च 118.4 (12b—2)

इति। चशब्देन पूर्वोक्तमनुकृष्यते। तेनाह। **स्त्रीपुमिन्द्रिये दुःखे च अमलं च** 119.3 (13a—1)
**हित्वेति वर्तत** इति।

सुखे

इति। सुखवेदनास्वभावे सुखसौमनस्ययेन्द्रिये। रूपीन्द्रियं चक्षुरादि ॥ १२ ॥

---

1 °न्तो MSS.

119.13 (13a—7) **वित्तित्रयं सुखसौमनस्योपेक्षा** इति । सुखेन्द्रियं यत्तृतीयध्यानभूमिकं दर्शनहेयानुशयसंप्रयुक्तं तद्दर्शनहेयं तत्रैव । अतो ऽन्यत्सास्रवं पञ्चविज्ञानकायिकं च कामावचरं प्रथमध्यानभूमिकं च त्रिविज्ञानकायिकं भावनाप्रहातव्यं । अनास्रवं तु सुखेन्द्रियमहेयं । सौमनस्यं दर्शनहेयसंप्रयुक्तं दर्शनहेयं । अतो ऽन्यत्सास्रवं भावनाहेयं । अनास्रवमहेयं । उपेक्षेन्द्रियं तु सर्वगमिति सुगमं ॥

119.16 (13a—8) **द्विहेया दुर्मनस्कता**[1]

इति । दौर्मनस्ययोगाद्दुर्मनस्कः । तद्भावो दुर्मनस्कता । दौर्मनस्यमित्यर्थः । यस्य गुणस्य हि भावाद्द्रव्ये शब्दनिवेशः । तदभिधाने त्वतलाविति[2] लक्षणात् । तद्दर्शनहेयसंप्रयुक्तं दर्शनहेयम् । अतो ऽन्यद्भावनाहेयं । नाहेयं असमाहितत्वात् ॥ १३ ॥

120.9 (13b—3) **कामेष्वादौ विपाकौ द्वे लभ्येते**

इति । कामप्रधानत्वात् कामधातुः काम इति निर्दिश्यत इति[3] वक्ष्यते । अण्डजजरायुजसंस्वेदजैः सत्त्वैः कामधातावादौ प्रथमतो द्वे इन्द्रिये विपाकात्मके लभ्येते **कायेन्द्रियं जीवितेन्द्रियं च** । कस्मात् । प्रतिसंधिकाले मनउपेक्षेन्द्रिययोरवश्यं
120.13 (13b—5) क्लिष्टत्वात् ।

उपपत्तिभवः क्लिष्टः सर्वक्लेशैः स्वभूमिकैर्

इति[4] वचनात् । चक्षुरादीनां च तस्यामवस्थायामविद्यमानत्वात् ॥

120.10 (13b—8) **नोपपादुकैर्**

इति अपवादः । अविशेषितत्वाद्धि उपपादुकैरपि तथैव द्वे एव लभ्येयातामिति

---

1 °स्कते° MSS. ཡིད་མི་བདེ་.  2 तल् denotes a Taddhita-suffix ta (tā f.).

3 論 三 14ᵃ 1.  4 Kārikā III, 38ᵇ ᶜ.

प्रसङ्गः। तस्मादयं प्रतिषेधः। किमुपपादुकैस्ते द्वे नैव लभ्येते। लभ्येते न तु
द्वे एव। तेनाह

तैः षड्वा

इति विस्तरः। **अव्यञ्जना भवन्ति** अविद्यमानस्त्रीपुरुषेन्द्रियाः **यथा प्राथमक-** 121.2 (13b–7)
**ल्पिका** इति।

युगाद्युत्पन्नाः प्रागासन् रूपिवत्सत्त्वा

इति[1] वचनात्। **कतमानि षट्। चक्षुरादीनि** पञ्च **जीवितं** च षष्ठमिति॥ **यथा** 121.5 (13b–9)
**देवादिष्विति**। आदिशब्देन नारकादयो ऽपि गृह्यन्ते। अन्तराभवोपपत्तिभवप्रतिसंध्य-
वस्थायां तानि प्रथमतो लभ्यन्ते॥ **किं पुनरुभयव्यञ्जना अप्युपपादुका भवन्तीति**। 121.6 (13b–10)
निह्नीनोभयव्यञ्जनोत्पत्तिः। विशिष्टा चोपपादुका योनिः। कथमनयोः समायोग इति
चोदनाभिप्रायः॥ **रूपप्रधानत्वाद्रूपाणीति रूपधातुर्निर्दिश्यते**। रूपप्रधानत्वादिति 121.11 (14a–1)
रूपाणां स्वच्छत्वात् भास्वरत्वादित्यर्थः। अथ वा न कामगुणप्रधानो रूपधातुः। किं
तर्हि रूपमात्रप्रधानः। नाप्यारूप्यधातुवत् अरूपप्रधान इति। **सूत्रे** ऽप्युक्तमि- 121.12 (14a–2)
ति। सूत्रे ऽप्येवं दृष्टं न मदुपज्ञमेवैतदिति दर्शयति। ये ऽपि ते **शान्ता वि-**
**मोक्षा अतिक्रम्य रूपाण्यारूप्याः**। ते ऽप्यनित्या अध्रुवा अनाश्वासिका विपरि-
णामधर्माण इति विस्तरः। **अव्यञ्जनैरुपपादुकैरिति** प्राथमकल्पिकैः॥ **समाप-** 121.16 (14a–3, 4)
**त्तितश्च परत्वादिति**। यस्मात्पूर्वं रूपसमापत्तिः पश्चादारूप्यसमापत्तिः। तस्माद्रूप-
धातोरुत्तर आरूप्यधातुः। **उपपत्तितश्च प्राधानतरत्वादिति**। यस्माच्चोपपत्तितः
प्रधानतरः रूपधातोरारूप्यधातुः। बहूनि कल्पसहस्राणि तत्रातिप्रशान्तो विपा-
को भवति। अतो ऽप्यसावुत्तरः। न तूपपत्तिदेशतः।

आरूप्यधातुरस्थान

इति[2] वचनात्॥ १४॥

---

1 Kārikā III, 96ᵃ. 2 K. III, 3ᵃ.

122.5 (14a–7) निरोधयत्युपरमन्

122.7 (14a–9) इति । म्रियमाणा आरूप्यधातावेतान्येव त्रीणीन्द्रियाणि निरोधयति । सापवादं चैतद्वेदितव्यं ।

शुभे सर्वत्र पञ्च च

इति[1] वचनात् ॥

122.5 (14a–7) रूपे ऽष्टाव्

122.9 (14a–10) इति । रूपधातौ अष्टावेतान्येव । सह पञ्चभिश्चक्षुरादिभिर्निरोधयेत् । सकृत्समग्रे-
122.10 (14b–1) न्द्रियमरणात् । अत एवाह । सर्वे ह्युपपादुकाः समग्रेन्द्रिया उपपद्यन्ते म्रियन्ते चेति ॥

122.6 (14a–7) कामे दश नवाष्ट वा

122.12 (14b–2) इति । उभयव्यञ्जनो दशेन्द्रियाणि निरोधयति यदि समग्रपञ्चेन्द्रियो भवति ।
122.13 (14b–3, 4) एकव्यञ्जनो नव । अव्यञ्जनो ऽष्टौ । यदि तु विकलेन्द्रियो ऽन्धो बधिरो वा भवति । तदा तदिन्द्रियं परिहार्यं ॥ १५ ॥

सापवादं चैतत्सर्वकामधातावेव वेदितव्यं । तदपवादमाह ।

122.16 (14a–8) क्रममृत्योस्तु चत्वारि

123.5 (14b–6) इति ॥ न ह्येषां पृथग्निरोध इति । न ह्येषां कामधातावन्योन्यं विरहय्य निरोधो ऽस्तीत्यभिप्रायः ॥

122.17 (14a–8) शुभे सर्वत्र पञ्च च

इति । सर्वस्य पूर्वोक्तस्य मरणविधेर्

निरोधयत्युपरमनारूप्ये जीवितं मन

1 Kārikā II, 16$^{d}$.

इति[1] एवमादेरपवादः । त्रिविधं हि मरणचित्तं संभवति । क्लिष्टमव्याकृतं कुशलं
च । तत्र क्लिष्टाव्याकृतचित्तस्योत्सर्गन्यायेन मरणविधिरुक्तः । **कुशलचित्तस्य तु** 123.8 (14b—7)
**मरणे श्रद्धादयः पञ्चाधिकाः प्रक्षेप्तव्याः । एषां हि श्रद्धादीनां कुशले चेतसि**
**अवश्यं भावः** । तेन यत्र त्रीण्युक्तानि **तत्राष्टौ** । यत्राष्टौ तत्र **त्रयोदश** । यत्र 123.10 (14b—9)
दश तत्र पञ्चदश । यत्र नव तत्र चतुर्दश[2] । यत्र पुनरष्टौ तत्र त्रयोदश । यत्र
चत्वारि तत्र नवेति **विस्तरेण गणनीयं** । रूपारूप्यधात्वोर्नास्ति क्रममरणं ॥ 123.12 (14b—10)

**इन्द्रियप्रकरणे सर्व इन्द्रियधर्मा विचार्यन्त** इति । इन्द्रियप्रकरणे इह क्रियमाणे सर्व इन्द्रियधर्मा इन्द्रियावस्थाविशेषाः कारित्रविशेषा वा विचार्यन्त इत्येके व्याचक्षते । अपरे तु व्याचक्षते । इन्द्रियप्रकरणे इन्द्रियस्कन्धके[3] सर्व इन्द्रियधर्मा अवस्थाविशेषाः कारित्रविशेषा वा विचार्यन्ते । तेनेहापि ते विचार्यन्ते । तत्प्रत्यासत्त्वात् अस्य शास्त्रस्येत्यभिप्रायः ॥

नवाप्तिरन्त्यफलयोर् 123.1 (15a—2)

इति । नवभिरिन्द्रियैराप्तिर्नवाप्तिः । कस्य । अन्त्यफलयोः । अन्ते[4] भवे अन्त्ये । अन्त्ये फले
अन्त्यफले । तयोः । **के पुनरन्त्ये । स्रोतआपत्तिफलं अर्हत्त्वफलं च** । यथा दण्डस्य 123.16 (15a—4)
द्वावन्तौ भवतः । एवं पंक्त्यवस्थितानां चतुर्णां फलानां स्रोतआपत्तिफलं अर्हत्त्वफलं चान्ते
भवतः । **सकृदागामिफलं अनागामिफलं च मध्ये भवतः** । तयोरन्त्ययोः फलयोर्नव- 123.17 (15a—5)
भिरेवेन्द्रियैः प्राप्तिः । कतमैर्नवभिरित्याह । **श्रद्धादिभिराज्ञातावीन्द्रियवर्ज्यैर्मनउपे-** 123.19 (15a—6)
**क्षेन्द्रियाभ्यां चेति नवभिरिति** ॥ तत्रैवमभिसमयक्रमः । दुःखे धर्मज्ञानक्षान्तिः । दुःखे धर्मज्ञानं । दुःखेऽन्वयज्ञानक्षान्तिः । दुःखेऽन्वयज्ञानं । समुदये धर्मज्ञानक्षान्तिः । समुदये धर्मज्ञानं । समुदयेऽन्वयज्ञानक्षान्तिः । समुदयेऽन्वयज्ञानं । निरोधे धर्मज्ञानक्षान्तिः । निरोधे

---

1 Kārikā II, 15$^{ab}$. 2 °शी MSS. 3 發智論根蘊 (秋五 63$^{a}$ 9 et seq.). 4 अन्त्ये NT.

धर्मज्ञानं । निरोधेऽन्वयज्ञानक्षान्तिः । निरोधेऽन्वयज्ञानं । मार्गे धर्मज्ञानक्षान्तिः । मार्गे धर्मज्ञानं । मार्गे ऽन्वयज्ञानक्षान्तिः । मार्गेऽन्वयज्ञानमिति षोडश क्षणा अभिसमय इत्युच्यते । तत्र दुःखे धर्मज्ञानक्षान्तिर्यावन्मार्गेऽन्वयज्ञानक्षान्तिरिति पञ्चदश क्षणा दर्शनमार्गः ।

अदृष्टदृष्टेर्दृङ्मार्गस्तत्र पञ्चदश क्षणा

इति[1] वचनात् । तच्चाज्ञास्यामीन्द्रियमित्युच्यते । मार्गेऽन्वयज्ञानं तु षोडशः स भावनामार्गः । ततः प्रभृत्या वज्रोपमसमाधेर्यावाननास्रवो मार्गः सर्वो ऽसौ भावनामार्गः । तच्चाज्ञेन्द्रियमित्युच्यते । क्षयज्ञानात्प्रभृति सर्वो ऽनास्रवो मार्गो ऽशैक्षमार्गः । तच्चाज्ञातावीन्द्रियमित्युच्यते । तत्र स्रोतआपत्तिफलं मार्गेऽन्वयज्ञानक्षान्त्यवस्थायां प्राप्यते । श्रद्धादीनि चात्र पञ्चेन्द्रियाणि अवश्यं भवन्ति[2] । तस्या अवस्थायाः कुशलत्वात् । आज्ञास्यामीन्द्रियस्वभावा चासौ मार्गेऽन्वयज्ञानक्षान्तिर्वर्तमाना । मनइन्द्रियं च तत्संप्रयुक्तं[3] भवति । उपेक्षेन्द्रियं चावश्यं अनागम्याश्रयत्वात्[4] । अनागम्यस्य च उपेक्षेन्द्रियसंप्रयुक्तत्वात् । मार्गेऽन्वयज्ञानं तु अस्यामवस्थायामाज्ञेन्द्रियस्वभावं उत्पादाभिमुखं वर्तते । तेन श्रद्धादिभिः पञ्चभिराज्ञास्यामीन्द्रियेणाज्ञेन्द्रियेण मनउपेक्षेन्द्रियाभ्यां चेति तत्फलं नवभिः प्राप्यते ॥

124.4 (15a–7) **उभाभ्यां हि तस्य प्राप्तिरिति** । आनन्तर्यमार्गेणाज्ञास्यामीन्द्रियस्वभावेन विमुक्ति-
124.5 (15a–8) मार्गेण चाज्ञेन्द्रियस्वभावेन[5] तस्य प्राप्तिः । **विसंयोगप्राप्तेरावाहकसंनिश्रयत्वात् यथाक्रमं** । तस्या विसंयोगप्राप्तेरानन्तर्यमार्गस्यावाहकत्वात् जनकत्वात् । विमुक्तिमार्गस्य च तस्या सन्निश्रयत्वात् । आधारत्वादित्यर्थः । द्वाभ्यां चौरनिष्कासनकपाटपिधानवत् । यथा हि द्वयोर्मनुष्ययोः[6] एकेन चौरो निष्कास्यते । द्वितीयेनास्य कपाटं पिधीयते । तथानन्तर्यमार्गेण विसंयोगप्राप्तिरावाह्यते । क्लेशप्राप्तिमादाय निरोधात् । विमु-

---

1 Kārikā VI, 31$^{ab}$. 2 °वन्तीति MSS. But Tib. has no iti. 3 संयुक्तं MSS. མཚུངས་པར་ལྡན་པ་. 4 समागम्य° MSS. མི་ལྕོགས་པ་མེད་པ་. 5 वा° N. དང་. 6 °र्मत्तरयोः N, °र्नत्तर्य्ययोः T. མི་གཉིས་ལས་.

क्तिमार्गेणाधार्यते। विसंयोगप्राप्तिसन्धोत्पादात्॥ **अर्हत्त्वस्य पुनः श्रद्धादिभिराज्ञास्या-**
**मीन्द्रियवर्ज्यैरिति** । वज्रोपमसमाध्यवस्थायामर्हत्त्वफलं प्राप्यते। **श्रद्धादीनि मनइ-** 124.6 (15a–9)
**न्द्रियं** च पूर्ववत्। वज्रोपमसमाधिकलापस्तस्यामवस्थायामानन्तर्यमार्ग आज्ञेन्द्रियस्वभावो
वर्तमानः। **सुखसौमनस्योपेक्षेन्द्रियाणां चान्यतमत्**। यदि तृतीयं ध्यानं निश्रित्यार्हत्त्वं
प्राप्यते सुखेन्द्रियं तत्र वर्तमानं। अथ प्रथमं द्वितीयं ध्यानं निश्रित्य तत्र सौमनस्येन्द्रियं।
अथानागम्यध्यानान्तरचतुर्थध्यानाकाशविज्ञानाकिंचन्यायतनानां अन्यतमं निश्रित्य
तत्रोपेक्षेन्द्रियं वर्तमानं। नवज्ञानकलापस्तु अस्यामवस्थायां विमुक्तिमार्ग आज्ञातावी-
न्द्रियस्वभाव उत्पादाभिमुखो भवति। तेन श्रद्धादिभिः पञ्चभिराज्ञेन्द्रियेणाज्ञातावीन्द्रियेण
मनइन्द्रियेण सुखसौमनस्योपेक्षेन्द्रियाणां चान्यतमेनेति। तत्फलं **नवभिः प्राप्यते**। 124.9 (15a–10)
आनन्तर्यविमुक्तिमार्गाभ्यां तत्प्राप्तिरिति पूर्ववद्व्याख्यानं॥

**सप्ताष्टनवभिर्द्वयोः** । 123.2 (15a–2)

प्राप्तिरिति वाक्यशेषः॥ **प्रत्येकमिति विस्तरः**। सकृदागामिफलस्य **सप्ताभिरष्टाभि-** 124.10 (15b–2)
**र्नवभिर्वा प्राप्तिः**। एवमनागामिफलस्य। तत्प्रतिपादयन्नाह। **सकृदागामिफलं** 124.12 (15b–3)
**तावद्व्यानुपूर्वकः प्राप्नोति**। स च[1] **लौकिकेन मार्गेणेति**। लौकिको मार्गः
शान्ताद्युदाराद्याकारः।

शान्ताद्युदाराद्याकारा उत्तराधरगोचरा

इति[2] वचनात्। तेनोत्तरां भूमिं शान्ततः प्रणीततः निःसरणतश्चेह योगी पश्यति।
अधरामौदारिकतो दुःखिलतः स्थूलभित्तिकतश्च पश्यति। स चायं चतुःप्रकारो वर्ण्यते।
प्रयोगमार्ग आनन्तर्यमार्गो विमुक्तिमार्गो विशेषमार्गश्च। तत्र प्रयोगमार्गो यत आनन्तर्य-
मार्ग उत्पद्यते। स पुनर्येन क्लेशान्प्रजहाति। विमुक्तिमार्गोऽप्यानन्तर्यमार्गादनन्तरमुत्प-

---

1 °र्वं C. དེ་ཡང་.   2 Kārikā VI, $50^{bcd}$.

ष्यते। क्लेशप्रहाणप्राप्तेराधारकः। विशेषमार्गस्ततत उच्चं विशिष्टो मार्गः। तेन मार्गेण नव-
प्रकाराः क्लेशाः प्रहेयाः। अधिमात्राधिमात्रो ऽधिमात्रमध्यो ऽधिमात्रमृदुः मध्याधिमात्रो
मध्यमध्यो मध्यमृदुः मृद्वधिमात्रो मृदुमध्यो मृदुमृदुश्चेति। तद्यदि पृथग्जनः प्रजहाति
दर्शनभावनाहेयान् क्लेशान्मिश्रीकृत्य। तेन मृदुमध्याधिमात्रादिभेदेन नवधा कृत्वा प्रज-
हाति। मृदुमृदुभ्यामानन्तर्यविमुक्तिमार्गाभ्यामधिमात्राधिमात्रं क्लेशप्रकारं प्रजहाति।
एवं यावदधिमात्राधिमात्राभ्यामानन्तर्यविमुक्तिमार्गाभ्यां मृदुमृदुक्लेशप्रकारं प्रजहाति।
आर्यस्तु भावनाहेयानेव क्लेशांस्तथैव नवधा कृत्वा प्रजहाति। दर्शनहेयानां दर्शनमार्गेण
प्राक्प्रहीणत्वात्। लोकोत्तरस्तु भावनामार्गस्तथैव षोडशाकारः अनित्याद्याकारभेदात्।
स चापि तथैव प्रयोगादिमार्गभेदाच्चतुर्भेदः। इहापि मृदुमृदुभ्यामानन्तर्यविमुक्तिमार्गा-
भ्यामधिमात्राधिमात्रं क्लेशप्रकारं प्रजहाति। एवं यावदधिमात्राधिमात्राभ्यामानन्तर्य-
विमुक्तिमार्गाभ्यां मृदुमृदुक्लेशप्रकारं प्रजहाति। एष लौकिकलोकोत्तरयोर्मार्गयोर्दि-
ङ्मात्रनिर्देशः। तत्सकृदागामिफलमानुपूर्वकेण वा लभ्येत भूयोवीतरागेण वा। तत्रानुपू-
र्विको यः स्रोतआपत्तिफलं प्राप्य क्रमात्सकृदागामिफलं प्राप्नोति। कश्चासौ। यः सक-
लबन्धन एकप्रकाराद्युपलिखितो वा यदि न षष्ठप्रकारोपलिखितो नियाममवक्राम-
ति। षोडशे चित्तक्षणे स स्रोतआपन्नो भवति। स भावनाहेयस्यैकस्य यावत्षष्ठस्यैव वा
प्रकारस्य प्रहाणाय शमथचरितत्वात् लौकिकमपि मार्गमुत्पादयति। स षष्ठप्रकारे
124.13(15b—3) प्रहीणे सकृदागामिफलं प्राप्नोति। **तस्य फलस्य सप्तभिरिन्द्रियैः प्राप्तिः। श्रद्धादि-**
**भिः पञ्चभिर्मनइन्द्रियेण उपेक्षेन्द्रियेण च** सप्तमेनानागम्यनिश्रयत्वात्[1]। **अथ लो-**
124.14(15b—4) **कोत्तरेण मार्गेण तस्याष्टाभिरिन्द्रियैः प्राप्तिः। तैरेवाज्ञेन्द्रियेण चाष्टमेन।** तान्येव
124.16(15b—5) हि श्रद्धादीनि सप्तेन्द्रियाणि आज्ञेन्द्रियाख्यां लभन्ते। अनास्रवत्वात्। **अथ भूयोवीतराग**
इति। यो लौकिकेन मार्गेण पृथग्जनावस्थायां षट्प्रकारोपलिखितो ऽभूत्। स भूयोवीत-
राग इत्युच्यते। भूयसा प्रकारेण वीतराग इति कृत्वा। स यदि सकृदागामिफलं **प्राप्नो-**

---

1 °निःश्रयत्वात् MSS. རྟེན་པ་ཡིན་པའི་ཕྱིར་.

ति। कथं स[1] प्राप्नोति इति। अभिसमयक्रमेण पूर्वोक्तेन मार्गेऽन्वयज्ञानावस्थायां[2] प्राप्नोति।
तस्य **नवभिर्यथैव स्रोतआपत्तिफलस्य**। श्रद्धादिभिराज्ञातावीन्द्रियवर्ज्यैः। मन-
उपेक्षेन्द्रियाभ्यां चेति पूर्ववत् व्याख्यानं। अयं हि स्रोतआपत्तिफलं अप्राप्यैव षोडशे
क्षणे सकृदागामी भवति। **अनागामिफलं यथानुपूर्वकः प्राप्नोतीति**। इहानुपूर्वको यः 124.19 (15b–6)
स्रोतआपत्तिफलं सकृदागामिफलं च प्राप्य अनागामिफलं प्राप्नोति। यो वा भूयोवी-
तरागो भूत्वा स्रोतआपत्तिफलमलब्ध्वैव सकृदागामिफलमेव च लब्ध्वानागामिफलं प्रा-
प्नोति। स च **यदि लौकिकेन मार्गेण** प्राप्नोति। **तस्य सप्तभिरिन्द्रियैः प्राप्तिः**।
**यथा सकृदागामिफलस्या**नुपूर्विकीयस्येत्यभिप्रेतं। श्रद्धादिभिः पञ्चभिर्मनउपेक्षे- 125.1 (15b–7)
न्द्रियाभ्यां चेत्यर्थः॥ **अथ लोकोत्तरेण मार्गेण तस्याष्टाभिस्तथैवेति**। **यथा सकृदा-
गामिफलस्यै**वाष्टाभिरित्यर्थः। आज्ञेन्द्रियमष्टमं भवतीति॥ **अथ वीतराग** इति। काम-
धातुमात्रवीतरागो लौकिकेन मार्गेण नवमे प्रकारे प्रहीणे। प्रथमादपि वा ध्यानादा-
वदाकिंचन्यादपि वा वीतरागो योऽनागामिफलं प्राप्नोति। **तस्य नवभिः प्राप्तिः**।
**यथा स्रोतआपत्तिफलस्य**। स्रोतआपत्तिफलस्य हि दर्शनमार्गेण प्राप्तिः। अस्य च दर्शन-
मार्गेणैव प्राप्तिरिति तुल्यत्वम्। **अयं तु विशेषः। सुखसौमनस्योपेक्षेन्द्रियाणाम- 125.4 (15b–8)
न्यतमं भवति निश्रयविशेषादिति**। यदि तृतीयं ध्यानं निश्रित्य[3] नियाममवक्रा-
मति। सुखेन्द्रियं तत्र भवति। अथ प्रथमद्वितीये ध्याने निश्रित्य[3] सौमनस्येन्द्रियं तत्र भव-
ति। अथानागम्यध्यानान्तरचतुर्थध्यानानामन्यतमं निश्रित्य उपेक्षेन्द्रियं तत्र भवतीति।
**यदाप्ययमानुपूर्विक** इति विस्तरः। यदाप्ययमधिगतपूर्वफल आनुपूर्विकस्तीक्ष्णेन्द्रियः। 125.6 (15b–10)
स **नवमे विमुक्तिमार्गे ध्यानं प्रविशति** मौलं **लौकिकेन मार्गेण। तदाप्यष्टा- 125.7 (16a–1)
भिरिन्द्रियैरनागामिफलं प्राप्नोति**। तत्र मौलध्यानसंगृहीतो विमुक्तिमार्गो भवति।
तत्र च सौमनस्येन्द्रियं। आनन्तर्यमार्गस्त्वनागम्यसंगृहीत एव। यदि न प्रविशति। तत्र

---

1 च MSS.   2 °ज्ञानक्षांत्यव° MSS. ལམ་ལ་ཆོས་ཤེས་པའི་བཟོད་པའི་གནས་སྐབས་ན་ (!)   3 निसृत्य MSS. བརྟེན་ནས་.

योपेक्षेन्द्रियमेव नान्यथा। तस्य प्राप्तिरष्टाभिः श्रद्धादिभिः पञ्चभिर्मनउपेक्षासौमनस्येन्द्रि-
125.11 (16a–2) यैश्चेति। **उभाभ्यां च तस्य प्राप्तिरि**ति। आनन्तर्यविमुक्तिमार्गाभ्यां चौरनिष्कास-
125.12 (16a–3) नकपाटपिधानवदिति[1] व्याख्यातमेतत्॥ **अथ लोकोत्तरेण प्रविशती**ति। स एव
आनुपूर्विकस्तीक्ष्णेन्द्रियो वेदितव्यो ऽधिकारानुवृत्तेः। **तस्य नवभिरिन्द्रियैः प्राप्तिः**।
तैरेवेदानीमुक्तैरिन्द्रियैः **आज्ञेन्द्रियेण च नवमेन**। तान्येव हि इन्द्रियाणि अनास्र-
वत्वादाज्ञेन्द्रियाख्यां लभन्ते॥

इदमिह चोद्यते। कस्मादानुपूर्विक एवमुक्तो न पुनर्वीतरागपूर्वी। न हि वीतरागपूर्वी अनागम्यनिश्रयेण दर्शनमार्गमुत्पाद्य षोडशे चित्तक्षणे मौलं प्रथमं ध्यानं प्रविशति। तत्राधिगते ऽनादरात्। आनुपूर्विको हि मौलध्यानार्थी तस्यानधिगतपूर्वत्वात्। तस्मादस्ति संभवो यदसौ मौलमेव प्रविशति। वीतरागपूर्वी तु चतुःसत्यदर्शनं प्रति कृतादरः[2]। न ध्यानं प्रति। इति न तत्र षोडशे वित्तक्षणे मौलं ध्यानं प्रविशतीत्यभिप्रायः॥ १६॥

**नवाप्तिरन्त्यफलयोर्**

125.14 (16a–4) इत्युक्तं[3] तद्विरोधयति। **यत्तर्हि अभिधर्म उक्तं ज्ञानप्रस्थाने। कतिभिरिन्द्रि-
यैरर्हत्त्वं प्राप्नोती**ति। **आह। एकादशभिरि**ति[4]। तत्कथं न विरुध्यत इत्य-
भिप्रायः।

125.17 (15a–3) **एकस्य संभवाद्**

126.4 (16a–7) इति। कस्यचिदेवैकस्य पुद्गलस्य संभवः। न सर्वस्य संभवः। यो हि मृद्विन्द्रियः **परिहाय**
126.5 (16a–8) **परिहाय सुखसौमनस्योपेक्षाभिः** निश्रयविशेषात्पार्यायिकीभिरर्हत्त्वं **प्राप्नुयात्**।
126.7 (16a–9) तं प्रत्येवमुक्तं। **एकादशभिरि**ति। **न तु संभवो ऽस्ति सुखसौमनस्योपेक्षाणां एक-
स्मिन्काले** समवधानमित्यर्थः। चित्तचैत्तानामेकैकद्रव्योत्पत्तेः। यो हि कश्चिन्मृद्वि-

---

1 論 二十三 13a 2. 2 हृता° NT; གུས་པ་བྱས་པ་ཡིན་

3 Kārikā II, 16a. 4 發智論 (秋五 65b 14).

न्द्रियः पुद्गलो ऽनागम्यं अन्यं [1]वोपेक्षेन्द्रियनिश्रयं निश्रित्य अर्हत्त्वं प्राप्नुयात्। तस्य तत्प्राप्तिरुपेक्षेन्द्रियेण। ततः पुनरपि परिहीयते। ततः प्रथमं द्वितीयं वा ध्यानं निश्रित्य पुनरर्हत्त्वं प्राप्नुयात्। तस्य तत्प्राप्तिः सौमनस्येन्द्रियेण। ततः पुनरपि परिहीयते। ततः स तृतीयं ध्यानं निश्रित्य[2] पुनरर्हत्त्वं प्राप्नुयात्। तस्य तत्प्राप्तिः सुखेन्द्रियेण। इति प्रत्येकं तत्र फलप्राप्तौ अवश्यं नवैवेन्द्रियाणि व्याप्रियन्ते। श्रद्धादीनि पञ्च मनआज्ञाज्ञातावीन्द्रियाणि सुखसौमनस्योपेक्षेन्द्रियाणां चान्यतमदिति। पुनः पुनः प्राप्तेस्तदेकादशभिरित्युक्तं॥ **कथमनागामिनो ऽप्येष प्रसङ्गो न भवतीति**। कस्मात्तत्र शास्त्रे ऽर्हत्त्वफलमेव एकादशभिः प्राप्नोतीत्युक्तं। न तूक्तमनागामिफलमपीति। **न ह्यसौ परिहीणः कदाचित्सुखे-** 126.9 (16b–1)
**न्द्रियेण प्राप्नोतीति**। असावनागामी तृतीयध्यानोर्ध्वभूमिलाभात्परिहीणो भवति। ऊर्ध्वभूमेरेव परिहीणो भवति। नासावनागामिफलात्परिहीण इत्युच्यते। एवं यावत् द्वितीयध्यानात्। यदा तु प्रथमात्परिहीणो भवति। तदानागामिफलात्परिहीण इत्युच्यते। पञ्चावरभागीयप्रहाणाद्धि अनागामिफलं व्यवस्थाप्यते। यदा च स कामवैराग्यात्परिहीणः। तदा तृतीयं ध्यानमस्य नास्ति। तत्कथं सुखेन्द्रियेणानागामिफलं प्राप्नुयात्। तत आह। न ह्यसौ परिहीणः कदाचित्सुखेन्द्रियेण प्राप्नोतीति। किं सौमनस्येन्द्रियेण प्राप्नुयात्। यत एवं सुखेन्द्रियस्यैव प्रतिषेधः। प्राप्नुयात् यदि नवमे विमुक्तिमार्गे मौलं ध्यानं प्रविशेत्। नैतदस्ति। यो हि परिहीणो भवेत्। स मृद्विन्द्रियः। यश्च मृद्विन्द्रियः। स न शक्नोति नवमे विमुक्तिमार्गे मौलं ध्यानं प्रवेष्टुं। तीक्ष्णेन्द्रियस्तु शक्नोति। इन्द्रियसंचारस्य [3]दुष्करत्वात्। सत्यमेतत्। किं तु यद्यसौ मृद्विन्द्रिय आनुपूर्विको[4] ऽनागामिफलं प्राप्य। ततश्च परिहीणो भूत्वा इन्द्रियसंचारं कुर्यात्। इन्द्रियसंचारेण च तीक्ष्णेन्द्रियो भूत्वा पूर्वकेणैव क्रमेणानागामिफलं प्राप्नुवन्यदि नवमे विमुक्तिमार्गे मौलं प्रविशेत्। तस्य तदानागामिफलप्राप्तिरष्टाभिर्नवभिर्वा भवति। श्रद्धादिभिः पञ्चभिर्मनइन्द्रियेण

---

1 चो° N; འམ་. 2 निसृत्य N; བརྟེན་ནས་. 3 °स्यादु° MSS. But Tib. has no negation. 4 °पूर्वको N.

उपेक्षेन्द्रियेण चानन्तर्यमार्गसंगृहीतेन सौमनस्येन्द्रियेण च मौलध्यानविमुक्तिमार्गसंगृहीतेनेति। लोकोत्तरेण चेन्मौलं ध्यानं प्रविशेत्। एभिश्चाष्टाभिराज्ञेन्द्रियेण च नवमेनेत्यवगन्तव्यं। तस्मात्सूक्तं न ह्यसौ परिहीणः कदाचित्सुखेन्द्रियेण प्राप्नोतीति॥ वीतरागपूर्वी तर्ह्येकादशभिस्तत्प्राप्नुयात्। कथं। यो मृद्विन्द्रियः पुद्गलस्तृतीयध्यानलाभी तृतीयं ध्यानं निश्रित्य नियाममवक्रामेत्। स षोडशे चित्तक्षणे अनागामी भवति। सा तत्फलप्राप्तिः सुखेन्द्रियेण। श्रद्धादिभिः पञ्चभिर्मनश्चाज्ञास्यामीन्द्रियाज्ञेन्द्रियैश्चेति। स ततो ऽनागामिफलात्परिहीण इन्द्रियोत्तापनेन तीक्ष्णेन्द्रियमात्मानं कृत्वा अनागम्यनिश्रयेणैवानागामिफलं प्राप्नुवन्नवमे विमुक्तिमार्गे मौलं प्रविशेत्। तस्य तत्फलप्राप्तिः पूर्ववदुपेक्षेन्द्रियेण सौमनस्येन्द्रियेण च श्रद्धादिभिश्चापि पञ्चभिर्मनइन्द्रियेण चाष्टमेन[1]। लोकोत्तरमार्गत्वात् आज्ञेन्द्रियेणापि नवमेन। इत्येवं द्वयोः कालयोरेकादशभिरिन्द्रियैः स पुद्गलस्तदनागामिफलं प्राप्नुयादिति। ततस्तत्प्रतिषेधार्थमिदमाह। **न च वीतरागपूर्वी परिहीयते। तद्वैराग्यस्य द्विमार्गप्रापणादिति।** न च कामवीतरागः केन चिन्निश्रयेण नियाममवक्रान्तः परिहीयते। कस्मात्। तद्वैराग्यस्य कामवैराग्यस्य द्विमार्गप्रापणात्। लौकिकलोकोत्तरमार्गप्रापणात्। इह फलं द्विविधं। संस्कृतमसंस्कृतं च॥

संस्कृतासंस्कृतं फलम्

इति[2] वचनात्। तत्र यदसंस्कृतं विसंयोगलक्षणमनागामिफलं। तत्पूर्वं लौकिकेन मार्गेण प्राप्तं। नियामावक्रान्तौ च लोकोत्तरेण मार्गेण पुनस्तत्प्राप्तं। द्विविधा हि तस्य प्राप्तिः। लौकिकी लोकोत्तरा च। तस्मात्स्थिरं तद्वैराग्यं। तस्मादतो न परिहीयते॥

ननु च

फलाद्धानिर्न पूर्वकात्[3]।

---

1 वा° N; དད་. 2 Kārikā VI, 52$^{b}$. 3 Kārikā VI, 60$^{b}$.

दर्शनहेयानामवस्तुकत्वादित्येतदपि[1] कारणान्तरमस्ति । कस्मात्तदिह[2] नोक्तमिति । एतदपि वक्तव्यं । अपि खलु पर एवं ब्रूयात् । मा भूद्दर्शनहेयक्लेशवैराग्यपरिहाणिः । भावनाहेयक्लेशमात्रवैराग्यपरिहाणिस्तु कस्मादस्य परिहीणकस्य न भवेत् । पञ्चावरभागीयप्रहाणाद्धि अनागामिफलं भवति । तत्र च सत्कायदृष्टिः शीलव्रतपरामर्शो विचिकित्सा च दर्शनहेयाः । कामच्छन्दो[3] व्यापादश्च भावनाहेयौ । तयोश्च तस्य वीतरागपूर्विणो ऽभिसमयान्ते षोडशे चित्तक्षणे प्रहाणस्य लौकिकेन मार्गेण प्राप्तस्य तत्सामर्थ्यात्पुनरनास्रवा प्राप्तिर्भवति । अनास्रवगोत्राणां लब्धत्वात् । अनास्रवं हि नवमविमुक्तिमार्गस्वभावं संस्कृतमनागामिफलमसंस्कृतं च कामच्छन्दादिप्रहाणं तस्यामवस्थायां लभ्यते । तस्मादिदमेव कारणमुक्तं । आर्येण[4] तद्वैराग्यस्य द्विमार्गप्रापणादिति । कामच्छन्दादिप्रहाणस्य द्विमार्गप्रापणादित्यर्थः ॥

**उपेक्षाजीवितमनोयुक्तो ऽवश्यं त्रयान्वित** 125.18(16b—4)

इति । **उपेक्षया** जीवितेन मनसा वा **युक्तो** ऽन्वितो **ऽवश्यं त्रयेण समन्वागतः** । 126.15(16b—8)
**तेनैवोपेक्षाजीवितमनःस्वभावेन । न ह्येषामन्योन्येन विना समन्वागम** इति ।
**यदैकस्य समन्वागमः । तदेतरयोरपि समन्वागमः[5] । तेनैषां समन्वागमव्यवस्थानं क्रियते ।**
चक्षुरादीनां तु न क्रियते । तस्मादाह । **चक्षुःश्रोत्रघ्राणजिह्वेन्द्रियैरिति विस्तरः** । 126.19(16b—10)
चक्षुःश्रोत्रघ्राणजिह्वेन्द्रियै**रारूप्यधातूपपन्नो न समन्वागत** इत्यत्र कायेन्द्रियाग्रहणं ।
**कामधातौ च येनाप्रतिलब्धविहीनानी**त्यस्योपचयार्थस्य चक्षुरादिष्वेव संभवान्न 126.20 (17a—1)
कायेन्द्रिये । अन्यथा हि रूपिभिरिन्द्रियैरारूप्योपपन्नो न समन्वागत[6] इत्येवोच्यते ।
अप्रतिलब्धानि कललाद्यवस्थायां । विहीनानि लब्धविनाशादन्धत्वाद्यवस्थायां[7] क्रम-

---

1 論 二 十 五 $3^{b}$ 8. 2 तस्मात्त° MSS; ཅིའི་ཕྱིར་. 3 °मच्छ-न्दो CT, °मच्छन्दा N; འདོད་པའི་འདུན་ (pr. བདུན་)པ་. 4 आचार्येण MSS; འཕགས་པས་. 5 °गतः N; ལྡན་པ་ཡིན་ནོ་. 6 °गमः N; ལྡན་ནོ་. 7 °दर्थत्व° MSS.; ལོང་བ་ཉིད་.

127.8 (17a – 3) मरणे वा । **पृथग्जना[1] न समन्वागता[2]** इति विशेषणं । आर्यस्यावश्यं समन्वागतत्वात् ।
127.10 (17a–5) न हि तस्य भूमिसंचारेण अनास्रवसुखादित्यागः ॥ **दौर्मनस्येन कामवीतराग** इति ।
127.12 (17a – 6, 7) इहस्थो धात्वन्तरस्थो वा पृथग्जनो वार्यो वा न समन्वागतः ॥ **पृथग्जनफलस्था**
इति । फलस्थाः स्रोतआपन्नादयः । अभिसमयान्ते विहीनत्वात् **तेनानाज्ञातमाज्ञास्या-**
127.13 (17a–8) **मीन्द्रियेणासमन्वागताः । आज्ञेन्द्रियेण दर्शनमार्गस्था** अप्राप्तत्वादसमन्वागताः ।
127.16 (17a–9) **अशैक्षमार्गस्थाः** फलप्राप्तौ विहीनत्वात् **असमन्वागताः । अप्रतिषिद्धास्ववस्थासु**
**यथोक्तसमन्वागमो[3] वेदितव्य** इति । या अप्रतिषिद्धा अवस्थाश्चक्षुरादिभिरिन्द्रियैः
समन्वागमं प्रति । तास्ववस्थासु यद्यदिन्द्रियमुक्तं । तैस्तैः समन्वागतो वेदितव्य
इत्यर्थः । तद्यथा कामधातावप्रतिलब्धविहीनावस्थां हित्वा चक्षुरादिभिर्विहीनान्तैः
समन्वागतः । कायेन्द्रियेण कामरूपधातूपपन्नः समन्वागत इत्यादि ॥ १७ ॥

127.18 (16b – 4, 5)

## चतुर्भिस्सुखकायाभ्याम्

इति । युक्त इति वर्तते । अवश्यमिति च । संख्यानुक्रमविवक्षायां तु तदनन्तरं तैरित्ये-
128.7 (17a–10) वानन्तरं सुखादिग्रहणं । **सुखेन्द्रियेण समन्वागत** इति । चतुर्थध्यानारूप्यधातूपपन्नं
पृथग्जनं मुक्त्वा सर्वः सुखेन्द्रियेण समन्वागतः । तस्यान्यैर्नावश्यं समन्वागतः । चक्षुरादि-
भिर्विहीनेन्द्रियान्तैरारूप्यधातौ कामधातौ च अप्रतिलब्धविहीनावस्थायामसमन्वागमः[4] ।
कायेन्द्रियेण च आरूप्यधातौ । स्त्रीपुरुषेन्द्रियाभ्यां रूपारूप्यधात्वोश्च । कामधातौ च
अलब्धविहीनावस्थायां । दुःखेन्द्रियेण रूपारूप्यधात्वोः । सौमनस्येन्द्रियेण पृथग्जन-
स्तृतीयध्यानोपपन्नः । दौर्मनस्येन्द्रियेण कामवीतरागावस्थायां । श्रद्धादिभिः पञ्चभिः
समुच्छिन्नकुशलमूलावस्थायां । आज्ञास्यामीन्द्रियेण पृथग्जनफलस्थावस्थायां । आज्ञे-
न्द्रियेण पृथग्जनदर्शनमार्गस्थाशैक्षावस्थायां । आज्ञातावीन्द्रियेण पृथग्जनशैक्षावस्थायां

---

1 °जनो MSS.  2 °तो T.  3 °तो MSS.  4 °स्थायास° N; གནས་སྐབས་ན་.

अ॒समन्वागत इति । यः **कायेन्द्रियेण । सो ऽपि चतुर्भिरिति** । कामधातूपपन्नः 128.9 (17b–1)
कायेन्द्रियेण समन्वागतः । तस्य नान्यैरवश्यं समन्वागमः । चक्षुरादिभिः कामधाता-
वलब्धविहीनावस्थायामसमन्वागमः । स्त्रीपुरुषेन्द्रियाभ्यामेतस्यामेवावस्थायां । रूप-
धातौ चा[1]समन्वागमः । दुःखेन चा[2]स्मिन्नेव । सुखेन च पृथग्जनस्य चतुर्थध्यानोपप-
न्नावसमन्वागमः । सौमनस्येन पृथग्जनस्तृतीयचतुर्थध्यानोपपन्नो ऽसमन्वागतः । दौर्म-
नस्येन श्रद्धादिभिश्चान्यैः पूर्ववदसमन्वागमो वक्तव्यः ॥

**पञ्चभिश्चक्षुरादिमान्** 127.19 (16b–5)

इति । चक्षुःश्रोत्रघ्राणजिह्वावानित्यर्थः । **तेन चेति**[3] । तेन चक्षुषा । चक्षुषि सत्य-
वश्यं कायेन्द्रियं । न तु श्रोत्रादीनि । कामधातावलब्धविहीनत्वसंभवात् । स्त्रीपुरु-
षेन्द्रियादीनां पूर्ववद्व्यभिचारो वक्तव्यः । **एवं श्रोत्रघ्राणजिह्वेन्द्रियैरिति** । यः श्रो- 128.14 (17b–2
त्रेन्द्रियेण । सो ऽवश्यं पञ्चभिरुपेक्षाजीवितमनःकायैस्तेन च । इत्येवं सर्वं नेयं ।

**सौमनस्यी च** 128.1 (16b–5)

कि । पञ्चभिरवश्यं समन्वागत इत्यधिकृतं । चक्षुरादिष्वेव सौमनस्यं कस्मान्न प्रक्षिप्तं ।
अन्यस्थानपाठात् । तथा ह्यादिशब्देन प्रक्षेप आकुलः स्यात् । **द्वितीयध्यानस्तृ-** 129.3 (17b–4)
**तीयालाभी कतमेन सुखेन्द्रियेण समन्वागत** इति । सुखेन्द्रियं कामधातौ पञ्चवि-
ज्ञानकायिकं प्रथमे च ध्याने त्रिविज्ञानकायिकमस्ति । तृतीये तु ध्याने मानसम् ।
अतो द्वितीयध्यानस्थो नाधरेण सुखेन्द्रियेण समन्वागतः । तस्य भूमिसंचारेण त्यक्तत्वात् ।
न तृतीयध्यानभूमिकेन तस्यालाभित्वात् । इति मत्वा चोदयति । कतमेन सुखेन्द्रियेण
समन्वागत इति । आह । **क्लिष्टेन तृतीयध्यानभूमिकेनेति** । सर्वे ह्यधरभूम्युपपन्नाः 129.5 (17b – 5
सत्त्वा उपरिभूमिकेनाप्रहीणेन क्लिष्टेन समन्वागता इति सिद्धान्तः । शेषेन्द्रियव्यभिचारः
पूर्ववद्वक्तव्यः[4] ।

---

1 वा° CN; དང་.  2 वा° CN; དང་.  3 येति MSS.; དེ་དང་ཞེས་བྱ་བ་དེ་.

4 °द्यक्तः N; བརྗོད་པར་བྱའོ་.

12°.1, 2 (16b—6) दुःखी तु सप्तभिर्

129.7 (17b—6) इति। कामधातूपपन्नो ह्येष। तस्मादवश्यं कायेन्द्रियेण चतुर्भिश्च वेदनेन्द्रियैरिति
दौर्मनस्यवर्ज्यैः। तद्वीतरागावस्थायां दौर्मनस्यं व्यभिचरति। मनोजीवितेन्द्रिये [2]च
स्तैः[2]। इत्यवश्यं सप्तभिरिन्द्रियैः समन्वागतः। शेषेन्द्रियव्यभिचारस्तु पूर्ववद्वाच्यः

128.2 (16b—6) स्त्रीन्द्रियादिमान्

128.3 (16b—7) अष्टादिभिर्

इति। स्त्रीपुरुषदौर्मनस्यश्रद्धावीर्यस्मृतिसमाधिप्रज्ञेन्द्रियवानित्यर्थः। जीवितमनःसुख-
दुःखसौमनस्योपेक्षेन्द्रियाणामुक्तत्वात् आज्ञातावीन्द्रियादीनां च त्रयाणां वक्ष्यमाणत्वात्
129.9 (17b—7) एषामेवाष्टानामिन्द्रियाणां ग्रहणं भवति। यः स्त्रीन्द्रियेण समन्वागत इति। स काम-
धातूपपन्न एव। स्त्रीन्द्रियवत्त्वात्। अतः सोऽवश्यमष्टाभिरिन्द्रियैः समन्वागतः। कतमै-
रित्याह। तैश्च सप्तभिः स्त्रीन्द्रियेण चेति। कायजीवितमनोभिश्चतुर्भिश्च वेदनेन्द्रियै-
रिति सप्तभिः। स्त्रीन्द्रियेण चाष्टमेन। शेषैरनियमः। यथोक्तं चक्षुरादीनां वैकल्यसंभवा-
129.13 (17b—8) दित्यादिभिः कारणैः। स्त्रीन्द्रियवत्पुरुषेन्द्रियवानपि वक्तव्यः। दौर्मनस्यवानपि का-
129.14 (17b—9) मोपपन्नः कामावीतराग इति। तथैव तैः सप्तभिर्दौर्मनस्येन च। श्रद्धावानपि त्रैधा-
तुकः सत्त्व इति। तैः पञ्चभिः श्रद्धादिभिरविनाभाविभिरुपेक्षाजीवितमनोभिश्च
129.16 समन्वागतः। शेषैरनियमः पूर्ववत्। यथा श्रद्धावानेवं यावत्प्रज्ञावान्॥ १८॥

आज्ञाते इन्द्रियमाज्ञातेन्द्रियमिति[1]। आज्ञात एव इन्द्रियं आज्ञातेन्द्रियं। निरवशेषाज्ञात इन्द्रियमित्यर्थः। आज्ञेन्द्रियमपि हि आज्ञात इन्द्रियं। न तु निरवशेषे।

---

1 . . 1 वस्त MSS. ཀྱང་ཡོད་.     2 This passage in wanting in both Chinese versions, but in the Tibetan 124a 4. ཀུན་ཤེས་པ་ལ་དབང་བྱེད་པས་ན་ཀུན་ཤེས་པ་དང་ལྡན་པའི་དབང་པོའོ་ཞེས་བྱ་བ་ནི···

मावशेषत्वात् प्रहेयस्य । अथ वा पदैकदेशग्रहणेन आज्ञातावी पुद्गल आज्ञात इत्युच्यते 129.17 (18a–1)
तस्येन्द्रियं आज्ञातेन्द्रियमिति । य आज्ञेन्द्रियेण सो ऽवश्यमेकादशभिरिति । आज्ञेन्द्रियवान् फलस्थः शैक्षः त्रिष्वपि धातुषु भवति । स चतुर्थध्यानादारूप्योपपन्नः कथं सुखसौमनस्येन्द्रियाभ्यां समन्वागतः । यस्मादार्यः कामवैराग्ये ऽवश्यं सौमनस्येन्द्रियं प्रतिलभते । द्वितीयध्यानवैराग्ये च सुखेन्द्रियं । ते च भूमिसंचारे ऽपि न त्यज्येते[1] । तथा हि वक्ष्यति ।

भूमिसंचारहानिभ्यां ध्यानाप्तं त्यज्यते शुभं
तथारूप्याप्तं आर्यं तु फलाप्त्युत्तप्तिहानिभिर्

इति[2] । फलप्राप्तीन्द्रियोत्तापने ऽपि यद्यपि ते प्रतिपन्नकमार्ग[3]मृद्विन्द्रियमार्गसंगृहीते त्यज्येते[1] तथाप्यपरे फलस्थतीक्ष्णेन्द्रियमार्गस्वभावे लभ्येते[4] । तस्मात्ताभ्यां सुखसौमनस्याभ्यां भूमिसंचारे ऽपि अपरित्यक्ताभ्यां चतुर्थध्यानादारूप्योपपन्नो ऽपि आर्यः समन्वागत एव भवति । शेषैः पूर्ववदनियमः ।

आज्ञास्यामीन्द्रियोपेतास्त्रयोदशभिरन्वित 128.5, 6 (16b–7)

इति विस्तरः । आज्ञास्यामीन्द्रियसमन्वागतः कामावचरः सत्त्वः कामधातावेवाज्ञास्यामीन्द्रियोत्पादनात् ।

असंवेगादिह विधा तत्र निष्ठेति वाचनाद्[5]

इति[6] । तस्मादवश्यं कायेन्द्रियमस्यास्ति । चतस्रो वेदना दौर्मनस्यवर्ज्याः । तस्य वीतरागावस्थायां व्यभिचारात् । तत्रावश्यमिति वर्तते । त्रयोदशभिरेभिरिन्द्रियैरव-

---

1 °ज्यते MSS. 2 Kārikā IV, 41. 3 °र्गे मृ° N; ལམ་དང་.

4 लभ्यते MSS. 5 वच° MSS. 6 Kārikā VI, 57$^{d}$.

श्यमेव समन्वागत इत्यवधार्यते । न तु त्रयोदशभिरेवेति । शेषैरनियमः । अन्धादिष्वपि दर्शनमार्गसंभवात् । स्त्रीपुरुषेन्द्रिययोर्वैकल्ये कथं दर्शनमार्गोत्पत्तिः । स्त्रीपुरुषेन्द्रियवियुक्त[1]विकलानां हि संवरफलप्राप्तिवैराग्यानि न सन्तीति[2] । केचित्तावदाहुः । प्रतिलब्धसंवराणां फलप्राप्तिर्भवति । द्विव्यञ्जनोदयाद्धि प्रातिमोक्षसम्वरत्यागो भवति । न तद्वैकल्यात् । क्रममरणाद्वा स्त्रीपुरुषेन्द्रिये निरोधे ऽप्यभ्यस्तनिर्वेधभागीयस्य दर्शनमार्गोत्पत्तिर्भवति । अपरे पुनराहुः । पुद्गलसामान्यमिहाधिक्रियते नैकत्रैवेन्द्रियैरावश्यकसमन्वागमव्यभिचाराावुच्येते[3] । कथम् ।

उपेक्षाजीवितमनोयुक्तो ऽवश्यं त्रयान्वित

इति[4] यावत् । उपेक्षासमन्वागतः पुद्गलः कामधातूपपन्नो वा यावद्भवाग्रोपपन्नो वा सर्वो ऽसाववश्यं त्रयेण समन्वागतः । चक्षुरादिव्यभिचारस्तु संभवतो न सर्वत्र । कश्चिदेव हि रूपिभिरिन्द्रियैरसमन्वागतो य आरूप्यधातूपपन्नः । न तु यो रूपधातूपपन्नः । विस्तरेण । यावत्कश्चिदेव श्रद्धादिभिरसमन्वागतो यः समुच्छिन्नकुशलमूलः । न तु स एवारूप्यधातूपपन्नः । तथेहापि यावानाज्ञास्यामीन्द्रियोपेतः सर्वो ऽसावेभिर्यथोक्तैस्त्रयोदशभिरिन्द्रियैरवश्यं समन्वागतः । व्यभिचारस्तु संभवतः कस्यचिदेव । तथा हि कस्यचिच्चक्षुरिन्द्रियेणासमन्वागमो यो ऽन्धः । कस्यचिच्छ्रोत्रेन्द्रियेण यो बधिरः । एवं घ्राणादिभिः । यावत्कस्यचित्स्त्रीन्द्रियेण यः पुरुषः । कस्यचित्पुरुषेन्द्रियेण या स्त्री । कस्यचिद्दौर्मनस्येन यो वीतरागः । इत्येवमेवावगन्तव्यं ॥ १६ ॥

130.9, 10 (18a–5) सर्वाल्पैर्निः[5]शुभो ऽष्टाभिर्

इति । एकः पुद्गलः सर्वेभ्यो ऽल्पैर्यः समन्वागतः । स कियद्भिरल्पैः समन्वागत

130.14 (18a–7) इत्याह । निःशुभो यः समुच्छिन्नकुशलमूलः । स च कामधाताविव ।

---

1 °विमुक्त° N; མི་ལྡན་པ་.   2 See 論 三 2ª 1.   3 °वुच्यते MSS.

4 Kārikā II, 18ᵃᵇ.   5 °र्वान्यैर्निः° MSS.; དགེ་མེད་ནང་ན་ཉུང་.

छिनत्ति स्त्रीपुमान् दृष्टिचरित

इति[1]। कामवैराग्यं चात्र[2] न संभवति। तस्मादस्य **पञ्चापि वेदनेन्द्रियाणि** सन्ति। 130.15 (18a–8)
**कायेन्द्रियं च जीवितमनसी** च स्त एव सर्वत्र। चक्षुरादीनि तु न सन्ति। क्रममरणावस्थायां अन्धत्वाद्यवस्थायां च तेषामभावात्। **वेदयत इति** कृत्वेति कर्तरि क्विप्[3]। **वेदनं वा विदिति** भावसाधन औणादिकः क्विप्[3]। ज्ञापकं दर्शयति **यथा संपदनं संपदिति**। 130.17 (18a–9)

**तथाष्टभ्य** 130.11 (13a–5)

इति। संख्यामात्रं तथाशब्देन संबध्यते। **एकान्तकुशलत्वात् श्रद्धादीनि शुभ-** 131.5 (18b–1)
**ग्रहणेन गृह्यन्त** इति। शुभान्येव नाकुशलाव्याकृतानि यानि तानि शुभानीत्यर्थः।
**आज्ञास्यामीन्द्रियादीनामपि ग्रहणप्रसङ्ग** इति। तान्यपि एकान्तकुशलानि। 131.6 (18b–2)
तस्मात्तद्ग्रहणप्रसङ्ग इति। न। **अष्टाधिकारादिति**।

निःशुभो ऽष्टाभिर्

इत्येतस्माद्

**उपेक्षायुर्मनःशुभैर्** 130.12 (18a–6)

अष्टाभिरित्याज्ञास्यामीन्द्रियादीनां निरासः कृतो भवति। अष्टशब्देन कृतावधि- 131.8 (18b–2)
त्वात्। **बालाधिकाराच्चेति**। बालो ऽत्राधिक्रियते

बालस्तथाष्टभ्य

इति[4] वचनात्। आज्ञास्यामीन्द्रियाद्यभावे च पृथग्जनो भवति। पृथग्जनत्वं कत-मत्। आर्यधर्माणामलाभ इति[5] वचनात्। तस्मात्तेष्वनास्रवेषु अप्रसङ्ग इति॥ २०॥

---

1 Kārikā IV, $81^{ab}$. 2 वास्य MSS.; འདི་ལ་····ཡང་ 3 See O. Böhtlingk, Pāṇini (Erklärung der grammatischen Elemente) s. v. क्विप्. 4 Kārikā II, $20^{c}$. 5 論 四 $19^{a}$ 6.

131.16 (18b—6) **द्विव्यञ्जनो यः समग्रेन्द्रिय** इति । द्विव्यञ्जनो ऽपि हि समग्रचक्षुरादिकः एवमे-
132.3 (18b—6) **कोनविंशत्या समन्वागतो** नान्यथा । **आज्ञातावीन्द्रियं द्वयोश्चान्यतरद्** इति ।
रागित्वा[1]दाज्ञातावीन्द्रिय एकान्तेन वर्जयितव्यं । आर्यस्य चाज्ञास्यामीन्द्रियाज्ञेन्द्रिया-
भ्यामवश्यं पर्यायेण समन्वागमात् । यदाज्ञास्यामीन्द्रियं न तदाज्ञेन्द्रियं । यदाज्ञेन्द्रियं
132.4 (19a—2) न तदाज्ञास्यामीन्द्रियं । **उक्त इन्द्रियाणां धातुप्रभेदप्रसङ्गेनागतानां विस्तरेण**
**प्रभेद** इति । अष्टादशानां धातूनां कतीन्द्रियं कति नेन्द्रियमिति[2]धातुप्रभेदप्रसङ्गेन ।

धर्मार्धमिन्द्रियं ये च द्वादशाध्यात्मिकाः स्मृता

इति[3] इन्द्रियाण्यागतानि । तेषां प्रभेदः

अमलं त्रयम्

इत्ये[4]वमादिविस्तरेणोक्तः ॥ २१ ॥

132.6 4. II. 2, (1a—6) **किमेते संस्कृता धर्मा** इति । ये ते स्कन्धधात्वायतनत्वेनाभिहिताः पूर्वं । **यथा**
**भिन्नलक्षणा** इति । रूप्यते इति रूपं । अनुभवो वेदना । निमित्तोद्ग्रहणं संज्ञेत्यादि ।
132.8 (1a—7) संस्कृतग्रहणमुत्पत्तिमत्त्वात् । **उताहो नियतसहोत्पादा अपि** । **केचित्सन्तीति** ।
सन्ति हि केचित्सहोत्पादाः । न तु नियतसहोत्पादाः । यथा चक्षुरादिसहोत्पादाः ।
तद्विज्ञानादयः चक्षुरादीनां सभागतत्स[5]भागभावात् तस्मादेवं पृच्छति । **सर्व इमे**
**धर्माः पञ्च भवन्तीति** । पञ्चवस्तुकनयेन एवं सर्वधर्मसंग्रहो व्यवस्थाप्यते । रूपा-
132.11 (1a—8) दिकलापमुखेन धर्मनिर्देशः सुखप्रतिपत्त्यर्थं । **तत्रासंस्कृतं नैवोत्पद्यत** इति । न
132.18 (1b—1) तत्प्रति सहोत्पादनियमश्चिन्त्यते । **सर्वसूक्ष्मो रूपसंघातः परमाणुरिति** । संघा-

---

1 रागित्वा° N; ཆགས་པ་དང་བཅས་པ་ཡིན་པའི་ཕྱིར་. 2 論 二 $22^{b}$ 8, 9.

3 Kārikā I, $47^{cd}$. 4 Kārikā II, $9^{a}$. 5 सभागस्तत्स° N; བརྟེན་པ་དང་བཅས་པ་དང་དེ་དང་མཚུངས་པ་.

तपरमाणुर्न द्रव्यपरमाणुः । यत्र हि पूर्वापरभागो नास्ति तत्सर्वरूपापचितं द्रव्यं द्रव्यपरमाणुरितीष्यते । तस्माद्विशिनष्टि संघातः परमाणुरिति ।

**कामे ऽष्टद्रव्यको ऽशब्द** 132.13 (1a–10)

इति । **कामधातौ** यदा **शब्दो** ऽत्र नोत्पद्यते । तदा **नियतमष्टद्रव्यक एव** 133.1 (1b–2)
भवति । नातो न्यूनद्रव्यकः ।

**अपरेन्द्रिय** 132.16 (1a–11)

इति । अपरमिन्द्रियमस्मिन्नित्यपरेन्द्रियः । चक्षुरादिमानित्यर्थः । यत्र हि चक्षुः श्रोत्रादि
वा । तत्र कायेन्द्रियेण भवितव्यं । तत्प्रतिबद्धवृत्तित्वाच्चक्षुरादीनां । **सशब्दाः पुनरेते** 133.12 (1b–6)
**परमाणव** इत्यष्टद्रव्यकादयः । संघातपरमाणवः सशब्दा उत्पद्यमाना **यथाक्रमं नव** 133.13 (1b–7)
**दशैकादश द्रव्यका उत्पद्यन्ते** । यो ऽष्टद्रव्यकः स नवद्रव्यकः । यो नवद्रव्यकः स
दशद्रव्यकः । यो दशद्रव्यकः स एकादशद्रव्यक इति । **अस्ति ह्यीन्द्रियाविनिर्भागो**
**शब्दो ऽपीति** । इन्द्रियाद्विनिर्भक्तुं यो न शक्यते । स इन्द्रियाविनिर्भागी शब्दः । इन्द्रि-
यापृथग्वर्तीत्यर्थः । अविनिर्भोगीति केचिद्बुद्धि पठन्ति ॥

**कथमविनिर्भागे भूतानां कश्चिदेव संघातः कठिन** इत्यादि । कठिनः 133.16 (1b–8)
पृथिवीधातुः । **द्रवो** ऽब्धातुः । **उष्णास्तेजोधातुः** । **समुदीरणा**[1] वायुधातुः । तुल्यभूत- 133.17 (1b–9)
सद्भावात्तुल्यरूपैस्तत्संघातैर्भवितव्यमित्यभिप्रायः । **यद्यत्र पटुतममिति** विस्तरः ।
यद्द्रव्यं पृथिव्यादिलक्षणं । यत्र संघाते पटुतमं स्फुटतमं । **प्रभावतः** शक्तितः । न तु
द्रव्यतः । **उद्भूतमुत्पन्नं** । **तस्य तत्रोपलब्धिः** । तस्य द्रव्यस्य तत्र संघात उपलब्धिर्ग्र-[2] 133.19 (1b–10)
हणं । **सूचीतूलीकलापस्पर्शवत्** । तत्र सूच्यो लोहमय्यः प्रतीता लोके । तूल्यो
वीरणादिपुष्पमूलदण्डाः । याः सिंका इति प्राकृतजनप्रतीताः । तासां सूचीनां तूलीनां

---

1 °णो TN.    2 °ब्धिग्र° MSS.; དམིགས་བྱེད་འཛིན་པ་ཡིན་ནོ་.

च कलापः। तस्य स्पर्शः सूचीतूलीकलापस्पर्शः। तस्य चोपलब्धिः तस्य पटुत-
मस्य प्रभावत उद्भूतस्य भूतस्येति। तत्र तस्येवेति अनेन लक्षणेन वतिः[1]।
एतदुक्तं भवति। यथा तुल्ये ऽपि सूचीनां तूलीनां कलापसद्भावे तीक्ष्णत्वा-
त्सूचीनामेव स्पर्शो[2] व्यक्तं उपलभ्यते। न तूलीनामतीक्ष्णत्वात्। तथा क्वचिदेव
संघाते काष्ठादिके कठिनमुपलभ्यते। क्वचिद्द्रवः पानीये। क्वचिदुष्णो[3] ऽग्नौ।
क्वचित्समुदीरणा वायौ न च तत्र तत्र संघाते चत्वारि महाभूतानि न सन्ति।
**सक्तुलवणचूर्णरसवच्च**। सक्तुचूर्णानां लवणचूर्णानां च यथा रसस्योपलब्धिः।
लवणचूर्णरस एव व्यक्तमुपलभ्यते। न तु सक्तुचूर्णरसः। तद्वदिहापीति। **संग्र-**
134.2 (2a–1) **हधृतिपक्तिव्यूहनादिति**। संग्रहकर्मणाब्धातोरस्तित्वं गम्यते काष्ठादिके। अन्य-
था पांसुमुष्टिवत्तद्विशीर्यते। यदि तत्राब्धातुर्न स्यात्। धृतिकर्मणाप्सु नौप्रभृतीनां
पृथिवीधातोरस्तित्वं गम्यते। पक्तिकर्मणा तेजोधातोरस्तित्वं गम्यते। यदि हि
तन्न स्यात्काष्ठादिकं न पूतीभवेत्। व्यूहनकर्मणा वायुधातोरस्तित्वं गम्यते। प्रस-
134.3 (2a–1) र्पणं हि तस्य न स्याद्वृद्धिर्वा यदि वायुधातुस्तत्र न स्यात्। एवमन्यत्रापि
योज्यं। **प्रत्ययलाभे च सतीति** विस्तरः। प्रत्ययानामग्न्यादीनां लाभे सति।
**कठिनादीनां [4]च द्रवणादिभावात्[4]** द्रवणघनत्वादिभावात्। तद्यथाग्निभूते सति
कठिनस्य लोहस्य द्रवणं। तेन ज्ञायते लोहे ऽब्धातुरस्तीति। तथा द्रवस्य
शैत्यादिप्रत्ययलाभे काठिन्यं। तेन ज्ञायते पृथिवीधातोरत्रास्तित्वमिति। तथा
कठिनसंघर्षादौष्ण्यमुपलभ्यते। तेन तेजोधातोरत्रास्तित्वं गम्यते। इति एवं संभ-
वतो ऽन्यत्रापि योज्यं॥ **अप्सु शैत्यातिशयादौष्ण्यं गम्यते इत्यपर** इति

---

1 वति denotes a Taddhita-suffix वत्. 2 संस्पर्शो C.; རེག་པའི་. 3 °ष्मो NC, °ष्णो T. 4 ... 4 द्रवद्रव्याद्रव्याणां च द्रवाणादिभावात् N, उवृद्ध-व्यानां च द्रवणादिभावात् C, द्रवद्रव्याद्रव्याणां च द्रवणादिभावात् T.; ཡང་གཞེར་བ་ལ་སོགས་པར་འགྱུར་བའི་ཕྱིར་ལ་.

भदन्तश्रीलाभः[1]। यस्मादापः शीताः शीततराः शीततमाश्च उपलभ्यन्ते। ततो ज्ञायते
तेजसस्तत्रान्यतरतमोत्पत्तेः शैत्यातिशयः। तेन च तत्र तेजो ऽस्तीति गम्यते।
**अव्यतिभेदे** ऽपीति विस्तरः। तं मतमाचार्यो दूषयति। **यथा न च शब्दस्य** 134.6 (2a–3)
द्रव्यान्तरेण व्यतिभेदो मिश्रीभावो ऽस्ति। **अतिशयश्च भवति** स्वभावभेदात्पटुः
शब्दः पटुतरः पटुतम इति। एवमिहापि भवेत्। यथा च **वेदनाया** न केनचिद्द्रव्या-
न्तरेण व्यतिभेदो भवतीति स्वभावभेदात्तारतम्येनातिशयः। तथेहापीति। नानेन
तेजोऽस्तित्वं गम्यते। ता एव ह्यापः काश्चिच्छीताः। काश्चिच्छीततराः। काश्चि-
च्छीततमा इति॥ **बीजतस्तेषु तेषां भावो न स्वरूपत इत्यपरे** इति सौत्रा- 134.7 (2a–4)
न्तिकाः। बीजतः शक्तितः सामर्थ्यत इत्यर्थः। न स्वरूपतो न द्रव्यत इत्यर्थः।
शक्तिरेव हि नानाविधास्ति यथा योगिभिरधिमोक्षविशेषेण सुवर्णधातू रूप्यधा-
तुस्ताम्रधातुरित्येवमादयो धातवः क्रियन्ते। कस्मादित्याह। **सत्यस्मिन्दारुस्कन्धे**
**विविधा धातव इति वचनात्**। धातुशक्तयो हि तत्रैव भगवतोक्ताः। न हि 134.8 (2a–5)
तत्रातिबहूनां सुवर्णरूप्यादीनां [2]स्वरूपतो ऽवकाशो[2] ऽस्तीति **कथं वायौ वर्ण**
**सद्भावं** इति वैभाषिकानेवं चोदयन्ति।

कामे ऽष्टद्रव्यक

इति[3] नियमे कथं वायौ वर्णो ऽस्तीति निर्धार्यते। न हि कथंचित्तत्र वर्ण
उपलभ्यते। **श्रद्धानीय एषो ऽर्थो नानुमानीय** इति वैभाषिकाः। परमाप्तैरयमु- 134.10 (2a–6)
क्तो ऽर्थ इति प्रत्येतव्यः। नार्थो ऽनुमानसाध्य इत्यभिप्रायः। **संसर्गतो[4] गन्धग्र-**
**हणाद्वेति**। अस्ति वानुमानमिति दर्शयति। गन्धवता तु द्रव्येण वायोः संप-
र्काद्गन्ध उपलभ्यते। **स च गन्धो वर्णं न व्यभिचरति**। यत्र हि गन्धस्तत्र 134.12 (2a–7)

---

1 °लातः MSS.; དཔལ་ལེན་. 2..2 °तः तत्राव° MSS.; तत्र is wanting in Tib. 3 Kārikā II, 22ᵃᵇ. 4 °र्गता MSS.; འདྲེས་པར་.

वर्णेन भवितव्यं इति । अत्र च साधनवचनं । वर्णवान्वायुर्गन्धवत्त्वाज्जातिपुष्पव-
दिति ॥ **रूपधातौ गन्धरसयोरभाव उक्त** इति ।

विना गन्धरसघ्राणजिह्वाविज्ञानधातुभिर्

इति[1] वचनात् । **तेन तत्रत्याः परमाणवः षट्सप्ताष्टद्रव्यका** इति । तत्रत्या-
स्तत्र भवाः । तत्रत्याः परमाणवः संघातपरमाणवो ऽधिकृताः । य इहाष्टद्रव्यक
उक्तो निरिन्द्रियो ऽशब्दः । स तत्र षड्द्रव्यकः । यो नवद्रव्यकः कायेन्द्रियी ।
स सप्तद्रव्यकः । यो दशद्रव्यको ऽपरेन्द्रियः । सो ऽष्टद्रव्यकः । सशब्दकाः पुनरेते
134.14 (2a—8) सप्ताष्टनवद्रव्यका इत्यवगन्तव्यं । **उक्तरूपवान्न पुनरुच्यन्त** इति । उक्तकल्पवान्न
पुनः सूच्यन्त इत्यर्थः ॥

134.15 (2a—9) **किं पुनरत्र द्रव्यमेव द्रव्यमिति** विस्तरः । मुख्यवृत्त्या यद्द्रव्यं यस्य स्वल-
क्षणमस्ति तद्द्रव्यं गृह्यते । **आहोस्विदायतनं** द्रव्यमित्यधिकृतं । आयतनमपि
हि द्रव्यमिति शक्यते वक्तुं । सामान्यविशेषलक्षणसद्भावात् । **किं चातः** । कश्चातो
दोष इत्यर्थः । **यदि द्रव्यमेव द्रव्यं गृह्यते** । यदि रूपपर्यन्तलक्षणं पृथिव्यादि-
134.20 (2a—10) परमाणुद्रव्यं गृह्यते । **अत्यल्पमिदमुच्यते अष्टद्रव्यक** इत्यादि । **संस्थानगुरुत्व-**
135.3 (2b—2) **लघुत्वश्लक्ष्णत्वकर्कशत्वशीतजिघत्सापिपासानां संभवतो** द्रव्यान्तराणां **क्वचि-**
**त्क्वचित्सद्भावात्** । तथा च सति । यो ऽष्टद्रव्यकः । स नवद्रव्यको यावच्चतु-
र्दशद्रव्यक इत्यष्टद्रव्यकनियमो भिद्यते । एवं नवद्रव्यकादिषु योज्यं । एवं रूप-
135.5 (2b—3) धातावपि षट्सप्ताष्टद्रव्यनियमभेदो वक्तव्यः । **चतुर्द्रव्यको हि वक्तव्य** इति ।
**यस्माद्भूतान्यपि** पृथिव्यादीनि **स्प्रष्टव्यायतनं**

स्प्रष्टव्यं द्विविधम्

इति[2] वचनात् । तस्मात्कामे चतुर्द्रव्यको ऽशब्दः । रूपं गन्धो रसः स्प्रष्टव्यमिति ।

---

1 Kārikā I, 30$^{c}$. 2 Kārikā I, 34$^{a}$.

सशब्दस्तु पञ्चद्रव्यक इति वक्तव्यं । **यदाश्रयभूतमिति** । पृथिव्यादीनि चत्वारि । 135.7 (2b—5)
**यदाश्रयिभूतमिति** । रूपं गन्धो रसः स्प्रष्टव्यैकदेशश्च । तदेवं संस्थानस्य रूपे
ऽन्तर्भावात् गुरुत्वादीनां च स्प्रष्टव्य इति नात्यल्पमिदमुच्यते । नाप्यतिबहु ।
आश्रयभूतानां स्प्रष्टव्यायतनान्निःकृष्य चतुर्धा निर्देशात् । **एवमपि भूयान्सीति** 135.9 (2b—6)
विस्तरः । यद्भूतचतुष्कमाश्रय एकस्योपादायरूपस्य नीलस्य पीतस्य वा । न तदे-
वान्यस्योपादायरूपस्य गन्धस्य रसस्य वाश्रयः । किं तर्हि । **अन्यदेव भूतचतुष्कं** 135.11 (2b—7)
**तस्याश्रय** इति वैभाषिकसिद्धान्तः । **तत्र पुनर्ज्ञातिद्रव्यमिति** । भूतचतुष्कज्ञातिरत्र
गृह्यते । या[1] ह्येकस्य **भूतचतुष्कस्य ज्ञातिः** । तामन्यानि भूतचतुष्कानि **नाति-**
**क्रामति** । **एवं विकल्पेन वक्तुमिति** । किंचिदत्र द्रव्यमेव द्रव्यं गृह्यते यदाश्र- 135.13 (2b—8)
यभूतं । किंचिदत्रायतनद्रव्यं गृह्यते यदाश्रयिभूतं । यच्चैतदाश्रयभूतं । तज्ज्ञात्या गृह्यत
इति ॥ **छन्दतो हि वाचां प्रवृत्तिः** । **अर्थस्तु परीक्ष्य** इति । छन्दत इच्छातः
संक्षेपविस्तरविधानानुविधायिन्यो वाचः प्रवर्तन्ते । अर्थस्तु तासां[2] परीक्ष्यः । किमेवं
नियतसहोत्पादानि तानि भवन्ति न भवन्ति वेति । योगाचार[3]चित्तास्तु संघातावस्थाने
भूतानां भौतिकानां च नियमं वर्णयन्ति । कथमित्युच्यते । अस्ति समुदाय एकभौ-
तिकः । तद्यथा शुष्को मृत्पिण्डः । अस्ति द्विभौतिकः स एवार्द्रः । अस्ति त्रि-
भौतिकः स एवोष्णः । अस्ति यावत्सर्वभौतिकः स एवार्द्र उष्णश्च मृत्पिण्डो गम-
नावस्थायामिति । उपादायरूपे ऽपि यदुपादायरूपं यस्मिन् समुदाये उपलभ्यते ।
तत्तत्रास्तीति वेदितव्यं । अस्ति समुदाय एकोपादायरूपिकः । तद्यथा प्रभा । अस्ति
द्व्युपादायरूपिकः । तद्यथा शब्दगन्धो वायुः । त्र्युपादायरूपिकः । तद्यथा धूमः । तस्य
रूपगन्धस्प्रष्टव्यविशेषप्रभावितत्वात् । स्प्रष्टव्यविशेषः पुनरत्र लघुत्वं वेदितव्यं ।

---

1 यो NC, ये T. 2 ताभ्यां MSS.; དེ་དག་གི་. 3 See 瑜伽論 第三 (來 — 13b).

चतुरूपादायरूपिकः[1]। तद्यथा गुडपिण्डः। पञ्चोपादायरूपिकः। तद्यथा स एव सशब्दः। इत्येवमाद्यपि[2] वक्तव्यं ॥ २२ ॥

135.16 (2b–9) **शेषाणां वक्तव्य** इति। चित्तचैत्तानां विप्रयुक्तानां च।

135.17 (2b–10) **चित्तचैत्ताः सहावश्यम्**

इति। न चित्तं चैत्तैर्विना उत्पद्यते। नापि चैत्ता विना चित्तेनेत्यवधार्यते। न तु सर्वं चित्तं सर्वचैत्तै[3]र्नियतसहोत्पादं। नापि सर्वचैत्ताः सर्वचित्तनियतसहोत्पादा इति।

135.18 **सर्वं संस्कृतलक्षणैः**

इति। संस्कृतलक्षणैर्यद्युक्तं तत्सर्वं तैः संस्कृतलक्षणैर्जात्यादिभिरवश्यं सहोत्प-
136.5 (3a–2) द्यते। किं पुनस्तदित्याह। **यत्किंचिदुत्पद्यते रूपं चित्तं चैतसिकाश्चित्तवि-**
136.9 (3a–5) **प्रयुक्ताश्चे**ति। पूर्वमेव ह्यसंस्कृतं बहिष्कृतं। तत्रासंस्कृतं नैवोत्पद्यते इति[4] वचनात्। **विकल्पार्थो वाशब्द** इति। किंचित्प्राप्त्या सहोत्पद्यते यत्सत्त्वसंख्यातं। किंचिन्न यदसत्त्वसंख्यातमिति विकल्पः। प्रतिसंख्याप्रतिसंख्यानिरोधयोर्यद्यपि प्राप्तिरस्ति न तु तावुत्पद्येते इति न तयोर्ग्रहणं। सहोत्पादननियमो ह्ययमारम्भ[5] इति। असत्त्वसंख्यातस्य प्राप्तिर्नास्तीति किमत्र कारणं। सर्वसत्त्वसाधारणत्वात्। सहजयैव च प्राप्त्या प्राप्तिमान् सहोत्पद्यते। न पूर्वपश्चात्कालजयेत्यवगन्तव्यं ॥

136.15, 17 (3a–9, 10) **गतिविषय** इति। उत्पत्तिविषय इत्यर्थः। **महाभूमिका** इति। महत्त्वं सर्वचित्तभवत्वात् ॥ २३ ॥

137.8 (3b–4) **इमे किले**ति। किलशब्दः परमतद्योतने। स्वमतं तु छन्दादयः सर्वचेतसि

---

1 °क्त MSS. 2 °मादिष्व° MSS.; ལ་སོགས་པ་. 3 सर्वचित्त° NC, om. T.; སེམས་ལས་བྱུང་བ་ཐམས་ཅད་. 4 論 四 1a 8. 5 °रम्व T, °रद्ध N.; བརྩམས་པ་ཡིན་ནོ་.

न भवन्ति। तथा ह्यनेनैवाचार्येण पञ्चस्कन्धके[1] लिखितं। छन्दः कतमः। अभिप्रेते
वस्तुनि अभिलाषः। अधिमोक्षः कतमः। निश्चिते वस्तुनि तथैवावधारणमित्या- 137.10 (3b–6)
दि॥ **चेतना चित्ताभिसंस्कार** इति। चित्तप्रस्पन्दः। प्रस्पन्द इव प्रस्पन्द इत्यर्थः। 137.11 (3b–5)
**विषयनिमित्तग्राह** इति। विषयविशेषरूपग्राह इत्यर्थः। **स्पर्श इन्द्रियविषय-** 137.12 (3b–6)
**विज्ञानसन्निपातजा स्पृष्टिरिति**। इन्द्रियविषयविज्ञानानां संनिपाताज्जाता स्पृष्टिः। स्पृष्टिरिव स्पृष्टिः। यद्योगादिन्द्रियविषयविज्ञानान्यन्योन्यं स्पृशन्तीव स स्पर्शः। **धर्मप्रविचय** इति। प्रविचिनोतीति प्रविचयः। प्रविचीयन्ते वा अनेन धर्मा इति प्रविचयः। येन संकीर्णा इव धर्माः पुष्पाणीव प्रविचीयन्ते। उच्चीयन्त इत्यर्थः। इमे सास्रवाः। इमे ऽनास्रवाः। इमे रूपिणः। इमे अरूपिण इति। धर्माणां, प्रविचयः
धर्मप्रविचयः। प्रतीतत्वात् प्रज्ञेति वक्तव्ये श्लोकबन्धानुगुण्येन मतिरिति कारि- 137.14 (3b–7)
कायामुक्तं। **स्मृतिरालम्बनासंप्रमोष** इति। यद्योगादालम्बनं न मनो विस्मरति। तच्चाभिलषतीव। सा स्मृतिः। **मनस्कारश्चेतस आभोग** इति। आलम्बने चेतस
आवर्जनम्। अवधारणमित्यर्थः। मनसः कारो मनस्कारः। मनो वा करोति आवर्ज- 137.15 (3b–8)
यतीति मनस्कारः। **अधिमुक्तिस्तदालम्बनस्य गुणतो ऽवधारणम्**[2]। रुचिरि- 137.15 (3b–9)
त्यन्ये। यथानिश्चयं धारणेति योगाचारचित्ताः। **समाधिश्चित्तस्यैकाग्रतेति**। अग्रमालम्बनमित्येको ऽर्थः। यद्योगाच्चित्तं प्रबन्धेन एकत्रालम्बने वर्तते। स समाधिः। यदि समाधिः सर्वचेतसि भवति। किमर्थं ध्यानेषु यत्नः क्रियते। बलवत्समाधिनिष्पादनार्थं। कथमेकस्मिंश्चित्ते दशानां भिन्नलक्षणानां चैत्तानामस्तित्वं गम्यत इति। अत आह। **सूक्ष्मो हि चित्तचैत्तानां विशेष** इति विस्तरः। स एष विशेषः चित्तचैत्तानां
दुर्लक्ष्यः। **प्रबन्धेष्वपि तावत्। किं पुनः क्षणेषु** कालपर्यन्तलक्षणेषु। **रूपि-** 137.17 (3b–10)
**णीनामपि ओषधीनां** मूर्तानामपि कासांचित् हरीतकीप्रभृतीनां **बहुरसानां** षड्र- 138.1 (4a–1)
**सानामिन्द्रियग्राह्या** जिह्वेन्द्रियग्राह्याः **दुरवधाना** दुःपरिच्छेदा **भवन्ति। किं पुनः**

---

1 大乘五蘊論 (來九 98b).    2 °णात् MSS.

ये धर्मा अमूर्ता बुद्धिग्राह्या मनोविज्ञानमात्रग्राह्याः । तस्मादाप्तोपदिष्टा इति कृत्वा तथैव ते प्रतिपत्तव्या इत्यभिप्रायः ॥ २४ ॥

138.15 (4a—7) श्रद्धा चेतसः प्रसाद इति । क्लेशोपक्लेशकलुषितं चेतः श्रद्धायोगात्प्र-
138.15 (4a—8) सीदति । उदकप्रसादकमणियोगादिवोदकं । सत्यरत्नकर्मफलाभिसंप्रत्यय[1] इत्यपरे इति । आकारेण श्रद्धानिर्देशः । सत्येषु चतुर्षु । रत्नेषु च त्रिषु । कर्मसु च शुभाशुभेषु । तत्फलेषु च इष्टानिष्टेषु । सत्यैवैतानीत्यभिसंप्रत्ययो ऽभिसंप्रतिपत्तिः श्रद्धेति । अप्रमादः कुशलानां धर्माणां भावनेति । भावना नाम कुशलानां प्रति-
138.17 (4a—9) लम्भनिषेवणस्वभावा ।

प्रतिलम्भनिषेवाख्ये शुभसंस्कृतभावने

इति[2] वचनात् । सा कथमप्रमादो नाम चैतसिको भविष्यति । यस्मिन्सति सा प्रतिलम्भनिषेवणभावना भवति । सो ऽप्रमादः तात्पर्यलक्षणः । अत आह । या
139.2 (4a—10) तेष्ववहिततेति । तदेवं सति भावनाहितावयं भावनोपचारः कृत इति । चेतस
139.2 (4a—10) आरक्षेति । यः सांक्लेशिकेभ्य[3]श्चित्तमारक्षते[4] । सो ऽप्रमाद इति । चित्तकर्मण्यते-
139.3 (4b—1) ति । यद्योगाच्चित्तं कर्मण्यं भवति । सा चित्तकर्मण्यता । चित्तलाघवमित्यर्थः ॥
ननु च सूत्रे कायप्रश्रब्धिरप्युक्तेति । कश्च पर्यायो यत्प्रश्रब्धिसंबोध्यङ्गद्वयं भवति । अस्ति कायप्रश्रब्धिः । अस्ति चित्तप्रश्रब्धिः । तत्र यापि कायप्रश्रब्धिः । तदपि प्रश्रब्धिसंबोध्यङ्गमभिज्ञायै संबोधये निर्वाणाय संवर्तते । यापि चित्तप्रश्रब्धिः । तदपि प्रश्रब्धिसंबोध्यङ्गमभिज्ञायै संबोधये निर्वाणाय संवर्तत इति[5] । कथ-

---

1 °प्रत्य MSS.; མངོན་པར་ཡིད་ཆེས་པར་ཡིན་.  2 Kārikā VII, 33ab.

3 °केभ्याश्चि NC, °केत्याश्चि T. ཀུན་ནས་ཉོན་མོངས་པ་དག་ལས་.  4 °रक्षयते MSS.; ཀུན་དུ་སྲུང་བ་.  5 Cf. Saṃyutta-Nikāya V, 111. & 雜阿含 (辰三 56b 1)

मियमेकैवोच्यते प्रश्रब्धिश्चित्तकर्मण्यतेति। **सा तु यथा कायिकी वेदनेति**। यथा
चेतस्यपि वेदना परमाणुसंचयात्मकेन्द्रियाश्रयत्वात् कायिकीत्युच्यते। तथेयमपि प्रश्र-
ब्धिरवगन्तव्या। **कथं सा बोध्यङ्गेषु योद्यते** इति। असमाहितत्वात् पञ्चानां
विज्ञानकायानां पृच्छति। **तत्र तर्हीति** विस्तरः। तत्र सूत्रे कायवैशारद्यमेव 139.8 (4b–3)
कायकर्मण्यता भूतविशेषलक्षणा प्रीत्यध्याहृता। प्रीतमनसः कायः प्रश्रभ्यत इति
वचनात्। **कथं सा बोध्यङ्गमिति**। पृथक्कलापत्वात्सास्रवत्वाच्च न युज्यत इत्य-
भिप्रायः। **प्रीतिः प्रीतिस्थानीयाश्च धर्माः प्रीतिसंबोध्यङ्गमिति** विस्तरः। 139.12 (4b–5)
तीर्थिकाः किल भगवच्छ्रावकानेवमाहुः। श्रमणो भवन्तो गौतम एवमाह। एवं
यूयं भिक्षवः पञ्च निवरणानि प्रहाय चेतस उपक्लेशकराणि प्रज्ञादौर्बल्यकराणि
सप्तबोध्यङ्गानि भावयतेति। वयमप्येवं ब्रूमः। तत्रास्माकं श्रमणस्य च गौतमस्य
को विशेषो धर्मदेशनायाः। तेभ्यो भगवता एतदुपदिष्टं। पञ्च सन्ति दश भवन्ति।
दश सन्ति पञ्च व्यवस्थाप्यन्ते। **प्रतिघः प्रतिघनिमित्तं च** नवाघातवस्तूनि[1] **व्या-**
**पादनिवरणमुक्तं** भगवता। तदानुकूल्यात्। तथा सप्त सन्ति चतुर्दश भवन्ति। 139.14 (4b–6)
चतुर्दश सन्ति सप्त व्यवस्थाप्यन्ते। प्रीतिः प्रीतिनिमित्तं चेत्यनेन[2] भेदेन। तदा-
नुकूल्यादिति। **न च संकल्पव्यायामौ प्रज्ञास्वभावाविति**। तयोर्यथाक्रमं वित-
र्कवीर्यस्वभावत्वात् न तौ प्रज्ञास्वभावौ। यदा च त्रिस्कन्धो मार्गः क्रियते शीलस्कन्धः
समाधिस्कन्धः प्रज्ञास्कन्ध इति। तत्र प्रज्ञास्कन्धनिर्देश उक्तं। प्रज्ञास्कन्धः कतमः।
सम्यग्दृष्टिः सम्यक्संकल्पः सम्यग्व्यायाम इति॥ **उपेक्षा चित्तसमतेति**। यद्यो- 139.19 (4b–8)
गाच्चित्तं सममनाभोगं वर्तते। सोपेक्षा संस्कारोपेक्षा नाम। त्रिविधा हि उपेक्षा
वेदनोपेक्षा संस्कारोपेक्षा अप्रमाणोपेक्षा चेति। **ननु चोक्तं दुर्ज्ञान एषां विशेष** 140.3 (4b–9)
इति। सूक्ष्मो हि चित्तचैत्तानां विशेषः। स एष दुःपरिच्छेदः प्रवाहेष्वपि ताव-

---

1 See 25, 12. 2 Cf. Saṃyutta-Nikāya V, 108 et seq. & 雜阿含(辰三 56a).

140.4 (4b–10) दित्यादि[1]वचनात्। दुःखेन ज्ञायते दुर्ज्ञानः। अस्ति हि नाम दुर्ज्ञानमपि ज्ञायते।
140.4 (5a–1) यद्विरुद्धं एकस्मिंश्चित्तक्षणे धर्मान्तरेण स्पर्शादिना। इदं तु खलु अतिदुर्ज्ञानं यद्विरोधे ऽप्यविरोध इति। आभोगानाभोगयोरेकस्मिंश्चित्तक्षणे अविरोधो व्यवस्थाप्यत इति वाक्यशेषः। न हि विरुद्धयोः सुखदुःखयोरेकस्मिंश्चित्तक्षणे भावो दृष्ट इति। अन्यत्राभोग इति। अन्यत्रालम्बने आभोगः। अन्यत्रानाभोग इत्य-
140.6 (5a–2) विरोधः। एवंजातीयकमत्रान्यदप्यायास्यतीति[2]। विरोधजातीयं यथा वितर्कविचारौ। तयोर्हि लक्षणं चित्तौदारिकता वितर्कः चित्तसूक्ष्मता विचार इति।

वितर्कविचारौदार्यसूक्ष्मते

140.9 (5a–4) इति[3] वचनात्। तयोस्त्वेकत्र चित्ते विरोध इति वक्ष्यते। यस्तस्य नयः। सो ऽस्यापीति। पर्यायेणानयोर्वृत्तिरित्यभिप्रायः। ह्रीरपत्राप्यं च पश्चाद्वक्ष्यते इति।

अह्रीरगुरुतावद्ये भयादर्शित्वमत्रपा

140.13 (5a–5) इति[4] अत्र विपर्ययग्रहणात्। स तु प्रज्ञात्मक इति। स त्वमोहः प्रज्ञास्वभावः।
140.13 (5a–6) प्रज्ञा च महाभूमिकेति।

मतिः स्मृतिर्

इति[5] वचनात्। नासौ कुशलमहाभूमिक एवोच्यते। किं तर्हि। अकुशलादिभूमिको[6] ऽपीति। अविहेठनेति। यद्योगात्परो न विहेठ्यते। साविहिंसा।
140.16 (5a–7) विहिंसाप्रतिपक्षः चैतसिकः। चेतसो ऽभ्युत्साह इति। कुशलक्रियायां यश्चेतसो

---

1 論 四 3[b] 9. 2 °स्यातीति MSS.; འབྱུང་བས་ཞེས་བྱ་བ་ནི.

3 Kārikā II, 33[a]. 4 Kārikā II, 32[ab]. 5 Kārikā II, 24[b]. 6 Sic MSS. ས་ཆེན་པོ་ལ་སོགས་པ་ = ādimahābhūmika.

ऽभ्युत्साहः । **तद्वीर्यं** । यस्त्वकुशलादिक्रियायां[1] चेतसो ऽभ्युत्साहः । नैतद्वीर्यं ।
कौसीद्यमेव तत् । प्रवचने पठ्यते । सीदनात्मकत्वात् । तथा ह्युक्तं भगवता । इतो
बाह्यकानां यद्वीर्यं । कौसीद्यमेव तदिति ॥ २५ ॥

**मोहो नामाविद्या** 141.6 (5b—1)

इति ।

विद्याविपक्षो धर्मो ऽन्यो ऽविद्या

इति[2] पश्चाद्व्याख्यायते । **भावनाविपक्षो धर्म** इति । भावनाया अभावमात्रप्रतिप- 141.8 (5b—2)
त्तिर्मा भूदिति भावनाविपक्ष इत्याह । एवं कौसीद्यादिष्वपि व्याख्येयं । **काय-** 141.11 (5b—4)
**गुरुता चित्तगुरुतेति** । प्रश्रब्धिप्रतिपक्षो धर्मः । **यथा कायिकी वेदनेति** । यथा 141.13 (5b—6)
वेदना रूपीन्द्रियाश्रयत्वात् चैतसिक्यपि कायिकीति व्याख्याता । तथा कायिकं
स्त्यानं पञ्चविज्ञानकायसंप्रयुक्तं स्त्यानं कायिकमित्यच्युते । **औद्धत्यं चेतसो** 141.15 (5b—7)
**ऽव्युपशम** इति । नृत्यगीतादिशृङ्गारवेषालंकारकार्यौ[3]द्धत्यसंनिश्रयदानकर्मकश्चैतसि-
को धर्मः ॥

**न चात्र स्त्यानं पठ्यते** इत्यभिधर्मे । **प्राप्तिज्ञो देवानां प्रियो । न** 141.18 (5b—9)
**विशिष्टज्ञ** इति । पाठप्रामाण्यमात्रेण दशक्लेशमहाभूमिकाः प्राप्ता इत्येतामेव प्राप्तिं
जानीते देवानां प्रियो । न त्वाचार्याणामिष्टिमिच्छां जानीते । को ऽयं देवानां
प्रियो नाम । ऋजुकजातीयो देवानां प्रिय इत्येके व्याचक्षते । अशठो हि देवानां
प्रियो भवति । मूर्खो देवानां प्रिय इत्यपरे ।

यो ह्यीश्वराणामिष्टः स न ताडनेन[4] शिक्षत

---

1 མི་དགེ་བ་བྱ་བ་ལ་ = akuśala-kriyāyāṃ. 2 Kārikā III, 28°.
3 °कायौद्ध° MSS.; རྒྱན་ལ་སོགས་པའི་. 4 Sic. MSS.; གདམས་སྐྱེང་. Query
माठनेन?

142.6 (6a–3) इति मूर्खो भवतीति । **यथैवामोह** इति । यथैवामोहः कुशलमूलं प्रज्ञास्वभावत्वान्महाभूमिक इति व्यवस्थापितो **न कुशलमहाभूमिक एवेत्यवधार्यते** । ततश्च कुशलमहाभूमिकेषु न पठितः । तथा मुषितस्मृत्यादयो ऽपि पञ्चमहाभूमिकत्वात् न क्लेशमहाभूमिका एवेत्यवधार्यन्ते । ततश्च इमे न क्लेशमहाभूमिकमध्ये पठ्यन्ते । कथमि-

142.9 (6a–4) त्याह । **स्मृतिरेव हि क्लिष्टा मुषितस्मृतिता । समाधिरेव क्लिष्टो विक्षेप इत्येवमादीति** । आदिशब्देन प्रज्ञैव क्लिष्टा असंप्रजन्यं । मनस्कार एव क्लिष्टो

142.11 (6a–6) ऽयोनिशोमनस्कारः । अधिमुक्तिरेव क्लिष्टा मिथ्याधिमोक्ष इति दर्शयति । **अत एवोच्यत** इति विस्तरः । यत एवं स्मृत्यादयो मुषितस्मृतितादयो व्यवस्थाप्यन्ते ।

142.13 (6a–7) नैतद्व्यतिरिक्ताः । अत एवोच्यते **चतुष्कोटिक** इति । ये महाभूमिकाः क्लेशमहाभूमिका अपि त इति काक्वा पृच्छति[1] । **चतुष्कोटिकाः । स्युर्महाभूमिका न क्लेशमहाभूमिकाः । स्युः क्लेशमहाभूमिका न महाभूमिकाः । स्युर्महाभूमिकाश्च क्लेश-**

142.15 (6a–8) **महाभूमिकाश्च । स्युर्नैव महाभूमिका न क्लेशमहाभूमिकाः । तृतीया स्मृत्यादय**

142.17 (6a–9) इति । ये मुषितस्मृत्यादयः **पञ्च** यथोक्ताः । एते हि महाभूमिकाः क्लेशमहाभू-

142.19 (6a–10 मिकाश्च । **चतुर्थी एतामाकारां स्थापयित्वे**ति । उक्तनिर्मुक्ता धर्माः कुशलमहाभूमिकादयश्चैतसिका रूपादयश्चान्य इति । **तेषामन्यथा चतुष्कोटिक** इति । **द्वितीयायां कोट्यां विक्षेपः प्रक्षेप्तव्यः । न तु तृतीयायाम् । अत एवं वक्तव्यं । प्रथमा कोटिः पूर्ववत् । द्वितीया आश्रद्ध्यं कौसीद्यं अविद्या औद्धत्यं प्रमादो विक्षेपश्च । तृतीया स्मृत्यादयश्चत्वारः** । मुषितस्मृत्यसंप्रजन्यायोनिशोमनस्कारमिथ्याधिमोक्षा इत्यर्थः । **चतुर्थी पूर्ववत्** । **यत्तूक्तं** न चात्र स्त्यानं पठ्यत इति[2] तान्प्र-

142.19 (6a–10) तिब्रवीति । **स्त्यानं पुनरिष्यत** इति विस्तरः । **तस्यापाठे कस्यापराध** इति । किमस्य स्त्यानस्य अपाठे ममापराधः । किमाभिधार्मिकस्येति । अभिधर्मकारस्या-

---

1 कांक्षापृच्छति MSS.; ཚིག་ཟུར་གྱིས་ཀུན་དུ་འདྲི་བར་བྱེད་པ་ཡིན་ནོ་

2 論 四 5b 9.

यमपराधो । न ममेत्यभिप्रायः । स्त्यानस्य सर्वक्लेशसंप्रयोगित्वेनाभिमतत्वात् । **एवं** 143.1 (6b–1)
**त्वाहुरिति** । तत्र शास्त्रे स्त्यानस्यापाठे कारणमाहुराभि[1]धार्मिकाः । **द्विप्रतरं** 143.3 (6b–2)
**किलेति** । किलशब्दो ऽसंभावनायां । कथं हि नाम क्लिष्टो धर्मः शुक्लस्य समा-
धेरनुगुणो भविष्यति । लयौद्धत्ये हि समाधिपरिपन्थिनी । तत्कथं परिपन्थ्येवा-
नुगुण इति । **न ह्येते जातु सहचरिष्णुतां**[2] **जहीत** इति । न ह्येते स्त्यानौद्धत्ये 143.6 (6b–3
कदाचित्सहचरधर्मतां त्यजत इत्यर्थः । **तथापि यद्यस्याधिमात्रमिति** । एवमपि
च[3] स्त्यानमौद्धत्यं वा यस्य पुद्गलस्याधिमात्रं । स पुद्गलस्तच्चरितः स्त्यानचरित
औद्धत्यचरितो वावगन्तव्यः । क्वचिद्धि कलापे कश्चिद्धर्म उद्भूतो[4] भवतीति । **ना-
न्यत्रेति** । कुशलादिषु ॥ 143.17 (6b–6)

## अकुशले त्वाह्रीक्यमनपत्रपा

143.10, 11 (6b–9)

इति । तुशब्दो विशेषणे अवधारणे वा । अकुशल एवेति ॥ २६ ॥

## परीत्तक्लेशभूमिका

143.15 (7a–6)

इति । परीत्तो ऽल्पकः[5] । को ऽसौ । **अविद्यामात्रं** अविद्यैव केवलेत्यर्थः । **तेनावि-** 144.7 (7a–7)
**द्यामात्रेणेति** नान्येन रागादिना क्लेशेन । **भावनाहेयेनेति** । न दर्शनहेयेन । **मनोभू-
मिकेनैवेति** न पञ्चविज्ञानकायिकेन । यस्मादिमे क्रोधादय उपक्लेशा मनोभूमिका एव
भवन्ति । अतो मनःसंप्रयोगात्परीत्तक्लेशभूमिका उच्यन्ते । रागादिकलापे ह्यवश्यम-
विद्यया भवितव्यमिति न परीत्तो रागादिकः । तदेवं ये सर्वत्र चैतसिके । [6]ते

---

1 °रभि° MSS. 2 °रिष्टतां N, °हेवरिष्टूतां C, °हेवनिष्णानां T; ལྷན་ཅིག་སྤྱོད་པ་ཉིད་. 3 य MSS; एवमपि च = དེ་ལྟ་ཡིན་མོད་ཀྱི་. 4 उद्धृतो MSS.; ཤས་ཆེ་བར་. 5 परीत्तः क्लेशो ऽल्पकः MSS.; ཆུང་ངུའི་ནི་ཆུང་བའོ་.
6 Supplied from Tib. དེ་དག་ནི་.

महाभूमिकाः । ये कुशल एव । ते कुशलमहाभूमिकाः । ये क्लिष्टे निवृते चाकुशले च । ते क्लेशमहाभमिकाः । ये त्वकुशल एव । ते ऽकुशलमहाभूमिकाः । य
144.8 (7a–8) परीत्तक्लेशसंप्रयुक्ते चेतसि । ते परीत्तक्लेशभूमिकाः[1] । **एषां तु निर्देश उपक्लेशेषु करिष्यत** इति अनुशयनिर्देशे ॥ २७ ॥

145.4 (7a–9) **अन्ये ऽपि चानियता** इति । ये कदाचित्कुशले [2]कदाचिदकुशले[2] कदा-
145.3 (7a–10) चिदव्याकृते चेतसि भवन्ति । **मिद्धादय** इति । आदिशब्देनारतिविजृंभिकातन्द्रीभक्तेऽसमतादय उपक्लेशाः क्लेशाश्च रागदयो ऽप्यनियतत्वेन गृह्यन्ते । न ह्येते रागादयः पञ्चानां प्रकाराणां अन्यतमस्मिन्नियता भवन्ति । न महाभूमिकास्सर्वत्र चेतस्यभावात् । न कुशलमहाभूमिकाः कुशलत्वायोगात् । न क्लेशमहाभूमिकाः सर्वत्र क्लिष्टे तदभावात् । न हि सप्रतिघे चेतसि रागो भवति सरागे च चेतसि प्रतिघः । इति एवमन्ये ऽपि क्लेशा वक्तव्याः । अत्राचार्यवसुमित्रः संग्रहश्लोकमाह ।

वितर्कचारकौकृत्यमिद्धप्रतिघसक्तयः
मानश्च विचिकित्सा चेत्यष्टावनियताः स्मृता

इति । तदिदमष्टानियमवचनं[3] न बुध्यामहे । दृष्टयो ऽपि कस्मान्नानियता इष्यन्ते । न हि सप्रतिघे सविचिकित्से वा चित्ते मिथ्यादृष्टिः प्रवर्तते ।

आवेणिकत्वे ऽकुशले दृष्टियुक्ते च विंशतिः
क्लेशैश्चतुर्भिः क्रोधाद्यैः कौकृत्येनैकविंशतिर्

इति[4] वचनात् । तस्माद्यद्वा तदिदमुक्तमिति पश्यामः ॥

145.5 (7b–6) **कामावचरं तावत्पञ्चविधमिति । कुशलमेकं । अकुशलं द्विविधम् आवे-**

---

1 Corrected by Tib. °शमहाभूमिकाः MSS. 2..2 Om. MSS.; ངེས་ འགའ་ཞིག་མི་དགེ་བ་ལ་. 3 °मष्टनि° MSS.; མ་ངེས་པར་. 4 Kārikā II, 29.

णिकमविद्यामात्रसंप्रयुक्तं रागाद्यन्यक्लेशसंप्रयुक्तं च । अव्याकृतमपि द्विविधं ।
निवृताव्याकृतं सत्कायान्तग्राहदृष्टिसंप्रयुक्तं । अनिवृताव्याकृतं च विपाकजा- 145.9 (7b–8)
दीति ॥ २८ ॥

कुकृतभावः कौकृत्यमिति । अर्थस्य कुकृतस्य धर्मः । स तु[1] चैतसिक इति न 145.17 (8a–1)
संबध्यते । तस्मादाह । इह तु पुनः कौकृत्यालम्बनो धर्म इति । किंस्वभाव
इत्याह । चेतसो विप्रतिसार इति । यदि कौकृत्यालम्बनो धर्मः कौकृत्यमुच्यते
तत्संप्रयुक्ता अप्यन्ये चित्तचैत्ताः कौकृत्यं प्राप्नुवन्ति । न प्राप्नुवन्ति । तेषामप्रा-
धान्यात् । विप्रतिसारावस्थायां हि कौकृत्यलक्षणं चैतसिकं कौकृत्याकारमुद्भूत-
वृत्तिकम् । अन्ये चित्तचैत्तास्तदाकारेणानुवर्तन्ते । कस्यचिदेव हि धर्मस्य कस्मिं-
श्चिच्चित्तकलापे प्राधान्यमिति वर्णयन्ति । शून्यतालम्बनविमोक्षमुखं शून्यते- 145.19 (8a–2)
ति । स्कन्धानामन्तर्व्यापारपुरुषरहितालम्बनं विमोक्षमुखं समाधिविशेषः शून्यते-
त्युच्यते । विनीलकव्याध्मातकाद्य[2]शुभालम्बनः अलोभः अशुभेत्युच्यते । [3]भावना-
संबद्धत्वात् स्त्रीलिङ्गनिर्देशः अशुभाभावनेति[3] । तथेहापि कौकृत्यालम्बनश्चैतसिको धर्मः
कौकृत्यमिति । स्थानेन स्थानिनामतिदेशः । सर्वो ग्राम आगत इति । सभू- 146.3 (8a–3)
मिकः शालासमुदायो ग्रामः । स्थानिषु मनुष्येष्वागतेषु वक्तारो भवन्ति । सर्वो
ग्राम आगत इति । एवं सर्वो देश आगत इति । स्थानभूतं च कौकृत्यं 146.3 (8a–4)
विप्रतिसारस्येति । विप्रतिसारालम्बनत्वात् । तस्माद्युक्तस्तथानिर्देशः । फले वा
हेतूपचार इति । हेतुः कौकृत्यं । फलं विप्रतिसारः । तस्मिन्फले हेतुरुपचर्यते ।
हेतुवाचकेन शब्देन फलमुच्यत इत्यर्थः । यथा षडिमानि स्पर्शायतनानि पौ- 146.5 (8a–6)
राणं कर्मेति । पूर्वजन्मकृतस्य पौराणस्य कर्मणश्चक्षुरादीनि षट्स्पर्शायतनानि
फलानि । तेषु यथा कर्मोपचर्यते । तद्वत् । यत्तर्ह्यकृतालम्बनं तत्कथं कौकृ-

---

1 न MSS.; ནི་.   2 °व्याध्यात्मकाद्य° NT.; རྣམ་པར་བམ་པ་ལ་སོགས་པ་ལ་.   3 ... 3 Om. Tib.

146.8 (8a—7) त्यमिति । यदकृतं तन्न कृतमिति मत्वा चोदयति । **अकृते ऽपि कृताख्या भव-**
146.8 (8a—8) **तीति** । अकृते ऽप्यर्थे कृतशब्दप्रयोगो भवति । कथमित्याह । **न साधु मया**
146.10 (8a—9) **कृतं यत्तन्न कृतमिति** । कृतमिव तदिति कृत्वा । **यत्कुशलमकृत्वा तप्यत** इति । यत् कुशलं दानादिकं अकृत्वा तप्यते पश्चात्तापीभवति । तत्कुशलं । **अकुशलं च कृत्वा** । किं । तप्यत इति अधिकृतं । यच्चाकुशलं प्राणातिपातादिकं कृत्वा तप्यते । तदपि कुशलं । **विपर्ययादकुशलं** । यदकुशलमकृत्वा तप्यते । कुशलं च कृत्वेति । यत्पापमकृत्वा पश्चात्तापीभवति । न साधु मया कृतं यत्तन्न कृतमिति । तदकुशलं कौकृत्यं । यच्च कुशलं दानादिकं कृत्वा पश्चात्तापीभवति । न साधु मया कृतं यद्दानादिकं कृतमिति । तदप्यकुशलं । **तदेतदुभयमपि उभयाधिष्ठानं भवतीति** । तदेतत्कौकृत्यं उभयमपि कुशलं चाकुशलं च उभयाधिष्ठानं भवति यथोक्तेन विधानेन ॥

144.15 (7b—3) **आवेणिक**

इति । रागादिपृथग्भूत इत्यर्थः ।

144.16 **दृष्टियुक्ते च**

147.1 (8b—4) इति । चशब्दः अकुशल इत्यनुकर्षणार्थः । **मह्राभूमिक एव कश्चित्प्रज्ञाविशेषो**
147.2 (8b—6) **दृष्टिरिति** । संतीरिका या प्रज्ञा । सा दृष्टिः । सा चेह्राकुशला गृह्यते । तस्मा-दाह **मिथ्यादृष्टिश्चे**त्यादि ।

145.2 (7b—4) **कौकृत्येनैकविंशतिर्**

इति । कौकृत्येन चेति लुप्तनिदष्टश्चकारो[1] द्रष्टव्यः ।

**क्लेशैश्चतुर्भिर्**

---

1 Sic MSS.; མི་མངོན་པར་བསྟན་པར་ Qu. °निर्दिशश्च° ?

इत्यादिषु प्रत्येकं वाक्यपरिसमाप्तिर्वेदितव्या । न हि रागादयः परस्परेण संप्र-
युज्यन्त इत्याभिधार्मिकाः । **स च क्लेश आवेणिकोक्ताश्च विंशतिरिति** । दश 147.8 (8b–7)
महाभूमिकाः[1] षट् क्लेशमहाभूमिकाः द्वावकुशलमहाभूमिकौ वितर्कौ विचारश्चेति
विंशतिः । स च क्लेशो रागः प्रतिघो मानो विचित्सा चेत्येकविंशतिः । एक-
विंशतिर्भवत्येवेति क्रियावधारणमवगन्तव्यं । **क्रोधादिभिरपीति** । 147.9 (8b–8)

क्रोधोपनाहशाठ्येर्ष्याप्रदास[2]म्रक्षमत्सरा

मायामदविहिंसाश्च

इति[3] । एभिरपि **संप्रयुक्ते चित्ते एकविंशतिरेव चैतसिकाः** । ते चावेणिकोक्ताः 147.11 (8b–9)
पूर्ववत्स **चोपक्लेशः** क्रोधो वा यावद्विहिंसा वेति[4] । **कौकृत्येन च संप्रयुक्ते** । ते च 147.11 (8b–10)
पूर्वोक्ताः तच्च **कौकृत्यं** इत्ये**कविंशतिः** । कौकृत्यमपि ह्युपक्लेशः स्वतन्त्रमिष्यते ।
**समासत आवेणिक** इति विस्तरः । अविद्यामात्रसंप्रयुक्ते **चेतसि अकुशले दृष्टि-** 147.13 (9a–1)
**संप्रयुक्ते चाकुशले विंशतिः** । **अन्यक्लेशोपक्लेशसंप्रयुक्ते** त्वकुशल **एवैकविं-** 147.14 (9a–2)
**शतिः** ॥ २९ ॥

**निवृताव्याकृतमिति** । क्लेशाच्छादितं कुशलाकुशलत्वेन अव्याकृतं यत् । 148.3 (9a–4)
तन्निवृताव्याकृतम् । अनाच्छादितं **त्वनिवृताव्याकृतं** विपाकजैर्यापथिकशैल्पस्था- 148.7 (9a–6)
निकनैर्माणिकस्वभावं । **बहिर्देशका अव्याकृतमपि कौकृत्यमिच्छन्तीति** । कश्मीर- 148.10 (9a–7)
मण्डलाख्ये बहिर्देशस्थिताः । ते बहिर्देशकाः । **त्रयोदशेति** । क्वचिदनिवृताव्याकृते 148.12 (9a–8)
कौकृत्यं त्रयोदशममधिकं प्रक्षिप्य । **मिद्धं** प्रचलाय[5]मानावस्थायां स्वप्नदर्शनाव- 148.14 (9a–9)

---

1 भूमिकाः MSS.; ས་མང་པོ་པ་. 2 प्रहास MSS.; ཚིག་. See Mahāvyutpatti CIV, 43 & Dharmasaṃgraha XXX. 3 Kārikā II, 27$^{ab}$. 4 चेति MSS.; वा यावद्विहिंसा वेति = འམ་རྣམ་པར་འཚེ་བའི་བར་ལས་གང་ཡང་རུང་བ་ཞིག་. 5 °चलोय° N; प्रचलायमान = རྨུ་རྨུའི་.

स्यायां वा कुशलाकुशलाव्याकृतत्वादिति । शास्त्रे[1] वचनात् । कथं मिद्धं कुशलं वक्तव्यम[2]कुशलं वक्तव्यम[2]व्याकृतं वक्तव्यमिति । आह । कुशलं वक्तव्यमकुशलं
148.17 (9a–10) वक्तव्यमव्याकृतं वक्तव्यमिति । **यत्र द्वाविंशतिस्तत्र त्रयोविंशतिरिति** विस्तरः । यत्र द्वाविंशतिश्चैतसिका इत्युक्तं । तत्र तन्मिद्धं त्रयोविंशं । त्रयोविंशतेः पूरणमित्यर्थः । **यत्र त्रयोविंशतिः** कौकृत्यमधिकं क्वचिदिति । तत्र तन्मिद्धं **चतुर्विंशम्** । एवं यावदन्यत्र द्वादशाव्याकृते मता मिद्धं त्रयोदशं वक्तव्यं । वहिर्देशकमतेन तु कौकृत्याधिके चतुर्दशं मिद्धं भवतीति योज्यं ॥ ३० ॥

149.7 (9b–5) **अतो यथोक्तादिति** । अतो यथावर्णिताच्चैत्तसङ्ख्योत्पादनियमात् । **कौकृत्यं मिद्धं च सर्वथा नास्तीति** । न कुशलं नाप्यव्याकृतं । कुत एवाकुशलमिति ।
149.8 (9b–6) सर्वथा मिद्धं कौकृत्यं च नास्ति । **शाठ्यमदमायावर्ज्या** इति ।

माया शाठ्यं च कामाद्यध्यानयोर्ब्रह्मवञ्चनात्[3]
स्त्यानौद्धत्यमदा धातुत्रय

149.10 (9b–7) इति[4] वचनात् । एतानि वर्ज्यन्ते तेषां तत्र सद्भावात् । **अन्यत्सर्वं तथैवेति** । कुशले चित्ते पूर्ववत् द्वाविंशतिः । आवेणिके दृष्टियुक्ते च निवृताव्याकृते ऽष्टादश कामधातुवत् । रागमानविचिकित्सान्यक्लेशसंप्रयुक्ते मायाशाठ्यमदोपक्लेशसंप्रयुक्ते च एकान्नविंशतिः । ते च स च क्लेश उपक्लेशो वा तत्रैकान्नविंशो भवति । अनिवृता-
149.3 (9b–8) व्याकृते विपाकजैर्यापथिकनैर्माणिके पूर्ववत् द्वादश ।

**ध्यानान्तरे वितर्कश्च**

149.12 (9b–8) इति । कौकृत्यमिद्धाकुशलानि चेति चशब्दः । किं । न सन्तीत्यधिकृतं । **शेषं**

---

1 發智論 (秋五 8a 16). 2..2 Om. MSS.; supplied from Tib. 3 °ब्रह्मचर्यवं° MSS.; ཚངས་པ་འདྲིད་ཕྱིར་རོ་. 4 Kārikā V, 52cd.

**तथैव** वितर्कन्यूनं **यथा प्रतिसिद्धं** नास्तीति । कौकृत्यमिद्धाकुशलवितर्का न 149.15 (9b–9)
सन्तीत्यर्थः । **विचारश्च मायाशाठ्यं** चेत्यपिशब्दादिति । विचारश्चेति एतावति
वक्तव्ये[1] विचारश्चापीत्यपिशब्दाधिक्यादर्थाधिक्यमिति । मायाशाठ्यमपि तत्र ना-
स्तीत्ययमपरार्थो लभ्यते । मदस्तु नापास्यते ।

स्त्यानौद्धत्यमदा धातुत्रय

इति[2] वचनसामर्थ्यात् । **शेषं तथैवेति** । कुशले वितर्कविचारनिर्मुक्ता[3] विंशतिः । 149.16 (9b–10)
आवेणिके दृष्टियुक्ते षोडश । रागादिक्लेशसंप्रयुक्ते मदोपक्लेशसंप्रयुक्ते च सप्तदश । दश
महाभूमिकाः षट् क्लेशमहाभूमिकाः स च क्लेशः स वोपक्लेशः[4] । अनिवृताव्याकृते
दश महाभूमिका[5] एवेति गणनीयं । **ब्रह्मणो हि यावच्छाठ्यमिति** विस्तरः । 149.16 (9b–10)
तत्र शाठ्यपूर्वकत्वान्मायापि गृहीता भवति । **पर्षत्संबन्धात्** । **नोर्ध्वमिति** । येषां
पर्षदस्ति । तेषां पर्षद्ग्रहणार्थं मायाशाठ्यं प्रवर्तते । अष्टौ पर्षदः पठ्यन्ते । क्षत्रिय-
पर्षत् ब्राह्मणपर्षत् गृहपतिपर्षत् श्रमणपर्षत् चातुर्महाराजिकपर्षत् त्रयस्त्रिंश-
त्पर्षत् मारपर्षत् ब्रह्मपर्षत् । तासामन्यतमो ऽपि ऊर्ध्वमतो नास्तीति माया-
शाठ्याभावः । ब्रह्मणस्तु पर्षदस्ति । तस्मादाह । **स हि स्वस्यां पर्षदि निषण्णो**
**ऽश्वजिता भिक्षुणा** ब्रह्मलोकगतेन **प्रश्नं पृष्टः** । **कुत्रेमानि चत्वारि महाभू-** 149.18 (10a–1)
**तानि अपरिशेषं निरुध्यन्त** इति । **अप्रजानन्**नारूप्यधातौ चत्वारि महाभूतानि 150.1 (10a–2)
अशेषं निरुध्यन्त इत्यनवबुध्यमानः **क्षेपं** कथाप्रकरणम**कार्षीत्** । **अहमस्मि ब्रह्मे-** 150.2 (10a–3)
ति विस्तरः । ब्रह्मेत्युक्त्वा **महाब्रह्मेति** वचनं ब्रह्मान्तरेभ्य आत्मनो विशिष्ट-

---

1 °व्यं MSS. 2 Kārikā V, 52[d]. 3 °क्तो N, °क्त C. 4 चोप° MSS.; स च क्लेशः स वोपक्लेशः = ཉོན་མོངས་པ་དེ་འམ་ཉེ་བའི་ཉོན་མོངས་པ་དེ་དང་.
5 °काय NT, °काः य C; Tib. has no equivalent for य.

त्वप्रदर्शनार्थं । ईश्वर ईशनशीलः । कर्ता निर्माता स्रष्टा [1]सृज इति[1] पर्याया उत्त-
रोत्तरव्याख्यायोगो वा । पितेव पितृभूतः । केषां । भावानां[2] ॥
150.6 (10a–4) उक्तमेतदिति विस्तरः । या भूमिर्यच्चित्तं यावत्तस्य चैत्ताः । सा भूमि-
स्तच्चित्तं तावत्तस्य चैत्ता इत्युक्तमेतत् ॥ ३१ ॥
150.13 (10a–8) [3]तत्र[3] विक्लितमिति । शास्त्रे विक्लितं । तत्र विक्लितमिति केचित्प-
ठन्ति । स एव चात्रार्थः । गुणेषु गुणवत्सु चेति । स्वपरसांतानिकेषु
मैत्रीकरुणादिषु । गुणेषु गुणवत्सु च पुद्गलेषु आचारगोचर[गौरवादि][4]संपन्नेषु ।
यद्योगाद्गौरवं न करोति । असावगौरवता । नास्ति गौरवमस्येत्यगौरवः ।
तद्भावः अगौरवता । चैतसिकविशेषः । को ऽसाविति पर्यायावाङ्कः । अप्रती-
150.14 (10b–1) शता अभयवशवर्तितेति । शिष्यं प्रति ईष्ट इति प्रतीशः गुरुस्थानीयः ।
नास्ति प्रतीशो ऽस्येति अप्रतीशः । तद्भावः अप्रतीशता । भावाभिधानेन चैत्तो
गृह्यते । भयं नाम मानसश्चैत्तो धर्मः । भयेन वशे वर्तितुं शीलमस्येति भयव-
शवर्ती । न भयवशवर्ती अभयवशवर्ती । तद्भावो ऽभयवशवर्तिता । तदेव चा-
ह्रीक्यं । नास्ति ह्रीरस्येत्यह्रीकः । तद्भाव आह्रीक्यं स च गौरवप्रतिद्वन्द्वो
धर्मः । न तदभावमात्रं ।

150.13 (10a–10) **अवद्ये भयादर्शित्वमत्रपा**

---

1 .. 1 सृजेति N, सृज इति T; Tib. has Simply iti here, but cf. infra 238[b] where it gives འབྱིན་བྱེད་དོ་ and the corresponding word of the Bhāṣya (edited by prof. Th. Stcherbatsky) p. 150 read འབྱིན་པ་པོའི། Qu. सृज for सर्ग? 2 भा-वनां N, यावेनां T. 3 .. 3 Tib. has here: གཞུང་ལས་སེམས་ལས་བྱུང་བ་ཁ་ཅིག་ཐ་དད་དུ་བྱ་བ་འབྱུང་བ་ = ग्रन्थे केषांचिच्चैत्तानां नानाकरणं विक्लितम् (?) This reading agrees with Paramārtha's translation of the Bhāṣya. 4 Sic MSS.; om. Tib.

इति । अवाच्यमवद्यम् अतश्चाह । **अवद्यं नाम यद्गर्हितं सद्भिरिति** । **तत्राभयद-** 150.16 (10b–2)
**र्शिता अनपत्राप्यमिति** । अवद्ये ऽनिष्टफलादर्शितेत्यर्थः । **भीयते ऽस्मादिति** । 150.18 (10b–3)
**अत्र** भयशब्दो ऽपादानसाधनः । तस्माद्भयशब्देन **अनिष्टं फलमुच्यते** । **अभयस्य** 151.2 (10b–4)
**दर्शनं अभयदर्शितेति** विस्तरः । यदि तावदेवं क्रियेत । न भयमभयं । अभयं
द्रष्टुं शीलमस्येति अभयदर्शी । तद्भावो ऽभयदर्शितेति । **प्रज्ञा विज्ञास्यते** । प्रज्ञया 151.4 (10b–5)
हि अभयं पश्यति । अथ पुनरेवं क्रियेत[1] । भयं द्रष्टुं शीलमस्येति भयदर्शी । **न** 151.5 (10b–6)
**भयदर्शी** अभयदर्शी । तद्भावो ऽभयदर्शिता । अभयदर्शितेति **अविद्या विज्ञास्यते** ।
तथा ह्यविद्यायोगाद्भयं न पश्यति । **नैव हि दर्शनं दर्शितेति** विस्तरः । न 151.7 (10b–7)
प्रज्ञा नाप्यविद्या । किं तर्हि । **तयोः** प्रज्ञाविद्ययोर्यो **निमित्तं उपक्लेशः** ।
तदभयदर्शन । **तच्चानपत्राप्यमिति** । अपत्रपते ऽनेनेत्यपत्राप्यं[2] । कृत्यल्युटो बहुल-
मिति[3] करणे ण्यत्[4]प्रत्ययः । न अपत्राप्यं अनपत्राप्यमिति ।

ह्री लज्जायां त्रपूष् लज्जायामित्ये[5]कार्थयोरनयोर्धात्वोः कथमर्थान्तरे वाचकत्व-
मिति अपरितुष्यन्तो ऽन्ये पुनराहुः **आत्मापेक्षयेति** विस्तरः । **एवमपि द्वे अपेक्षे** 151.8 (10b–7)
**युगपत्कथं सेत्स्यत** इति । अस्मिन्नपि पक्षे युगपदपेक्षाद्वयासंभव इति पश्यंश्चोदक 151.11 (10b–9)
आह । एवमपीति । अपिशब्देन अयमपि पक्षो दुष्यतीत्यभिप्रायः । आह्रीक्यमन-
पत्राप्यं चैकस्मिंश्चित्ते कथं भवत इति मत्वा चोदयति । द्वे अपेक्षे युगपत्कथं
सेत्स्यत इति । **न खलूच्यते युगपदात्मानं परं चापेक्षत** इति विस्तरः । 151.12(10b–10)
पर्यायेण वृत्तिमनयोर्दर्शयति । **कस्यचिद्धि दोषैरात्मानमपेक्षमाणस्यापि न प्रव-** 151.14 (11a–1)
**र्तते लज्जा** । **कस्यचित्परमपेक्षमाणस्येति** ॥ **विपर्ययेण ह्रीरपत्राप्यं चेति** 151.16 (11a–2)
विस्तरः । **प्रथमेन तावत्कल्पेन**

---

1 क्रियते MSS. But cf. the preceding line. 2 °पतेत्यनेनेत्य° MSS.; འདིས་ཁྲེལ་ཡོད་པར་བྱེད་པས་ན་. 3 Pāṇini, 3, 3, 113. 4 ṇyat denotes a suffix ya. 5 Sec Dhātupāṭha 3, 3 & 1, 399.

अह्रीरगुरुतावद्ये भयादर्शित्वमत्रपा

151.19 (11a–3) इत्यनेन । **सगौरवतेति** विस्तरेण **भयदर्शिता अपत्राप्यमिति** । भयदर्शितानि-
मित्तमपत्राप्यमित्यर्थः । **द्वितीयेन कल्पेन** आत्मापेक्षया दोषैरलज्जनं आह्रीक्यं
151.20 (11a–4) परापेक्षयानपत्राप्यमिति अनेन **आत्मापेक्षया दोषैर्लज्जनं ह्रीः** । **परापेक्षयाप-
त्राप्यमिति** । एवमपि द्वे अपेक्षे इति विस्तरेण चोद्यपरिहारौ वक्तव्यौ ।
प्रेमगौरवयोरेकत्वं मन्यन्ते केचित् । तस्मादनयोर्नानाकरणप्रदर्शनार्थमाह

150.9 (10a–8) **प्रेम श्रद्धा**

152.2 (11a–5) इति । प्रेमैव श्रद्धा न गौरवं । न तु श्रद्धैव प्रेम । तेनाह **द्विविधं हि प्रेम क्लिष्ट-
152.6 (11a–7) मक्लिष्टं चेत्यादि** । **स्याच्छ्रद्धा न प्रेमेति** चतुष्कोटिकः । दुःखसमुदयसत्ययोः
श्रद्धैवाभिसंप्रत्ययरूपा[1] । न प्रेम अस्पृहणीयत्वात् । **स्यात्प्रेम न श्रद्धेति** । प्रिय-
तारूपा तृष्णा । नाभिसंप्रत्ययरूपेति श्रद्धा न भवति । **उभयं** श्रद्धा च प्रेम
152.9 (11a–8) च । अभिसंप्रत्ययरूपत्वात्स्पृहणीयत्वाच्च **निरोधमार्गसत्ययोस्त**दुभयात्मकं भवती-
त्यर्थः । **नोभयमेतानाकारान्स्थापयित्वेति** । अन्ये चैतसिका वेदनादयः विप्रयु-
152.11 (11b–2) क्तादयश्च । एवं धर्मालम्बनस्य प्रेम्णः श्रद्धायाश्च[2] चतुष्कोटिकं कृत्वा पुद्गलालम्ब-
152.12 (11b–3) नस्य चतुष्कोटिकं करोति । **पुद्गलेष्विति** विस्तरः । तत्र सार्द्धं विहरन्तीति
**सार्द्धविहारिणः** शिष्याः । ये प्रव्रजिताः गुरोरन्ते वसन्तीति **अन्तेवासिनः** निश्र-
याध्ययनसंबन्धिनः । तेषु **पुत्रादिषु प्रेम न गौरवं** क्लिष्टमक्लिष्टं चेति संभवतः ।
152.13 (11b–4) **गौरवं न प्रेम** ।

गुरुत्वं ह्रीर्

इति वक्ष्यमाणलक्षणं गौरवं । न प्रेम गौरवस्थानत्वात् । **उभयं** प्रेम गौरवं च ।
152.15 (11b–5) तदुभयात्मकं भवतीत्यर्थः । **नोभयमेतानाकारान्स्थापयित्वा** । यो ऽन्यो जनो

---

1 °प्रत्ययरू° MSS. 2 °याश्चतुः° MSS.; च is supplied from the Tib.

ऽसंबद्धो निर्गुणः । तत्र न प्रेम न गौरवमिति । **तत्पूर्विका च[1] प्रियता प्रेमे-** 152.17 (11a–9)
ति । गुणसंभावनापूर्विका प्रियता तच्च प्रेम । **तस्मान्न सैव श्रद्धा प्रेमे**त्याचार्यः ।

## **गुरुत्वं ह्रीर** 150.9 (10a–8)

इति । **यथोक्ता ह्रीः सगौरवता** सप्रतीशता सभयवशवर्तितेत्युक्ता । या ह्रीः । 152.19 (11a–10)
तद्गौरवं । तदेवं प्रेम श्रद्धालक्षणं भवति । ह्रीलक्षणं तु गौरवम् । इत्युक्तं
तयोर्नानाकरणं । **एवं सप्रतीशतापीति** एवं ह्रीरपि । धर्मेषु च पुद्गलेषु च । 153.6 (11b–8)
**ये पुद्गलालम्बने श्रद्धाह्रियौ** । ते तत्र न स्त इति । पुद्गलालम्बने श्रद्धा-
ह्रियावधिक्रियेते[2] ययोरैक्यं मन्यते । ते **आरूप्यधातौ[3] न स्तः** । कामरूप्यधा-
त्वोरेव भवत इत्युक्तं ॥ ३२ ॥

**कथं पुनरनयोरेकत्र चित्ते योग** इति । न हि तदेव चित्तं तद्योगादौदारिकं 153.17 (12a–3)
च सूक्ष्मं च युज्यते विप्रतिषेधात् । **निष्ठ्यूतमिति**[4] निःपूर्वस्य ष्ठीवते निष्ठायामेतद्रूपं[4]
निष्ठ्यूतं[5] । निरस्तमित्यर्थः । **नातिश्यायते** नातिघनीभवति । **नातिविलीयते** नातिद्र- 154.1 (12a–4)
वीभवति । **नातिसूक्ष्मं भवति नात्यौदारिकमिति** । मध्यमावस्थमित्यर्थः । **एवं** 154.2 (12a–5)
**तर्हि निमित्तभूताविति** विस्तरः । **यथोदकातपौ सर्पिषः श्यानत्वविलीनत्वयो-** 154.5 (12a–6)
**र्निमित्तभूतौ । न तु पुनस्तत्स्वभावौ** श्यानत्वविलीनत्वस्वभावौ । **एवं वितर्कवि-**
**चारौ** चित्तस्य**औदारिकतासूक्ष्मतयोर्निमित्तभूतौ** । न तु पुनरौदारिकसूक्ष्मता-
स्वभावाविति । अत एवं वक्तव्यं[6] । चित्तौदारिकताहेतुर्वितर्कः । चित्तसूक्ष्मताहेतु-
र्विचार इति । ब्रूयास्त्वमभ्युपगमाददोष एष इति । तत इदं दोषान्तरमाह । **आपे-** 154.8 (12a–7)
**क्षिकी चौदारिकसूक्ष्मतेति** विस्तरः । **भूमिप्रकारभेदात्** । भूमिभेदात्प्रकारभेदाच्च ।

---

1 Sic MSS.; དེ་. Qu. हि? 2 °क्रियते MSS. 3 ... 3 चारूप्य° MSS.; དེ་དག་...གཟུགས་མེད་པའི་ཁམས་ན་. 4 ... 4 Om. Tib. 5 निष्ठा° NT.
6 च व्यक्तं N; བརྗོད་དགོས་སོ་.

भूमिभेदात्तावत् प्रथमध्यानमपेक्ष्य कामधातुरौदारिको महाभिसंस्कारतरत्वात् । का-
मधातुमपेक्ष्य प्रथमं ध्यानं सूक्ष्ममल्पाभिसंस्कारतरत्वात् प्रशान्तमिति । तदेव पुन-
154.9 (12a—8) र्द्वितीयं ध्यानमपेक्ष्य औदारिकं । एवं **यावद्भवाग्रं** सूक्ष्मं । प्रकारभेदादपि तस्या-
मेव भूमौ आपेक्षिक्यावौदारिकसूक्ष्मते । तद्यथा य एव ते त्रयः क्लेशानां मूल-
प्रकारा मृदुमध्याधिमात्रा । गुणानां च कामधातौ यावद्भवाग्रे । तेषामधिमात्रः
क्लेश औदारिकः मृदुः सूक्ष्मः । क्लेशविपर्ययेण गुणानामिति । एवं भूमिप्रकारभे-
देनापेक्षिक्यावौदारिकसूक्ष्मते । इत्याभवाग्रा**दौदारिकसूक्ष्मते स्यातां** । अनिष्टं
चैतत् । वितर्कविचारयोः कामधातुप्रथमध्यानभूमिकत्वादिति । **न चौदारिकसूक्ष्म-
तया जातिभेदो युक्त** इति । वितर्कविचारयोर्जातिभेद इष्यते । अन्यो वितर्को
ऽन्यो विचार इति । न चौदारिकत्वेन सूक्ष्मत्वेन च वितर्कविचारयोर्यथाक्रमं
स्वभावभेदो युक्तः । किं कारणं । जातिभिन्नयोर्हि वेदनासंज्ञयोरौदारिकसूक्ष्मता भव-
ति । न च पुनरौदारिकसूक्ष्मतयैव तयोः स्वभावभेदः । किं तर्हि । अनुभवलक्ष-
154.11 (12a—9) णतया निमित्तोद्ग्रहणलक्षणतया च तयोः स्वभावभेदः । तस्मादप्यनयोर्नास्ति लक्षणं ॥
154.12 (12a—10) **अन्ये पुनराहु**रिति सौत्रान्तिकाः । **वाक्संस्कारा** इति । वाक्समुत्थापका इत्यर्थः ।
**वितर्क्य विचार्य वाचं भाषते नावितर्क्य नाविचार्येति**[1] । वितर्कविचारैरेवं[2]
154.14 (12b—1) चेवं च भाषिष्य इति । **तत्र ये औदारिकास्ते वितर्का** वाक्संस्काराः । कर्मणा
स्वभावो द्योतितो । न शक्यमन्यथा स्वलक्षणं प्रदर्शयितुम् । इत्येवं **सूक्ष्मास्ते
विचाराः** । एतस्यां कल्पनायां समुदायरूपा वितर्कविचाराः पर्यायभाविनश्च भव-
न्ति । चित्तचैत्तकलापस्य वाक्समुत्थापकत्वात् । कथं पुनरनयोरेकत्र चित्ते योग
इत्युक्तं । अतो वैभाषिक आह । **यदि चैकत्र चित्ते ऽन्यो धर्म औदारिक**
इति विस्तरः । एकत्र चित्ते वितर्क औदारिकस्वभावो ऽन्यो धर्मो । विचारस्तु

---

1 MSS. add here वितर्क्य विचार्येति but preferring to the Tib. they are left out. 2 °रैरेवं NT, °रेरेवं C.

सूक्ष्मस्वभावो ऽपरः। तौ च यथाक्रमं चित्तौदारिकतासूक्ष्मताहेतुत्वाच्चित्तौदारिकतासूक्ष्मतेत्युच्यते। अथ वा [4]चित्तस्यौदारिकश्चित्तौदारिकः[1]। चित्तौदारिकभावः चित्तौदारिकता। एवं चित्तसूक्ष्मतापि वक्तव्येति **को ऽत्र विरोधः। न स्याद्विरोधो** 154.17 (12b–2) **यदि वितर्कविचारयोर्जातिभेदः स्याद्वेदनासंज्ञावत्।** वेदना ह्यौदारिकी। संज्ञा सूक्ष्मा। तयोस्तु जातिभेदो ऽस्तीति। औदारिकसूक्ष्मतायामप्येकत्र चित्ते न विरोधः। **एकस्यां तु जातौ** अनवधृतलक्षणायां ऐक्येन च कैश्चिद्गृहीतायां **मृद्वधिमात्रता** 154.19 (12b–3) औदारिकसूक्ष्मतालक्षणा **युगपन्न संभवती**त्यर्थाद्युगपत्संभवतीत्युक्तं। तथा हि वेदना अन्यो वा धर्मः पर्यायेण मृदुतामधिमात्रतां च भजते। **नैवं व्यक्तो** 155.2 (12b–5) **भवति।** किं। जातिभेदः। कस्मात्। **प्रत्येकं जातीनां मृद्वधिमात्रत्वात्।** वेदना ह्यौदारिकी भवति सूक्ष्मा वापेक्षाभेदात्। कथमिति। वेदना संज्ञामपेक्ष्य औदारिकी। रूपमपेक्ष्य सूक्ष्मा। तथा संज्ञा संस्कारानपेक्ष्यौदारिकी। वेदनामपेक्ष्य सूक्ष्मा। वितर्कविचारवदेव वा। भवतो ऽपि हि कामावचरौ वितर्कविचारावौदारिकौ। प्रथमध्यानभूमिकौ सूक्ष्मौ। ध्यानान्तरे च विचारः सूक्ष्मतर इति। तदेवं प्रत्येकं जातीनां मृद्वधिमात्रत्वात् नैवं व्यक्तो भवति। न मृद्वधिमात्रतया जातिभेदो व्यक्तो भवतीत्यर्थः। अत्र संघभद्र आचार्य आह[2]। एकत्र च चित्ते औदारिकसूक्ष्मते भवतः। न च विरोधः। प्रभावकालान्यत्वात्। यदा हि चित्तचैत्तकलापे वितर्क उद्भूतवृत्तिर्भवति। तदा चित्तमौदारिकं भवति। यदि विचारस्तदा सूक्ष्मं। रागमोहचरितव्यपदेशवत्। रागमोहयौगपद्ये ऽपि हि तयोरन्यतरोद्भूतवृत्तियोगात् रागचरितो मोहचरित इति वा व्यपदिश्यते। तद्वदिहापि द्रष्टव्यमिति। अत्र वयं ब्रूमः। भवति कस्मिंश्चित्कलापे कस्यचिद्धर्मस्य उद्भूतवृत्तित्वं। किं त्वनयोर्न लक्षणं विवेचितमिति न किंचिदेतत्। ननु च चित्तौदारिकतासूक्ष्मतालक्षणौ वि-

---

1 ... 1 Ex conj. चित्तौदारिकश्चित्तौदारिकः NC; om. T; སེམས་ལ་རྩིང་པ་ཡོད་པས་ན་སེམས་རྩིང་པའོ.

2 順正理論 (冬三 61a 3 et seq.).

तर्कविचारावुक्तौ । सत्यमुक्तौ । प्रत्येकं तु ज्ञातीनामौदारिकसूक्ष्मते इति तावौदा-
155.3 (12b—6) रिकसूक्ष्मतालक्षणौ भवितुमर्हतो यथोक्तमिति नैतदस्मानाराधयति । **नैव हि वि-
तर्कविचारावेकत्र चित्ते भवत इत्यपर** इत्याचार्यमतम् । अस्मिन्मते यथोक्तदोष-
प्रसङ्गो न भवति । कस्त्वनयोः पर्यायवर्तिनोर्विशेषः । अत्र पूर्वाचार्या आहुः ।
वितर्कः कतमः । चेतनां वा निश्रित्य प्रज्ञां वा पर्येषको मनोजल्पो ऽनभ्यू-
ह्याभ्यूह्यावस्थयोर्यथाक्रमं[1] । सा च चित्तस्यौदारिकता । विचारः कतमः । चेतनां वा
निश्रित्य प्रज्ञां वा प्रत्यवेक्षको मनोजल्पो ऽनभ्यूह्याभ्यूह्यावस्थयोर्यथाक्रमं[2] । सा
च चित्तसूक्ष्मतेति[3] । अस्मिन्पक्षे वितर्कविचारावेकस्वभावौ समुदायरूपौ पर्यायवर्ति-
नौ पर्येषणप्रत्यवेक्षणाकारमात्रेण भिन्नाविष्येते[4] । तत्रोदाहरणं केचिदाचक्षते । तद्यथा
बहुषु घटेष्ववस्थितेषु को ऽत्र दृढः को जर्जर इति मुष्टिनाभिघ्नतो य ऊहः । स वितर्कः ।
155.5 (12b—7) इयन्तो जर्जरा दृढा वेति यदन्ते ग्रहणं । स विचार इति । **कथं इदानीं प्रथमं ध्यानं
पञ्चाङ्गमिति** विस्तरः । विविक्तं कामैर्विविक्तं पापकैरकुशलैर्धर्मैः सवितर्कं सविचारं
विवेकजं प्रीतिसुखं प्रथमं ध्यानमुपसंपद्य विहरतीति सूत्रे पञ्चाङ्गमुक्तं । तत्कथं । **भूमि-**
155.6 (12b—8) **तस्तत्पञ्चाङ्गमुक्तं न क्षणात** इति । प्रथमध्यानभूमिः कदाचिद्वितर्केण व्यवकीर्णा ।
155.9 (12b—9) कदाचिद्विचारेण । तदेवं संतानमधिकृत्य पञ्चाङ्गमुक्तं । न क्षणमधिकृत्येत्यदोषः ॥
**येन केनचित्परतो विशेषपरिकल्पेने**ति । भूतेनाभूतेन वा परत उत्कर्षपरि-
155.9 (12b—10) कल्पेन शूरो ऽर्थवानस्मि शीलवान् बुद्धिसंपन्न इति वा या **चेतस उन्नतिः** ।
153.13 (12a—1) स **मानो नाम** चैतसिको धर्मः ।

---

1 न व्यूह्याव्यूह्या° N, ऽनुस्वह्नात्पुङ्गा° (!) T; གཏན་ལ་མི་འབེབས་པ་དང་ གཏན་ལ་འབེབས་པ་.  2 न व्यूह्याव्यूह्या° N. नव्युह्या° (!) T; Tib. as the preceding.  3 °क्ष्मता MSS.; ཞིབ་པ་ཉིད་ཡིན་ནོ་ཞེས་ For the Chinese equivalent of this passage see 阿毘達磨雜集論 (來八 $33^b$ 12 et seq.).
4 °ष्यते MSS.

पर्यादानं तु चेतस

इति तुशब्दो विशेषणार्थो भिन्नक्रमश्चावगन्तव्यः । अत एवाह । **मदस्तु स्वध-** 155.10(12b–10)
**र्मेष्वेव रक्तस्येति**[1] विस्तरः । **चेतसः पर्यादानमिति** । येन स्वधर्मेष्वेव रूपशौ-
र्यादिषु रक्तं चेतः पर्यादीयते संनिरुध्यते । स रागनिष्यन्दो मदः । यः स्वध-
र्मेष्वेव [2]रक्तस्य दर्पचेतसः पर्यादानात्कुशलधर्मक्रियाभ्यः प्रतिसंहारः[2] मद इति[3]
आचार्यसंघभद्रः । **संप्रहर्षाविशेषो मद** इति । क्लिष्टसौमनस्यमभिप्रेतं । तदेतन्ने- 155.13 (13a–2)
च्छन्ति वैभाषिकाः । यस्मात्सौमनस्यं आ द्वितीयाद्ध्यानात् । मदश्च त्रैधातुकः ।

स्त्यानौद्धत्यमदा धातुत्रय

इति[4] वचनात् ॥

**उक्ताः सह चित्तेन चैत्ताः प्रकारैर्** इति । चित्तं तावत्प्रकारेण उक्तं 155.14 (13a–8)

विज्ञानं प्रतिविज्ञप्तिर्

इत्येवमादिना[5] स्वलक्षणस्कन्धधात्वायतनकुशलाकुशलादिप्रभेदेन । चैत्ता अपि स्व-
लक्षणपरस्परविशेषेण चित्तसंख्यावधारणकामप्रथमध्यानादिभूमिप्रभेदेन ॥ ३३ ॥

एकार्थम् 155.17 (13a–6)

---

1 °स्य MSS.; ཆགས་པའི་ཞེས་བྱ་བ་. 2 ... 2 रक्तस्य दर्पचेतसः पर्यादानं कुशलान्पर्कैवात्युप्रतिसंहारः T, रक्तस्य दर्पं चेतसः पर्यादानं कुशलान्यक्रियाभ्युप्रतिसंहारः C, रक्तस्य दर्पं चेतसः पर्यादानं कुशलान्यक्रियात्युपपत्तिसंहारः N; ཆགས་པའི་སེམས་རྒྱགས་པ་དགེ་བའི་ཆོས་བྱ་བ་དག་ལས་ཡོངས་སུ་གཏུགས་ཤེད་ཕྱིར་ལོག་པ་དེ་ཉི. 3 順正理論(冬三 $61^b$ 1). 4 Kārikā V, $52^d$.

5 Kārikā I, $16^a$.

इति । यच्चित्तं । तदेव मनस्तदेव विज्ञानमित्येको ऽर्थो ऽस्येत्येकार्थं । निर्वचनभे-
156.3 (13a–8) दस्तूच्यते । **चिनोतीति चित्तमिति** । कुशलमकुशलं वा चिनोतीत्यर्थः । नैरुक्तेन
विधिनैवं सिद्धं । **मनुत इति मनः** । मन ज्ञान इत्यस्य औणादिकप्रत्ययात्त-
156.4 (13a–9) स्यैतद्रूपं मन इति । **विज्ञानात्यालम्बनमिति विज्ञानं** । कर्तरि ल्युट्[1] । **चित्तं**[2]
156.5 (13a–10) **शुभाशुभैर्धातुभिरिति चित्तं** । वासनासंनिवेशयोगेन सौत्रान्तिकमतेन योगाचारमतेन
वा । **आश्रयभूतं मनः आश्रितभूतं विज्ञानमिति** । आश्रयभावापन्नं मनः ।

षण्णामनन्तरातीतं विज्ञानं यद्धि तन्मन

इत्यर्थपरिग्रहात्[3] । आश्रितभावापन्नं विज्ञानं । **द्वयं प्रतीत्य विज्ञानस्योत्पत्ति-
रिति**[4] वचनात्

155.17 (13a–6) **चित्तचैतसाः**

**साश्रयालम्बनाकाराः[5] संप्रयुक्ताश्च**

इति । चशब्द एकानुकर्षणार्थः । य एव हि **चित्तचैत्ता** इत्यनेन शब्देनाभिहिताः । त एव साश्रया इत्यनेनापि शब्देनाभिधीयन्ते । एवं सालम्बनाः साकाराः संप्रयुक्ताश्च । तत्र
156.10 (13b–3) **साश्रया इन्द्रियाश्रितत्वात्** षडायतनाश्रितत्वादित्यर्थः । **सालम्बनाः**[6] **विषयग्रह-**
156.11 (13b–4) **णात्** । न हि विनालम्बनेन चित्तचैत्ता उत्पद्यन्ते । **साकाराः तस्यैवालम्बनस्य
प्रकारेण**[7] **आकारणात्** । येन ते सालम्बनाः तस्यैवालम्बनस्य प्रकारेण[8] ग्रहणात् ।

---

1 ल्युट् denotes a suffix ana. 2 བསགས་པས་ & 眞諦 has 所增長故 (冬 — 18ª 18), but MSS. read चित्र with 種種 of 玄奘.

3 Kārikā I, $17^{ab}$. 4 Cf. 論 二 $20^{b}$ 7. 5 आश्र° MSS.; རྟེན་དང་དམིགས་དང་རྣམ་བཅས་དང་. 6 °म्बन MSS.; དམིགས་པ་དང་བཅས་པ་དག་སྟེ

7 °कारणा MSS.; རྣམ་པ་རེ་རེ་ནས་. 8 °कारणो MSS.; རྣམ་པ་རེ་རེ་ནས་.

कथं । विज्ञानं हि नीलं पीतं वा वस्तु विजानाति उपलभत इत्यर्थः । तद्व तथालम्बनं वस्तु वेदनानुभवति । संज्ञा परिच्छिनत्ति । चेतनाभिसंस्करोतीत्येवमादि । अथ वा तस्यैवालम्बनस्य विज्ञानं सामान्यरूपेण उपलभ्यतारूपं गृह्णाति । विशेषरूपेण तु वेदनानुभवनीयतारूपं गृह्णाति । संज्ञा परिच्छेद्यतारूपं गृह्णातीत्येवमादि । **संप्रयुक्ताः समं प्रयुक्तत्वादिति** । समा अविप्रयुक्ताश्चान्योन्यमिति 156.13 (13b—5)
संप्रयुक्ताः । **आश्रयालम्बनाकारकालद्रव्यसमताभिरिति** । येनाश्रयेण चित्तमुत्प- 156.15 (13b—6)
द्यते । तेनैवाश्रयेण वेदना संज्ञा चेतनादय उत्पद्यन्ते । तथा येनालम्बनेन चित्तं । तेनैव वेदनादयः । येनाकारेण चित्तं । तेनैव वेदनादयः । यदि हि नीलाकारं चित्तं नीलाकारा एव तत्संप्रयुक्ता वेदनादय उत्पद्यन्ते । यस्मिंश्च काले चित्तं । तस्मिन्नेव वेदनादयः । यथा च चित्तद्रव्यमेकमेवोत्पद्यते । न द्वे त्रीणि वा । तथा वेदनाद्रव्यं एकमेवोत्पद्यते । न द्वे त्रीणि वा । तथा संज्ञाद्रव्यं चेतनाद्रव्यं इत्येवमादि । तेनेदमेवात्यं दुर्गममिति व्याचष्टे **यथैव ह्येकं चित्तं । एवं चैत्ता** 156.17 (13b—6)
**अपि एकैका** इति ॥ ३४ ॥

विप्रयुक्तान्वक्तुकाम आचार्य उपोद्घातं करोति **निर्दिष्टाश्चित्तचैत्ताः सविस्तरप्रभेदाः** । विप्रयुक्तास्त्ववसरप्राप्ता इदानीमुच्यन्त इत्यभिप्रायः । सविस्तरप्रभेदा इति । विस्तरश्च प्रभेदश्च विस्तरप्रभेदौ । सह विस्तरप्रभेदाभ्यां सविस्तरप्रभेदाः । अथ वा विस्तरेण प्रभेदः विस्तरप्रभेदः । सह विस्तरप्रभेदेन सविस्तरप्रभेदाः । तत्र चित्तं तावत्सविस्तरप्रभेदं[1] निर्दिष्टं

विज्ञानं प्रतिविज्ञप्तिर्मनआयतनं च

इत्येवमादिना[2] । चैत्ता अपि

वेदनानुभव

---

1 °भेदेन MSS.; सविस्तरप्रभेदं = རྒྱས་པ་དང་རབ་ཏུ་དབྱེ་བ་དང་བཅས་པ་.

2 Kārikā I, 16$^{ab}$.

इत्यारभ्य[1] यावत्

पञ्चधा चैत्ता

इति[2] विस्तरेण ।

157.5 (14a–1) **नामकायादयश्च**

इति । चशब्द[3] एवंजातीयकानुक्तविप्रयुक्तप्रदर्शनार्थः । संघभेदप्रभृतयो हि द्रव्यतश्चित्तविप्रयुक्ता इष्यन्ते इति । ये ऽप्येवंजातीयका इति[4] शास्त्रे ऽप्युक्तत्वात् । चित्तविप्रयुक्ता इति चित्तग्रहणं चित्तसमानजातीयप्रदर्शनार्थं । चित्तमिव चित्तेन च विप्रयुक्ता इत्यर्थः । किं च तेषां चित्तेन समानजातीयत्वं । यद्रूपिणो ऽमी भवन्ति । रूपित्वादेव हि विप्रयुक्तत्वे ऽपि रूपं न विप्रयुक्तत्वे नाम लभते । यद्वामीषां नामरूपमिति नामत्वं । तत्तेषां चित्तेन समानजातीयत्वं । चैत्ता अपि चित्तेन तुल्यजातीयाः । ते तु चित्तेन सहालम्बने संप्रयुक्ताः । तद्विशेषणार्थं विप्रयुक्तग्रहणं । असंस्कृतमपि तत्समानजातीयमनालम्बनत्वेनेति तत्परिहारार्थं संस्का-
157.11 (14a–2) रग्रहणं । अत एवाह । **इमे संस्कारा न चित्तेन संप्रयुक्ता । न च रूपस्वभावा ।** इति **चित्तविप्रयुक्ता उच्यन्त** इति ॥ ३५ ॥

तत्रेति । वाक्योपन्यासे निर्धारणे वा । तावच्छब्दः क्रमे ।

157.6 (14a–4) **प्राप्तिलाभः समन्वय**

इति । प्राप्तिरिति सामान्यसंज्ञा । लाभः समन्वय इति विशेषसंज्ञा । लाभः प्रतिलम्भ इत्येको ऽर्थः । समन्वयः समन्वागम इत्यनर्थान्तरं प्रतिलम्भ इत्युक्ते समन्वागमस्याग्रहणं । समन्वागम इत्युक्ते प्रतिलम्भस्याग्रहणं । प्राप्तिरित्युक्ते तूभयोर्ग्रहणं ।
157.14 (14a–6) अत एवाह । **द्विविधा हि प्राप्तिरप्राप्तविहीनस्य च प्रतिलम्भः प्रतिलब्धेन च[5] समन्वागम** इति । अप्राप्तं च विहीनं चाप्राप्तविहीनं । तस्याप्राप्तविहीनस्य

---

1 Kārikā I, 14c. 2 K. II, 24c. 3 इति MSS.; ཡང་. 4 Cf. 品類足論 (冬十 13a 14). 5 Om. MSS.

प्रतिलम्भः । अप्राप्तस्य तद्यथा दुःखे धर्मज्ञानक्षान्तेः । विहीनस्य तद्यथा कामावचरस्य कामवैराग्येण त्यक्तस्य धातुप्रत्यागमनात् परिहाण्या वा पुनःप्रतिलम्भः । प्रतिलब्धेन च द्वितीयादिषु क्षणेषु समन्वागमः । तस्याः समनुवर्तनात् । यश्च प्रतिलम्भः यश्च समन्वागमः । सा द्विधा प्राप्तिरिति प्रतिलम्भे समन्वागमे च प्राप्तिशब्दो वर्तते । अभेदविवक्षायां तु प्राप्तिः प्रतिलम्भः समन्वागम इत्येक एवार्थः । तथा हि प्रथमे क्षणे दुःखे धर्मज्ञानक्षान्तेः प्राप्तिः प्रतिलम्भ इष्यते । सापि समन्वागम इत्युच्यते । प्रथमक्षणस्थ आर्यपुद्गलो दुःखे धर्मज्ञानक्षान्त्या समन्वागत इत्युच्यते ।

आज्ञास्यामीन्द्रियोपेतस्त्रयोदशभिरन्वित

इत्यादिवचनात्[1] । कथमयं लक्षणनिर्देशः । न हि भेदविवक्षायामपि पर्यायवचनेन लक्षणनिर्देशः कल्पते । प्राप्तिः कतमा । यः प्रतिलम्भो यः समन्वागम इति । पर्यायवचनमपि कदाचित् लक्षणाय कल्पते । अनलो जातवेदा अग्निरिति । सूत्रे ऽप्युक्तम् । अविद्या कतमा । यत्पूर्वान्ते अज्ञानमपरान्त अज्ञानमिति विस्तरः । 157.16 (14a—6)
**विपर्ययादप्राप्तिरिति.** सिद्धमिति । विपर्ययादेवाप्राप्तिरिति सिद्धे नैतदर्थं सूत्रं कर्तव्यमित्यभिप्रायः । अप्राप्तिरप्रतिलम्भो ऽसमन्वागम इति विपर्ययादेतत्त्रयं गम्यते । तथैव चाप्रतिलम्भासमन्वागमयोरप्राप्तिरिति सामान्यसंज्ञा । तस्मादेवं च वक्तव्यं । द्विविधा अप्राप्तिरप्राप्तपूर्वाणामप्रतिलम्भः प्राप्तविहीनानामसमन्वागम इति । अथ वा प्रतिलब्धस्य विहीनस्य चाप्याप्राप्तिरप्रतिलम्भः । अप्रतिलब्धेन विहीनेन च द्वितीयादिषु क्षणेष्वसमन्वागम[2] इति ।

**प्राप्त्यप्राप्ती स्वसंतानपतितानाम्** 157.7 (14a—4)

इति । संस्कृतानां प्राप्त्यप्राप्ती स्वसंतानपतितानामेवेत्यवधार्यते । **न परसंतानप-** 158.2 (14a—9)

---

1 Kārikā II, $19^d$. 2 लक्ष° MSS.; སྐད་ཅིག་མ་.

**ततानामिति** । न परसत्त्वसन्ततिपतितानां धर्माणां स्वसंततौ प्राप्त्यप्राप्ती भवत
इत्यर्थः । तेनाह । **न हि परकीयैः कश्चित्समन्वागत** इति । **नाप्यसंततिपतिता-**
158.4 (14a–10) **नामिति** । नासत्त्वसंततिपतितानामित्यर्थः । तस्मादाह । **न ह्यसत्त्वसंख्यातैः कश्चि-**
**त्समन्वागत** इति । माल्याभरणादयः काष्ठकुड्यादिगताश्च रूपादयो ऽसत्त्वसंख्याताः ।
चक्षुरादयः सत्त्वसंख्याताः । केशादयो रूपीन्द्रियसंबद्धाः सत्त्वसंख्याता एव वेदितव्याः ।
तदनुग्रहोपघातपरिणामानुविधानात् । तथा हि रूपीन्द्रियोपघातात् पालित्यादि-
विकारः केशादीनां दृश्यते । रसायनोपयोगेन चानुग्रहात्पालित्यादि प्रत्यापत्ति-
रिति सर्वेषां सत्त्वसंख्यातानां प्राप्तिर्भवतीति सिद्धान्तः ।

157.8 (14a–5) **निरोधयोर्**

158.7 (14b–1) इति । प्रतिसंख्याप्रतिसंख्यानिरोधयोरसत्त्वसंख्यातयोरपि प्राप्त्यप्राप्ती भवतः । **सर्वस-**
158.11 (14b–2) **त्त्वा अप्रतिसंख्यानिरोधेन** यथा प्रत्ययवैकल्यं **समन्वागताः** । **सकलबन्धनादिक्ष-**
**णस्थवर्ज्या** इति । आदौ क्षणः दुःखे धर्मज्ञानक्षान्तिक्षणः । तत्र स्थिता आदिक्ष-
णस्थाः । सकलानि बन्धनान्येषामिति सकलबन्धनाः । अप्रहीणसर्वप्रकारक्लेशाः ।
सकलबन्धनाश्चादिक्षणस्थाश्च त इति सकलबन्धनादिक्षणस्थाः । ते वर्ज्या एषां तैर्वा
वर्ज्याः सकलबन्धनादिक्षणस्थवर्ज्याः । के । **सर्व आर्याः** । ते **प्रतिसंख्यानिरोधेन**
**समन्वागताः** । सकलबन्धनादिक्षणस्थास्त्वार्या न समन्वागताः । तस्यां ह्यवस्थायां
क्षान्तिवध्याः क्लेशाश्छिद्यन्ते न छिन्नाः । तन्निरोधो ऽपि प्राप्यते न प्राप्तः ।

निरुध्यमानो मार्गस्तु प्रजहाति तदावृतिम्

इति[1] सिद्धान्तात् । एकप्रकारोपलिखितादयस्त्वार्या लौकिकमार्गप्राप्तेन निरोधेन तस्यामवस्थायां समन्वागताः । अत ऊर्ध्वं द्वितीयादिषु क्षणेषु समन्वागता एव अनास्रवमार्गप्राप्तेनापि निरोधेन । **पृथग्जनाश्च केचित्समन्वागता** इत्येकप्रकारोपलिखितादयः ।

---

1 Kārikā VI, $81^{cd}$.

आकाशेन तु नास्ति कश्चित्समन्वागत इति। असंबन्धात्। निरोधाभ्यां त्वस्ति 158.13 (14b–4)
संबन्धः। तस्मादाकाशस्य प्राप्तिर्नास्ति। यस्य च नास्ति प्राप्तिः। तस्याप्राप्तिरपि 158.14 (14b–5)
नास्तीति सिद्धान्त एष वैभाषिकानां॥ 158.16 (14b–6)

कुत एतदिति। रूपादिचक्षुरादिवत्स्वरूपकार्यानुपलम्भात्पृच्छति। सूत्रादि- 158.17 (14b–7)
ति[1]। व्याख्यानं[2] एव[2] वैभाषिकः साधयति। दशानामशैक्षाणां धर्माणामिति
विस्तरः। दशाशैक्षा धर्माः अष्टावशैक्षा आर्यमार्गाङ्गानि[3] सम्यग्विमुक्तिः सम्यग्ज्ञानं 158.18 (14b–8)
च। तेषामुत्पादात्संमुखीभावात् प्रतिलम्भादादितः प्राप्तेः समन्वागमात्पश्चा-
त्प्राप्तेः पञ्चाङ्गं विप्रहीणाः। प्रहीणपञ्चाङ्ग[4] इत्यर्थः। पञ्चाङ्गानि सत्कायदृष्टिः
शीलव्रतपरामर्शो विचिकित्सा कामच्छन्दो व्यापाद इति। एतान्यनागामिफलप्राप्तौ
प्रहीणानीति न युज्यन्ते। इमानि तु प्रयुज्यमानानि पञ्चाङ्गानि पश्यामो यदुतोर्ध्वभागी-
यानि रूपराग आरूप्यराग औद्धत्यं मानो ऽविद्या चेति। प्रतिनिधिभूतायाः प्राप्तेर्यो-
गात्प्रकृतिस्थो ऽप्यर्हन्नार्य इत्यच्युते। साधनं चात्र। द्रव्यतो ऽस्ति समन्वागमः सूत्रो-
क्तत्वात् आयतनद्रव्यवदिति। आचार्यस्त्वं प्रत्याह। तेन तर्ह्यसत्त्वाख्यैरपि चक्रर-
त्नादिभिः परसत्त्वैरपि स्त्रीरत्नादिभिः समन्वागमो द्रव्यसत्प्राप्नोति[5]। सूत्रे वच- 158.20 (14b–9)
नात्। कथमिति सूत्रं दर्शयति। राजा यावद्विस्तर इति। राजा भिक्षवश्चक्र- 159.1 (14b–10)
वर्ती सप्तभी रत्नैः समन्वागतः। तस्येमानि स प्तरत्नानि। तद्यथा चक्ररत्नं
हस्तिरत्नं अश्वरत्नं मणिरत्नं स्त्रीरत्नं गृहपतिरत्नं परिणायकरत्नं एव[6] सप्तमामिति
विस्तरः। एभिः सप्तभी रत्नैस्समन्वागमः सूत्र उक्तः। न च द्रव्यतो ऽस्तीति
अनैकान्तिकतां दर्शयति। प्रतिज्ञादोषं वायमुद्भावयति[7]। अनुमानविरोधात्। कथमि-
त्युच्यते। न द्रव्यसन्दशाशैक्षधर्मसमन्वागमः समन्वागमस्वाभाव्यात् चक्रवर्तिसप्त-

---

1 °त्रादि MSS.; མདོ་ལས་ཏེ་ཞེས་བྱ་བ་ནེ་. 2 °ख्यातं MSS.; ལུང་གིས་. Qu. आगमेन? 3 °गां NC. 4 ह्यार्य MSS. corrected by Tib. 5 °व्यं सत्प्रा° MSS.; རྫས་སུ་ཡོད་པར་. 6 एवं NC; ཁོ་ན་. 7 चाय° NT; ཡང་ན་.

रत्नसमन्वागमवदिति । अनेन प्रतिज्ञाया धर्मस्वरूपं विपर्यासयति । **वशित्वं का-**
159.4 (15a–1) **मचार** इति । इच्छानुविधायित्वं । **तत्र वशित्वमिति** । चक्रवर्तिसूत्रे । **अन्यत्र पुन-**
159.5 (15a–2) **र्द्रव्यान्तरमिति** । दशाशैक्षधर्मसमन्वागमसूत्रे । **कः पुनरेवमयोग**[1] इति । प्रवचने हि
द्विविधमिष्यते द्रव्यसच्च वस्तु प्रज्ञप्तिसच्चेति । कथमयुक्तिरिति वैभाषिकाः ।
159.6 (15a–3) आचार्य आह । **अयमयोग** इति विस्तरः । इह यद्द्रव्यसद्वस्तु । तत्प्रत्यक्षग्राह्यं
वा भवेदनुमानग्राह्यं वा । तत्र प्रत्यक्षग्राह्यं **रूपशब्दादि** पञ्चेन्द्रियग्राह्यत्वात् ।
159.9 (15a–4) मनोविज्ञानग्राह्यमपि किंचित्प्रत्यक्षं **रागद्वेषादि** स्वसंवेद्यत्वात् । **चक्षुःश्रोत्रादि**
त्वनुमानग्राह्यं चक्षुर्विज्ञानादिकृत्यानुमेयत्वात् । तद्भावाभावयोस्तद्भावाभावात् । प्रा-
प्तिः पुनर्न प्रत्यक्षग्राह्या । न चानुमानग्राह्या । तत्सिद्धौ निरवद्यानुमानादर्शनात् ।
159.10 (15a–5) **तस्माद्द्रव्यधर्मासंभवादयोग** इति । स्थितमेतत् । इदानीमाचार्यस्तत्पक्षमुत्थाप्यो-
159.11 (15a–6) त्थाप्य दूषयति । **उत्पत्तिहेतुरिति** विस्तरः । यस्य प्राप्तिरस्ति । स उत्पद्यते
हेतुसद्भावात् । **असंस्कृतस्य न स्यात्प्राप्तिः** । यस्मादसंस्कृतमनुत्पाद्यं । **ये च धर्मा**
159.12 (15a–7) **अप्राप्ता** दुःखे धर्मज्ञानक्षान्त्यादयः । **ये च त्यक्ताः भूमिसंचारवैराग्यतः** । तद्यथा
कामावचरा अक्लिष्टा ऊर्ध्वभूम्युपपत्त्या क्लिष्टाश्च वैराग्येण त्यक्ताः । तेषां धा-
तुप्रत्यागमतः परिहाण्या वा **कथमुत्पत्तिः स्यात्** । न हि तेषां प्राप्तिरस्ति
अनुत्पन्ननिरुद्धत्वात् । **सहजप्राप्तिहेतुका चेत्** । का । तेषामुत्पत्तिरधिकृता । सह-
159.15 (15a–8) जा या प्राप्तिरिदानीमुत्पद्यते । सा तेषां जनिकेति । आह । **जातिरिदानीं किं-**
**करी जातिजातिर्वेति** । किंकरणशीला किंकरी । जातिर्लक्ष्यं धर्मं जनयति ।
जातिजातिस्तु तल्लक्षणं जातिं जनयति । तेन यदि लक्ष्याणां धर्माणामुत्पत्तिः
प्राप्तिहेतुकोच्येत । तत्र जातिः किंकरी । अथ लक्षणानामुत्पत्तिस्तद्धेतुकोच्येत ।
तत आह जातिजातिर्वा किंकरीति विकल्पः । अथ वा यदि भवतैवं कल्प्येत ।
जातिर्धर्मं जनयति । प्राप्तिः पुनर्जातिं जनयतीति । तत्र उच्यते जातिजातिर्वा

---

1 °वमयो° NT; དེ་ལྟ་ན་.

किंकरोति। **सकलबन्धनानां खल्वपीति** विस्तरः। येषामेको ऽपि क्लेशप्रकारो
न प्रहीणः। ते सकलबन्धनाः। तेषां **सकलबन्धनानां खल्वपि मृदुमध्या-** 159.16 (15a–9)
**धिमात्रक्लेशोत्पत्ति[प्रकार][1]भेदो न स्यात्।** कस्मात्। **प्राप्त्यभेदात्।** विकलब-
न्धनानां हि प्राप्तिवैकल्यान्मृदुमध्याधिमात्रक्लेशोत्पत्तिभेदः परिकल्प्येत। न तु
सकलबन्धनानां प्राप्तीनां तुल्यत्वात्। **यतो वा स भेद** इति। यतो वा का- 159.18 (15a–10)
रणादभ्यासतो ऽन्यतो वा स भेदः। कस्यचित्सकलबन्धनस्याधिमात्रः कस्यचि-
न्मध्यः कस्यचिन्मृदुः। **तत एव** भेदकारणात्तदु**त्पत्तिरस्तु**। तेषां मृद्वादीनां
क्लेशानामुत्पत्तिः। **तस्मान्नोत्पत्तिहेतुः प्राप्तिरिति**। वैभाषिक आह। **कश्चैव-** 159.19 (15b–1)
**माहेति** विस्तरः। **व्यवस्थाहेतुः प्राप्तिः**। **असत्यां हि प्राप्तौ लौकिकमा-** 160.1 (15b–2)
**नसानां** इति[2]। लोके भवो[3] लौकिकं। मन एव मानसं। लौकिकं मानसमेषां।
ते इमे लौकिकमानसाः। **आर्यपृथग्जनाः** आर्याश्च पृथग्जनाश्च। लौकिकमानसग्र- 160.2 (15b–3
हणमार्यविशेषणं। पृथग्जना हि नित्यमेव लौकिकमानसाः। आसंज्ञिकासंज्ञिसमा-
पत्त्यवस्थायां वा पृथग्जनविशेषणमपि संभवति। **तेषामार्यपृथग्जनानां**'। तेषा-
मिति निर्धारणे षष्ठी। संबन्धलक्षणा वा। तेषां **न स्याद्व्यवस्थानमिति परि-** 160.3 (15b–4)
**च्छेदः**। यत्कृतं व्यवस्थानं। सा प्राप्तिः। **प्रहीणाप्रहीणक्लेशताविशेषादिति**।
प्रहीणक्लेशाः आर्याः। अप्रहीणक्लेशाः पृथग्जनाः। तद्भावः। स एव विशेषः।
इति प्रहीणाप्रहीणक्लेशताविशेषः। तस्मात्। **एतद्व्यवस्थानं भवितुमर्हति**। ननु 160.3 (15b–5)
च पृथग्जना अपि केचित्प्रहीणक्लेशा भवन्ति। कथमवधार्यते आर्या एव प्रहीण-
क्लेशा इति। अत्यन्तसमुद्घातवचनादेवमुक्तं। **एतच्चैव कथमिति**। **एषां प्रहीणाः**
**क्लेश एषामप्रहीणा** इति। यदेतद्व्यवस्थानं। तत्कथं भविष्यति। **प्राप्तौ तु** 160.6 (15b–9)
**सत्यां** क्लेशप्राप्त्या **एतत्सिध्यति** व्यवस्थानं **तद्विगमाविगमात्**। क्लेशप्राप्तिवि-

---

1 Om. Tib. Cf. next line below. 2 Om. MSS.; ཞེས་བྱ་བ་ནི.

3 भवं MSS.

गमाविगमात् छेदाच्छेदादित्यर्थः । येषां तत्प्राप्तिविगताः । ते आर्याः । येषां अवि-
गताः । ते पृथग्जना इति । ननु च पृथग्जनानामपि केषांचित् क्लेशप्राप्तिर्विगता ।
विगता । न तु लोकोत्तरेण मार्गेण । स तर्हि लोकोत्तरमार्गकृतो विशेषः कथं
परिच्छिद्यते[1] । लोकोत्तरेणेयं क्लेशप्राप्तिर्विगता लौकिकेनेयमिति । सास्रवानास्रव-
160.7 (15b–7) विसंयोगप्राप्तिभेदात् । **आश्रयविशेषादेतत्सिध्यती**ति । आत्मभावविशेषादेतद्व्यव-
160.10 (15b–8) स्थानं एषां प्रहीणाः क्लेश एषामप्रहीणाः क्लेश इति सिध्यति । **तथा परावृत्त**
160.11 (15b–9) इति । तथान्यथाभूतः । **तत्प्रहेयाणां** दर्शनभावनामार्गप्रहेयाणाम् । **अग्निदग्धव्रीहि-**
160.11 (15b–10) **व**दिति । **यथाग्निदग्धो व्रीहि**रबीजीभूतो भवति । **एवं** यथोक्तेन न्यायेना-
**बीजभूतः आश्रयः क्लेशानां । प्रहीणक्लेश इत्युच्यते । उपहतबीजभावे**
**वा** । आश्रय इत्यधिकृतं । तेन **लौकिकेन मार्गेण प्रहीणक्लेश** इति शक्यते
160.13 (16a–1) वक्तुं बीजस्योपघातमात्रभावात् । **विपर्ययादप्रहीण** इति । अनिर्दग्धबीज आश्रये
(16a–2) ऽनुपहतबीजभावे वा । **यश्चाप्रहीण** इति विस्तरः । यश्चाप्रहीणो ऽनन्तरोक्तेन
विधिना दर्शनप्रहातव्यः कामावचरो यावद्भावाग्रिकः । भावनाप्रहातव्यो वा का-
मावचरो यावद्भावाग्रिकः । **तेन समन्वागतः । यश्च प्रहीणस्तथैव** यावद्भावा-
160.15 (16a–3) ग्रिकः । **तेनासमन्वागत** इति **प्रज्ञप्यते** । प्रज्ञप्तिधर्मो ऽयमिति दर्शयति । **कुश[2]-**
**ला अपि द्विप्रकारा** इति विस्तरः । यथा क्लिष्टा द्विकारा इत्यपिशब्दार्थः ।
160.18 (16a–5) समुच्चये वा कुशलाश्चेत्यर्थः । **तद्बीजभावानुपघातादि**ति । तेषामुत्पत्तिलाभिकानां
कुशलानां बीजं तद्बीजं । तद्बीजस्य भावस्तद्बीजभावः । कस्य । आश्रयस्य । तद्बीज-
भावस्यानुपघातस्तद्बीजभावानुपघातः । तस्मात् । तद्बीजभावानुपघातात् **समन्वागतः** ।
160.20 (16a–6) कैः । अयत्नभाविभिः कुशलैः । **उपघातादसमन्वागत उच्यते** । को ऽसावित्याह ।
**समुच्छिन्नकुशलमूलः । तस्य** त्विति । तस्याश्रयस्य तद्बीजभावस्य **उपघातो**

---

1 °रिच्छेद्यते MSS.; ཡོངས་སུ་ཆོད་པར་འགྱུར་.    2 अकुश° N; དགེ་བའི་.

**मिथ्यादृष्ट्या वेदितव्यः** । नान्यथा । तेनाह । **न तु**[1] **खलु कुशलानां धर्माणां** 161.1 (16a–7)
**बीजभावस्यात्यन्तं संततौ समुद्घातो** यथा क्लेशानामार्यमार्गेणात्यन्तं संततौ समु-
द्घात इत्यभिप्रायः ।[2]**ये पुनरिति विस्तरः**[2] । ये प्रायोगिकाः । **तैरुत्पन्नैः** तेषामुत्प- 161.3 (16a–8)
त्तिस्तदुत्पत्तिः । **तदुत्पत्तौ वशित्वं** सामर्थ्यविशेषस्तस्याविघातात् । कस्य । 161.4 (16a–9)
**संततेः । समन्वागम उच्यते** । कैः । तैर्यत्नभाविभिः कुशलैः । यस्मादेवं **तस्मा-** 161.5 (16a–10)
**द्बीजमेव** शक्तिविशेष एवात्र समन्वागमावस्थायाम**नपोद्धृतं** क्लिष्टानां धर्माणा-
मार्यमार्गेण । **अनुपहतं** लौकिकेन मार्गेण । अयत्नभाविनां च कुशलानां धर्माणां
मिथ्यादृष्ट्या । **परिपुष्टं च वशित्वकाले** यत्नभाविनां कुशलानां बीजमिति प्रकृतं ।
**समन्वागमाख्यां लभते । नान्यद्द्रव्यं** यद्वैभाषिकैः कल्पितं । **किं पुनरिदं** 161.7 (16b–1)
**बीजं नामेति** । द्रव्याशङ्कया पृच्छति । **यन्नामरूपं फलोत्पत्तौ समर्थं** । यत्प-[3] 161.8 (16b–2)
ञ्चस्कन्धात्मकं रूपं फलोत्पत्तिसमर्थं[3] । **साक्षादनन्तरं पारंपर्येण** दूरतः । **को ऽयं** 161.9 (16b–3)
**परिणामो नामेति** । सांख्यानां[4] परिणामाशङ्कया पृच्छति । **संततेरन्यथात्वमिति** ।
अन्यथोत्पादः । **का चेयं संततिरिति** । किं यथा सांख्यानामवस्थितद्रव्यस्य धर्मा- 161.10 (16b–4)
न्तरनिवृत्तौ धर्मान्तरप्रादुर्भावः । तथावस्थायिन्याः सन्ततेरन्यथात्वमिति । नेत्युच्यते ।
किं तर्हि । **हेतुफलभूता** । हेतुश्च फलं च हेतुफलं । हेतुफलमिति **नैरन्तर्येण**
**प्रवृत्तास्त्रैयध्विकाः संस्काराः** संततिरिति व्यवस्थाप्यन्ते । **यत्र तूक्तमिति** वि- 161.12 (16b–5)
स्तरः । यत्र तु सूत्र उक्तं । किमित्याह । **लोभेन समन्वागतः अभव्यः** अयोग्य-
**श्चत्वारि स्मृत्युपस्थानानि** कायस्मृत्युपस्थानादीनि **उत्पादयितुमिति** । यदि
बीजं प्राप्तिः । बीजं नित्यमस्तीति स्मृत्युपस्थानोत्पत्तिर्न स्यात् । भवदीयायामपि

---

1 नु MSS.; न तु = མ་ཡིན་ནོ. 2...2 གང་དག་འབད་དེ་སྐྱེ་བ་ཞེས་བྱ་བ་ རྒྱས་པར་འབྱུང་བ་ནི་ = ये यत्नभाविन इति विस्तरः. 3..3 ཕུང་པོ་ལྔ་སྐྱེད་པར་ ནུས་པ་ = पञ्चस्कन्धोत्पत्तिसमर्थं. **Or to read as present text only altering** रूपं **to** नामरूपं? 4 °ख्याय MSS.; གྲངས་ཅན་པའི་.

161.14 (16b—6) प्राप्तौ तदुत्पत्तिर्न स्यादिति तुल्यमेतत्। तस्मादुभाभ्यामपि वक्तव्यं। **तत्राधि-**
**वासनं लोभस्याविनोदनं वा समन्वागम** इति। अधिवासनमभ्यनुज्ञानमविनो-
161.17 (16b—7) दनमव्युपशमनं। **सर्वथा प्रज्ञप्तिधर्मो न द्रव्यधर्म** इति सर्वप्रकारेण यद्युत्पत्ति-
हेतुर्यदि व्यवस्थाहेतुर्यद्याश्रयविशेषः यद्यधिवासनमविनोदनं वा सर्वथा प्रज्ञप्तिधर्मः।
प्रज्ञप्त्या संवृत्या व्यवहारेण धर्मः प्रज्ञप्तिधर्मः। न द्रव्यधर्मः न द्रव्यतो धर्मः
स्वभाव इत्यर्थः। अथ वा द्रव्यं च तद्धर्मश्च स द्रव्यधर्मः। न रूपादिवत् विद्य-
161.16 (16b—8) मानस्वलक्षणो धर्म इत्यर्थः। **तस्य च प्रतिषेधः**। तस्य च प्रज्ञप्तिधर्मस्य प्रति-
षेधो **ऽसमन्वागम** इति। इदमस्येति ज्ञानचिह्नं[1] प्रतिलब्धधर्माविप्रणाशकारणं
च प्राप्तिरित्या[2]चार्यसंघभद्रः। इदमस्येति[3] ज्ञानचिह्नं इत्यसिद्धमेतत्। आश्रयविशेषेण
तज्ज्ञानमिति ब्रूमः। यदि च प्रतिलब्धधर्माविप्रणाशकारणं प्राप्तिरिष्यते। प्राप्तप-
रित्यागो नैव स्यात्। भवति च। तस्मादकारणमेतत्। स[4] एव च शक्तिविशे-
षलक्षणं बीजभावमाचार्येण व्यवस्थापितं दूषयति। किमयं शक्तिविशेषश्चित्ता-
दर्थान्तरमता ऽनर्थान्तरं। किं चातः। अर्थान्तरं चेत्। सिद्धं प्राप्तिरस्तीति। संज्ञा-
मात्रे तु विवादः। अनर्थान्तरं चेत्। [5]नन्वकुशलं कुशलस्य बीजं[5] अभ्युपगतं भव-
त्यकुशलस्य च कुशलं। को हि नाम औष्ण्यस्य तेजसो ऽनर्थान्तरत्वे सत्यौ-
ष्ण्यमेव दाहकमध्यवस्येन्न तेजः। कुशलबीजं ह्यकुशले चेतस्यव्याकृते वा वर्तते।
एवमकुशलबीजं कुशले चेतस्यव्याकृते वा वर्तते। तथैव चाव्याकृतबीजमपि
कुशले चाकु[6]शले च वर्तते। सास्रवबीजं चानास्रवे ऽनास्रवबीजं च सास्रवे चेतसि

---

1 ज्ञानं चिह्नं MSS.; ཤེས་པའི་རྟགས་. 2 順正理論 (冬三 64ᵇ 10). 3 °मस्य MSS.; इदमस्येति འདི་ལ་ནི་འདི་ཡོད་དོ་ཞེས་བྱ་བར་. 4 順正理論 (冬三 64ª 2). 5 … 5 ननु कु° MSS.; མི་དགེ་བའི་ས་བོན་ཡིན་པར་ (sic), but cf. 順正理論 冬三 64ª 8). 6 वाकु° MSS.; དང་.

वर्तत इति। सांकर्यदोषः प्रसज्यत इति[1]। अत्र वयं ब्रूमः। अनर्थान्तर[2]भावे सांकर्यदोषो भवेत्। तत्तु बीजं न चित्तादर्थान्तरं वक्तव्यं। नाप्यनर्थान्तरम्। उपादायप्रज्ञप्तिरूपत्वात्। अथाप्यनर्थान्तरभावस्तथाप्यदोषः। कुशलेन हि चित्तेनोत्पन्नेन स्वजातीये ऽन्यजातीये वा स्वसंतानचित्ते बीजमाधीयेत। ततः कारणविशेषात्कार्यविशेष इति विशिष्टं तेन तच्चित्तमुत्पद्येत। तद्विशिष्टं चित्तं कुशलबीजकार्यक्रियायां समर्थमुत्पद्येत। एवमकुशलेनापि स्वजातीये ऽन्यजातीये वा स्वसंतानचित्ते बीजमाधीयेत। तच्च तेन विशिष्टं चित्तम[3]कुशलबीजकार्यक्रियायां समर्थमुत्पद्येत। एवमव्याकृतेनापि चित्तेन स्वजातीये ऽन्यजातीये वा स्वसंतानचित्ते बीजमाधीयेत। तच्चापि तेन [4]विशिष्टमव्याकृतबीजकार्यक्रियायां समर्थमुत्पद्येत। सास्रवेणाप्यनास्रवे चित्ते बीजमाधीयेत। अनास्रवेणापि सास्रवे। इत्येवमन्योन्यबीजाधायकमन्योन्यजनकं च चित्तं चित्तान्तरादुत्पद्यमानं अन्योन्यवास्यवासकत्वेन प्रवर्तते। न च कुशलेनाकुशले चित्ते शक्तिविशेष आहित इति तदकुशलं कुशलतामापद्यते। कुशलं वा तदकुशलतां शक्तिविशेषमात्रत्वात्। शक्तिर्बीजं[5] वासनेत्येको ऽयमर्थः। एवमकुशलादिवासनापि वक्तव्या। यावत्सास्रवेणानास्रवे शक्तिविशेषाधाने ऽपि। अनास्रवेणापि सास्रवे शक्तिविशेषाधाने। न तत्सास्रवं अनास्रवं संपद्यते। अनास्रवं वा सास्रवमिति। भवतामपि वैभाषिकानां इदं चिन्त्यते। यदा सास्रवचित्तसमनन्तरं अनास्रवं अनास्रवचित्तसमनन्तरं वा सास्रवचित्तमुत्पद्यते। तदा किं पूर्वकः सास्रवकलापो ऽनास्रवकलापो वा शक्तिमान् समनन्तरप्रत्ययादिभावेनोत्तरकलापोत्पत्तौ उताशक्तिमान्। किं चातः। यद्यशक्तिमान्समनन्तरप्रत्ययादिभावो ऽप्यस्य हीयेत। अथ शक्तिमान्। सा शक्तिः किं सास्रवे चेतसि सास्रवा। आहोस्विदनास्रवा।

---

1 This quotation is abridged. 2 अर्थान्त° MSS.; དོན་ཐ་དད་པ་མ་ཡིན་.

3 चित्तम् supplied from Tib. 4 तेनावि° NT; དེ་ལས་ནི་ཁྱད་པར་ཅན་.

5 °क्तिबीजं MSS.

तच्चित्तं सास्रवस्यानास्रवस्य च चित्तान्तरस्य समनन्तरप्रत्ययादिभावं कुर्वत् किं ययैव शक्त्या सास्रवस्य समनन्तरप्रत्ययादिभावं कुर्यात् । तयैवानास्रवस्य । यदि तयैव कथं शक्तिकार्यसांकर्यं[1] न भवेत् । अथान्यया शक्त्या सास्रवस्यान्ययानास्रवस्य समनन्तरप्रत्ययादिभावं कुर्यात् । कथमनयोरेकत्र शक्त्योस्तस्माच्चित्तादनन्ययोर्भिन्नरूपता भिन्नकार्यता च युज्यते । युज्यते चेत् । अस्माकमपि चित्तादनन्यासां शक्तीनां तत्रावस्थानं कार्यभेदश्च भविष्यति । एवमनास्रवस्यापि चित्तस्य सास्रवानास्रवचित्तसमनन्तरप्रत्ययादिभावेन संभवतः तथैव शक्त्योर्भिन्नरूपता कार्यभेदश्च वक्तव्यः । तेन यदुक्तं नन्वकुशलं कुशलस्य बीजमभ्युपगतं भवतीत्यादि तदयुक्तं । न हि कुशलाहितेन शक्तिविशेषेण विशिष्टं समर्थमकुशलमकुशलबीजकार्यं करोति । किं तर्हि । कुशलबीजकार्यमेव करोति । स्वाहितेन तु शक्तिविशेषेण तदकुशलं स्वबीजकार्यं करोति । तत्कथमिदमुच्यते कुशलस्याकुशलं बीजमिति । ब्रूयास्त्वमकुशलचित्ते तत्कुशलबीजमाहितं कथं अकुशलं न भवतीति । न भवन्तो बीजार्थं जानते । कुशलेन चित्तेन निरुध्यमानेन[2] तथा शक्तिविशिष्टमकुशलं चित्तं जन्येत । यथा तच्चित्तं स्वोत्पत्तियोग्यं भविष्यति साक्षात्पारंपर्येण वेति[3] शक्तिविशेष एव बीजं । न बीजं नाम किंचिदस्ति । प्रज्ञप्तिसत्त्वात् । अत एव प्रा-
161.18 (16b-8, 9) प्त्यप्राप्ती प्रज्ञप्तिसत्यावुच्येते[4] । **द्रव्यसत्यावेव तु वैभाषिका वर्णयन्ति** ॥ ३६ ॥

162.6 (17a-4) **अतीतानां धर्माणामतीतापि प्राप्तिरिति** विस्तरः । अतीतानां धर्माणां तद्यथा क्लिष्टानामतीता प्राप्तिः । या उत्पन्ननिरुद्धा । साग्रजापि संभवति । सह-
162.7 (17a-5) जापि । पश्चात्कालजापि । **तेषामेवानागता प्राप्तिरनुत्पन्ना । प्रत्युत्पन्ना** या पश्चात्कालजा उत्पन्नानिरुद्धा । **अनागतानामपि** प्राप्तिरतीता याग्रजोत्पन्ननिरुद्धा[5] । अनागता यानुत्पन्ना । प्रत्युत्पन्नाग्रजोत्पन्नानिरुद्धा । तथा **प्रत्युत्पन्नानामप्यतीता**

---

1 °संक° MSS. 2 སྐྱེས་པས་(!) 3 論 四 16b 2. 4 °च्यते MSS. 5 °न्नानि° MSS.; སྐྱེས་ལ་འགགས་པ་ཡིན་ནོ་.

प्राप्तिर्याऽत्रोत्पन्ननिरुद्धा। अनागता यानुत्पन्ना। प्रत्युत्पन्ना या सहजा। अतीतादिजातिसामान्यं च गृहीत्वैवमुक्तं। न त्वेकस्यातीतस्यावश्यं त्रिविधा प्राप्तिरस्ति। न हि [1]विपाकजस्यानागतातीता वा[1] प्राप्तिः संभवति।

अव्याकृताप्तिः सहजा

इति[2] वचनात्। यदि तु प्रति[3]द्रव्यं प्राप्तिव्यवस्था क्रियेत संभवं प्रत्येतदेवं भवेत्। क्लिष्टानामुत्पत्तिप्रतिलम्भिकानां च कुशलानां अतीतादीनामतीतादयः प्राप्तयो ऽवश्यं भवन्ति। न हि पृथग्जनस्यानुत्पन्नस्य अनास्रवस्य मार्गस्यातीता प्रत्युत्पन्ना च प्राप्तिरस्ति। सापवादश्चायमुत्सर्गो ऽवगन्तव्यः।

अव्याकृताप्तिः सहजा

इति वचनात्। असंस्कृतानां तु प्राप्तिरुत्पन्ननिरुद्धातीता। अनुत्पन्नानागता। उत्पन्ना-
निरुद्धा प्रत्युत्पन्ना। सुगमत्वात्तु न सूत्रितमेतत्। **कामरूपारूप्यावचराणां कामरू-** 162.18 (17a—7, 8)
**पारूप्यावचरी यथाक्रमम्**इति। कामधातूपपन्नस्य कामावचराणां धर्माणां कामा-
वचरी प्राप्तिः। तस्यैव रूपावचराणां रूपावचरी। तस्यैवारूप्यावचराणामारूप्या-
वचरी। रूपधातूपपन्नस्य च कामावचराणां। तद्यथा निर्माणचित्तानां कामावचरी।
रूपावचराणां रूपावचरी। आरूप्यावचराणामारूप्यावचरी। आरूप्यधातूपपन्नस्य तद्धा-
तुकानां तद्धातुकैव प्राप्तिः

**अनाप्तानां चतुर्विधा** 162.5 (17a—8)

इति। अधात्वाप्तानां संस्कृतासंस्कृतानामनास्रवाणां **चतुर्विधा प्राप्तिः**। कामरू- 162.16 (17a—8, 9)

---

1...1 °स्यानागता प्रत्युत्पन्ना MSS. corrected by Tib. རྣམ་པར་སྨིན་པ་འདས་པ་ལ་ནི་ཐོབ་པ་འདས་པ་འམ། མ་འོངས་པ་མེད་དོ. 2 Kārikā 39c.

3 प्राप्रि° C, प्रति° N; རེ་རེ.

पारूप्यावचरी चानास्रवा **च**। **समासेन** सर्वाननास्रवानभिसमस्येत्यर्थः। प्रत्येकं तु न
162.17 (17a—10) चतुर्विधा। तत आह। **तत्राप्रतिसंख्यानिरोधस्येति** विस्तरः। कामधातूपपन्नस्य कामावचरादीनां यथासंभवमप्रतिसंख्यानिरोधस्य प्राप्तिः कामावचरी। रूपधातूपपन्नस्य रूपावचरादीनां अप्रतिसंख्यानिरोधप्राप्ती रूपावचरी। आरूप्यधातूपपन्नस्यारूप्यावचरादीनामप्रतिसंख्यानिरोधप्राप्तिरारूप्यावचरी। सत्त्वसंतानवशेनैव हि तत्प्राप्तिर्व्यवस्थाप्यते। न तु तेषां वशेन येषामप्रतिसंख्यानिरोधः। यदि ह्येवं स्यात्
163.1 मार्गसत्यस्याप्रतिसंख्यानिरोधप्राप्तिरनास्रवा स्यात्। **प्रतिसंख्यानिरोधस्य रूपारूप्यावचरी चानास्रवा चेति**। न कामावचरी। कामधातोरप्रतिपक्षत्वात्। रूपावचरेण तु मार्गेण प्राप्तस्य रूपावचरी प्राप्तिः। आरूप्यावचरेणारूप्यावचरी। अनास्रवेण मार्गेणानास्रवा। आर्यस्य तु रूपावचरेण मार्गेण प्राप्तस्य रूपावचरी चानास्रवा च। आरूप्यावचरेणारूप्यावचरी चानास्रवा च।

लौकिकेनार्यवैराग्ये विसंयोगाप्तयो द्विधा

163.3 (17b—1) इति[1] वचनात्। **मार्गसत्यस्यानास्रवैवेति**। लौकिकीमस्यप्राप्तिं प्रतिषेधयति।
163.4 (17b—2) **सेयं समस्य चतुर्विधेति**। समासेन त्रैधातुकी चानास्रवा चेति[2] उक्तमर्थं निगमयति ॥ ३७ ॥

**शैक्षाणामिति**[3]। शैक्षा धर्माः शैक्षस्यानास्रवा धर्माः। **अशैक्षा** अशैक्षस्या-
163.7 (17b—3) नास्रवाः मार्गसत्यभावा एवैते[4] द्रष्टव्याः। शैक्षाशैक्षेभ्यस्त्वन्ये **नैव शैक्षा नाशैक्षाः**। असंस्कृता अपि यावन्नैव शैक्षा नाशैक्षा इष्यन्ते। तेषां

163.9 (17a—3) त्रिधा

164.1 (17b—5) प्राप्तिः **शैक्षादिभेदेन**। शैक्षी अशैक्षी नैवशैक्षी नाशैक्षी चेति। **अनार्येण प्राप्तस्ये-**

---

1 Kārikā VI, $47^{cd}$.  2 論 四 $17^{a}$ 9.  3 Sic MSS.; སློབ་པའི་ ཆོས་རྣམས་ཀྱི་ = शैक्षधर्माणाम्  4 °वैत MSS.; འདི་དག་.

ति। पृथग्जनेन प्राप्तस्य। **तस्यैव शैक्षेणेति**[1]। तस्यैव प्रतिसंख्यानिरोधस्य **शैक्षेण** 164.2 (17b–6)
**मार्गेण प्राप्तस्य शैक्षी। अशैक्षेणाशैक्षी**[2] क्षयज्ञानसंप्रयुक्तेन मार्गेण प्राप्तस्य। विसंयो- 164.3 (17b–7)
गप्राप्तिसन्निश्रयत्वात् क्षयज्ञानस्य। यद्यपि सा वज्रोपमेन शैक्षेण प्राप्यते तदावाहक-
त्वात्। तत्प्राप्तत्ववचने तु शैक्ष्याः[3] प्राप्तेः अशैक्षी प्राप्तिर्विशेषिता स्यादिति न तेन
शैक्षेण अशैक्षीत्युक्तं। **तस्यैवार्यमार्गप्राप्तस्यानास्रवेति**। तस्यैव प्रतिसंख्यानि- 164.11 (17b–10)
रोधस्य आर्यमार्गप्राप्तस्य अनास्रवा। मार्गसत्यस्य चानास्रवा। प्राप्तिरित्यधिकृतं।
आर्येण लौकिकमार्गप्राप्तस्य प्रतिसंख्यानिरोधस्य प्राप्तिः किं सास्रवा उताहो
ऽनास्रवा। उभयथेत्याह। सा कस्मान्नोक्ता सावशेषं भाष्यं। पश्चाद्दर्शयिष्यते

लौकिकेनार्यवैराग्ये विसंयोगाप्तयो द्विधा

इति नोच्यते। या त्वसंकीर्णा प्राप्तिः। सैवेहोच्यते इति वेदितव्यं॥

**दुर्बलत्वादिति**। अनभिसंस्कारवत्त्वाद्दुर्बलत्वं। **द्वे अभिज्ञे** इति। दिव्यचक्षु- 164.15 (18a–5)
रभिज्ञां दिव्यश्रोत्राभिज्ञां। **निर्माणचित्तं च वर्जयित्वा**। किम्। 165.1 (18a–7, 8)

अव्याकृताप्तिः सहजा

इति संबन्धनीयं। **तेषां हि बलवत्त्वादिति** विस्तरः। तेषां हि दिव्यचक्षुर-
भिज्ञादीनां बलवत्त्वात्। किं। पूर्वपश्चात्सहजा प्राप्तिः। **प्रयोगविशेषनिष्पत्तेरि-** 165.2 (18a–9)
ति। प्रयोगविशेषेण निष्पत्तिर्दिव्यचक्षुरभिज्ञादीनां। तस्याः प्रयोगविशेषनिष्पत्ते-
र्बलवत्त्वं। बलवत्त्वात्पूर्वपश्चात्सहजा प्राप्तिरित्यर्थसंबन्धः। **शैल्पस्थानिकस्यापि** 165.4 (18a–10)
**कस्यचित्** तद्यथा विश्वकर्मणः। **ऐर्यापथिकस्य** च तद्यथा स्थविरस्याश्वजितः।

---

1 °क्षणे° NC; སློབ་པའི་ལམ་གྱིས་ = शैक्षेण मार्गेण. 2 མི་སློབ་པས་ཐོབ་པ་ དེ་མི་སློབ་པའི་ཞེས་བྱ་བ་དེ་ = अशैक्षेण प्राप्ताशैक्षीति. 3 °क्षाः MSS.; शैक्ष्याः प्राप्तेः = སློབ་པས་ཐོབ་པ་ལས་

अत्यर्थमभ्यस्तस्य भृशमात्ममात्[1]कृतस्येच्छन्ति वैभाषिकाः । किं । पूर्वपश्चात्सहजा प्राप्तिरिति ॥ ३८ ॥

165.7 (18a–3) निवृतस्य च रूपस्य

इति । चशब्दः समुच्चयार्थः । प्राप्तिः सहजेति समुच्चीयते । तच्च क्लिष्टं रूपं प्रथमध्यानभूमिकमेव विज्ञप्तिरूपं वेदितव्यं । ततो ऽन्यासु भूमिषु तदुत्थापकाभावात् ।

165.13 (18b–2) अधिमात्रेणापीति विस्तरः । अधिमात्रेणापि चित्तेन निवृता विज्ञप्तिरुत्थापिता ।

165.14 (18b–3) तदेव चाधिमात्रं विज्ञप्तिचित्तं अविज्ञप्तिं नोत्थापयति । अतो दौर्बल्यसिद्धिः । तस्या दौर्बल्यसिद्धेः सहजैव प्राप्तिः । प्राप्तिभेद इति । विपाकजादीनामनिवृताव्याकृतानां सहजा प्राप्तिः । अभिज्ञाद्वयादीनां तु पूर्वपश्चात्सहजाप्राप्तिरिति तद्भेदः ।

165.8 (18a–4) कामे रूपस्य नाग्रजा

166.1 (18b–5) इति । कामावचरस्य कुशलाकुशलस्य विज्ञप्त्यविज्ञप्तिरूपस्याग्रजा प्राप्तिः सर्वथा नास्ति । यदि कुशलस्य यद्यकुशलस्य [2]नास्त्येव सर्वथेत्यर्थः[2] । सहजा चास्ति पश्चात्कालजा चेति[3] संभवतः । तद्यथा प्रथमस्य विज्ञप्त्यविज्ञप्तिक्षणस्य आदौ सहजा प्राप्तिर्भवति । द्वितीयादिषु क्षणेषु तस्यैवाद्यस्य क्षणस्य पश्चात्कालजा भवति । एवमन्येषामपि द्वितीयादीनां क्षणानां सहजा पश्चात्कालजा प्राप्तिर्वेदितव्या । कामावचरस्यैव रूपस्याग्रजा प्राप्तिप्रतिषेधाद्ध्यानानास्रवसंवररूपस्याग्रजा प्राप्तिरस्त्येवेत्युत्सृष्टा भवति ॥

166.4 (18b–10) अप्राप्तिरनिवृताव्याकृतैव सर्वा । कस्माद्व्यवस्थाप्यते । यद्यप्राप्तिः क्लेशानां क्लिष्टा भवेत् । प्रहीणक्लेशस्य क्लेशवदेव न स्यात् । यदि कुशला स्यात् । समुच्छिन्नकुशलमूलस्य न स्यात् । अनास्रवाणां धर्माणामप्राप्तिरनास्रवा स्यात् । किं

1 °सात्कृ° NC, °साकृ° T; དང་དུ་འགྱུར་བ་.  2..2 མེད་པ་ཁོ་ན་འོ་ཞེས་བྱ་བའི་ཐ་ཚིག་གོ་ = नास्त्येवेत्यर्थः  3 चेति NC, °जैवेति T; དང་···ཞེས་བྱ་བ་ནི་

स्यात्। पृथग्जनो न स्यान्नित्यमार्यधर्मसमन्वागतत्वात्। पारिशेष्यादनिवृताव्याकृतै-
वाप्राप्तिरिति व्यवस्थाप्यते। **प्रत्युत्पन्नस्य नास्त्यप्राप्तिः प्रत्युत्पन्नेति**। प्रत्यु- 166.6 (19a–1)
त्पन्नस्य धर्मस्य प्राप्तिर्वर्तते। तस्मादस्याप्राप्तिर्नास्ति प्रत्युत्पन्ना। तस्य प्राप्त्य-
प्राप्त्योः समवधानासम्भवात्। **अतीतानागतयोस्तु त्रैयध्विकीति**। अप्राप्तानां प्रा- 166.7 (19a–2)
प्तविहीनानां च प्रायोगिकानां गुणानामनागतानां च चक्षुरादीनामपि च येषां
प्राप्तिर्नास्ति अतीताप्यस्त्यप्राप्तिरनागतापि प्रत्यत्पुन्नापि। स्रोतोन्यायेन हि तेषा-
मप्राप्तिरुत्पद्यते निरुध्यते ऽनागतावस्थानेति ॥ ३९ ॥

**कामाद्याप्तामलानां च** 166.9 (18b–8)

इति।

**त्रिधा**

इत्यनुकर्षणार्थश्चकारः। कामादिषु धातुषु आप्ता अवियुक्ताः कामाद्याप्ताः। कामा-
द्याप्तानाममलानां चाप्राप्तिस्त्रिविधा[1]। उपपत्त्याश्रयवशेन तद्व्यवस्थापनात्। धर्मस- 166.13 (19a–3)
न्तावव्यवस्थायिनी ह्यप्राप्तिः। न प्राप्तिवद्धर्मवशेन व्यवस्थाप्यते। तस्मात्कामधातू- 166.14 (19a–4)
पपन्नस्य कामरूपारूप्यावचराणां अनास्रवाणां च धर्माणामप्राप्तिः कामावचरी।
रूपधातूपपन्नस्य रूपावचरी। आरूप्यधातूपपन्नस्य आरूप्यावचरी। तद्यथा का-
मधातूपपन्नस्य प्रायोगिकाणां गुणानामुपपत्तिलाभिकानामपि[2] कुशलसमुच्छेदावस्थायां[3]
अप्राप्तिरवीतरागत्वाच्च रूपारूप्यावचराणामक्लिष्टानामप्राप्तिः पृथग्जनत्वाच्चानास्रवा-
णामप्राप्तिः कामावचरी। तथा रूपधातूपपन्नस्य कामावचराणां भूमिसंचारत्यक्तानां
रूपारूप्यावचराणां च [4]प्रायोगिकानां गुणानां[4] पृथग्जनत्वाच्चानास्रवाणामप्राप्ती रूपा-
वचरी। तथैव चारूप्यधातूपपन्नस्य कामरूपावचराणां भूमिसंचारत्यक्तानामारूप्या- (19a–6)
वचराणां च प्रायोगिकानां गुणानां पृथग्जनत्वादेव चानास्रवाणामप्राप्तिरारूप्याव-

---

1 वा° MSS.; དང་.  2 °मुत्पत्ति °MSS.  3 དགེ་བའི་རྩ་བ་=कुशलमूल.

4..4 Simply प्रायोगिकानां MSS.; སྦྱོར་བ་ལས་འབྱུང་བའི་ཡོན་ཏན་རྣམས་.

167.1 (19a—7) घरीति नेयं ॥ **पृथग्जनत्वं कतमत्** । **आर्यधर्माणामलाभ** इति । अनेन शास्त्रपाठे-
नानात्वत्वाभावमप्राप्तेर्दर्शयति । **कतमेषामार्यधर्माणामलाभ** इति । आर्यधर्मा दुःखे
धर्मज्ञानक्षान्तिमारभ्य सर्वो ऽनास्रवो मार्ग इति । अत एवं पृच्छति । **सर्वेषाम-**
167.5 (19a—8) **विशेषवचनादिति** । सर्वेषां दुःखे धर्मज्ञानक्षान्त्यादीनां शैक्षाशैक्षज्ञानानामलाभः ।
कस्मात् । अविशेषितत्वात् । यद्येवमुत्पन्नायामपि दुःखे धर्मज्ञानक्षान्तौ परिशिष्टाना-
मार्यधर्माणामलाभो ऽस्यास्तीति अनार्यः स्यात् । तस्मादिदमाह । **स तु यो विना
लाभेनेति** । यो विना लाभेनालाभः । तत्पृथग्जनत्वमिति । **अन्यथा हीति** वि-
स्तरः । यद्यार्यधर्माणां लाभे ऽपि सति अन्येषामपि धर्माणामलाभः पृथग्जनत्वमिष्यते ।
167.7 (19a—9) **बुद्धो ऽपि श्रावकप्रत्येकबुद्धसंतानिकैरार्यधर्मैरसमन्वागमात् अनार्यः स्यात्** ।
167.9 (19a—10) केवलालाभग्रहणात्तु प्रसङ्गः । **एवशब्दस्तर्हि पठितव्य** इति । आर्यधर्माणामलाभ
167.11 (19b—1) एवेति । **एकपदान्यपि ह्यवधारणानीति** । केवलपदान्यपीत्यर्थः । **अब्भक्षो वा-
युभक्ष** इति । अब्भक्ष एव वायुभक्ष एवेति नोच्यते । एवशब्दस्य चार्थो गम्यते ।
तद्वदिहापीति । अथ वा अप एव यो भक्षयति । सो ऽब्भक्षः । यो वायुमेव भक्ष-
यति । स वायुभक्ष इति । यथात्र लुप्तनिर्दिष्टस्य एवकारस्यावधारणार्थो गम्यते ।
167.11 (19b—2) तद्वदिहाप्यलाभ एवेति । **दुःखे धर्मज्ञानक्षान्तितत्सहभुवामित्यपर**[1] इति विस्तरः ।
दुःखे धर्मज्ञानक्षान्तेस्तत्सहभुवां च वेदनादीनां धर्माणामलाभः **पृथग्जनत्वम्** । अस्मि-
न्पक्षे उत्पन्नायामपि दुःखे धर्मज्ञानक्षान्तौ परिशिष्टानामार्यधर्माणामलाभो ऽस्तीत्यनार्यः
स्यादिति यो दोष उक्तः । स न संभवति । यदा तर्हि फलप्राप्तिः । तदा
दुःखे धर्मज्ञानक्षान्तितत्सहभुवां विहानिरिति फलप्राप्तावनार्यः स्यादिति दोषपरि-
हारार्थमाह । **न च तत्त्यागात्** । न च तेषां क्षान्तिसहभुवां त्यागात् । **अनार्यत्व-**
167.15 (19b—3) **प्रसङ्गः** । **तदलाभस्यात्यन्तं हतत्वात्** । तस्यालाभस्यात्यन्तविहीनत्वात् । कथम् ।
असावत्यन्तं हतस्तत्संताने पुनरनुत्पत्तेः । **ते तर्हि त्रिगोत्रा** इति । श्रावकप्र-

---

1 ०तिस्त० MSS.; བཟོད་པ་དང་དེ་དང་.

त्येकबुद्धबुद्धगोत्रा इति । **कतमेषामलाभः** । **सर्वेषामिति** । श्रावकादिगोत्राणाम् । 167.15 (19b—4)
**एवं तर्हि स एव दोष** इति । बुद्धो ऽपि त्रिगोत्रालाभादनार्यः स्यादित्यर्थः । 167.16 (19b—5)
**पुनः स एव परिहार** इति । स तु यो विना लाभेनेति पूर्ववत्प्रपञ्चो यावत्तद्यथा
अब्भक्षो वायुभक्ष इति । **यत्नस्तर्हि व्यर्थ** इति । क्षान्तिपरिशिष्टार्यधर्मालाभसद्भावाद्-
नार्यः स्यादित्यस्य दोषस्य परिहाराय क्षान्तितत्सहभुवामलाभः पृथग्जनत्वमिति यो
यत्नः । स व्यर्थः स्यात् । पूर्वपक्षदोषपरिहार एवायमास्थीयते । **अनुत्पन्नार्यधर्मा** 167.19 (19b—7)
**संततिरिति** । अनुत्पन्ना आर्यधर्मा अस्यामित्यनुत्पन्नार्यधर्मा संततिः **पृथग्जनत्वं** ।
अनुत्पन्नार्यमार्गा स्कन्धसंततिरित्यर्थः । अर्थादुत्पन्नार्यधर्मा संततिरार्यत्वमित्युक्तं भवति
आश्रयपरावृत्तेः ॥

**अथेयमप्राप्तिरिति** । सर्वधर्माप्राप्तिश्चोच्यते । नार्यधर्माप्राप्तिरेव । **यथा ताव-
दिति** । उदाहरणमेतत् । **तस्य लाभात्तद्विहीयत** इति । तस्यार्यमार्गस्य लाभा- 168.4 (19b—9)
त्तत्पृथग्जनत्वमलाभलक्षणं विहीयते । किंधातुकं तत्पृथग्जनत्वं । त्रिधातुकमित्येके ।
ननु चोपपत्त्याश्रयवशेनालाभो व्यवस्थाप्यते । पृथग्जनत्वं चालाभस्वभावं । तस्मा-
दस्य कामावचरस्य सत्त्वस्य कामावचरमेव पृथग्जनत्वमस्ति । न रूपारूप्याव-
चरम् । अतस्त्रैधातुकं विहीयत इति अयुज्यमानमेतत्पश्यामः । अथ पुनरनुत्पत्ति-
धर्मतां तदापन्नमिति कृत्वा त्रैधातुकं तद्विहीयत इति उपचारकल्पना । भव-
त्वेषा । नैषा वार्यते । कामावचरस्यैव त्वेकस्य पृथग्जनत्वस्य प्राप्तिरस्ति । तल्लौ-
किकाग्रधर्मावस्थायां विहीयत इति वेदयामः । तच्च कामवैराग्ये नवमे विमु-
क्तिमार्गे[1] प्रहीयते । रूपारूप्यधात्वोरुत्पद्यमानस्य त्वार्यस्य प्रतिभूम्यवस्थितानां
पृथग्जनत्वानां आर्यमार्गप्राप्तिसामर्थ्यान्नैव प्राप्तिरुत्पद्यते । प्रतिभूमि तु नवमे वि-
मुक्तिमार्गे तेषां प्रहाणं भवतीति अवगन्तव्यं । **भूमिसंचाराच्चेति** । यदा च का-
मधातोर्वैराग्यं कृत्वा प्रथमं ध्यानं संचरति । तदा च तत्कामावचरं पृथग्जनत्वं

---

1 N adds here: तेषां प्रहाणां भवतीति, which Tib. also omits.

विह्रीयते । न चार्यो भवति प्रथमध्यानभूमिकपृथग्जनत्वप्रादुर्भावात् । [1]एवमारूप्य-धातुसंचाराद्रूपावचरं पृथग्जनत्वं विह्रीयते । ऊर्ध्वभूमेश्चाधरां भूमिं संचरते । ऊर्ध्वभू-
168.5 (19b–10) मिकं पृथग्जनत्वं विह्रीयत इति वक्तव्यम् । **एवमन्येषामपि योज्यमिति** । यथा-र्यमार्गस्य प्राप्त्या पृथग्जनत्वमप्राप्तिर्विह्रीयत इति योजितं । एवमन्येषामपि श्रुत-चिन्तामयादिकानां धर्माणामप्राप्तिर्विह्रीयत इति योज्यं । कथं । कामावचराणां ता-वच्छ्रुतचिन्तामयादिकानां धर्माणां प्राप्तिलाभादप्राप्तिर्विह्रीयते । उपपत्तिलाभिकानां च कुशलानां प्राप्त्या समुच्छिन्नकुशलस्याप्राप्तिर्विह्रीयते । भूमिसंचाराच्च । यदा चायं कामधातोश्च्युत्वा प्रथमं ध्यानमुपपत्त्या संचरति । तदा च तद्भूमिकानां गतिसं-गृहीतानां स्कन्धानामप्राप्तिर्विह्रीयते । अक्लिष्टाव्याकृता एव हि गतयो वक्ष्यन्ते[2] ।

अव्याकृताप्तिः सहजा

इति[3] चोक्तम् । एवं प्रथमध्यानभूमिकानां प्रायोगिकानां गुणानां प्राप्तेरप्राप्तिर्विह्री-यते । भूमिसंचाराच्च । ऊर्ध्वभूमिकानां गतिसंगृहीतानां स्कन्धानां तद्भूमिसंचाराद्विह्री-यत इति । इदमेकेषां भूमिसंचारव्याख्यानोदाहरणं । तत्र अविविक्तं पश्यामः । ऊर्ध्वभूमिकानां गतिसंगृहीतानां स्कन्धानाम[4]प्राप्तिर्न केवलं भूमिसंचाराद्विह्रीयते । किं तर्हि । तत्प्राप्तितो ऽपीति । इदं त्वसंकीर्णमुदाहरणं पश्यामः । तद्यथा द्वि-तीयादिध्यानभूमिकानां प्रायोगिकानां गुणानां तदलाभिनः कामावचरस्य सत्त्वस्या-प्राप्तिरस्ति । स यदि कामवैराग्यं कृत्वा प्रथमध्यान उपपद्यते । सा तेषामप्रा-प्तिर्भूमिसंचाराद्विह्रीयते । प्रथमध्यानभूमिका तु तेषामप्राप्तिरुद्भवति । इत्येवमन्येषा-मपि योज्यं ॥

168.9 (20a–2) **ननु चैवमनवस्थाप्रसङ्गः प्राप्तीनामिति** । प्राप्तेरपि प्राप्तिः । अस्या अप्यन्या ।
168.10 (20a–3) तस्या अप्यन्या इत्यनवस्था । **परस्परसमन्वागमादिति** । प्राप्तिप्राप्तियोगात्प्राप्त्या

---

1 एवना° MSS.; དེ་བཞིན་དུ་.    2 See 第論八 5ᵇ 6.    3 Kārikā II, 39ᶜ.    4 स्कन्धायतनानाम° MSS.; ཕུང་པོ་རྣམས་ཀྱི་.

समन्वागतः। प्राप्तियोगात्प्राप्तिप्राप्त्या समन्वागत इत्यर्थः। **प्राप्त्युत्पादादिति** वि- 168.12 (20a–4)
स्तरः। प्राप्त्युत्पादात्तेन **धर्मेण** चित्तेन वा **समन्वागतो भवति**। **प्राप्तिप्राप्त्या** 168.13 (20a–5)
**च समन्वागत** इति वर्तते। **प्राप्तिप्राप्त्युत्पत्तेः प्राप्त्यैव समन्वागतो** भव-
तीति। एवं प्राप्तिरुभयत्र व्याप्रियते। प्राप्तिप्राप्तिस्त्वेकत्रेति। **अतो नानवस्था**। 168.14 (20a–6)
**कुशलस्य क्लिष्टस्य चेति**। अनयोरग्रजपश्चात्कालजप्राप्तित्वाद्ग्रहणम्। अव्याकृ-
तस्य हि सहजैव प्राप्तिरिति। **द्वितीये क्षण** इति विस्तरः। द्वितीये क्षणे 168.15 (20a–7)
तस्य धर्मस्य तत्प्राप्तेः प्राप्तिप्राप्तेश्च प्राप्तय इति **तिस्रः प्राप्तयः**। प्राप्तियोगाद्धि
तैः समन्वागतो भवति। ताभिस्तिसृभिः प्राप्तिभिः समन्वागमार्थं **पुनस्तिस्रो** 168.17 (20a–8)
**ऽनुप्राप्तय उद्भवन्तीति षड्भवन्ति** प्राप्तयः। **प्रथमद्वितीयक्षणोत्पन्नानां द्रव्या-**
**णामिति**। धर्मेण सार्द्धं नवानां द्रव्याणां **नव प्राप्तयः सार्द्धमनुप्राप्तिभिरष्टादश** 168.19 (20a–9)
**भवन्ति**। **एवमुत्तरोत्तरवृद्धिप्रसङ्गेनेति** विस्तरः। उत्तरोत्तरस्य क्षणस्य वृद्धिः प्रा-
प्तिभिः। उत्तरोत्तरे वा क्षणे वृद्धिः प्राप्तीनां। तस्याः प्रसङ्गः उत्तरोत्तरवृद्धिप्रसङ्गः।
तेन। उत्तरोत्तरवृद्धिप्रसङ्गेन। **एताः प्राप्तयो विसर्पन्त्य** इति। दिङ्मात्रं दर्शयि-
ष्यामः। चतुर्थे क्षणे प्रथमक्षणोत्पन्नैस्त्रिभिर्धर्मैः प्राप्त्यनुप्राप्तिमद्भिर्भवितव्यं। द्वि-
तीयक्षणोत्पन्नाभिरपि षड्भिः प्राप्त्यनुप्राप्तिभिः पुनः प्राप्त्यनुप्राप्तिमतीभिर्भवितव्यम्।
एवं तृतीयक्षणोत्पन्नाभिरष्टादशभिः प्राप्त्यनुप्राप्तिभिः पुनरपि प्राप्त्यनुप्राप्तिमती-
भिर्भवितव्यमिति। प्रथमद्वितीयतृतीयक्षणोत्पन्नानां सप्तविंशतिः प्राप्तयः सार्द्धमनु-
प्राप्तिभिस्तावतीभिरिति चतुःपञ्चाशत्प्राप्तयश्चतुर्थे क्षणे भवन्ति। पञ्चमे तु क्षणे प्रथ-
मद्वितीयतृतीयक्षणोत्पन्नाः प्राप्त्यनुप्राप्तयः पुनश्चतुःपञ्चाशच्चतुर्थक्षणोत्पन्नप्राप्त्यनुप्रा-
प्तयश्च द्विश्चतुःपञ्चाशद्भवन्ति। त्रीणि चतुःपञ्चाशत्कानि द्वाषष्ट्युत्तरशतं प्राप्तीनां
जायते। एवमुत्तरोत्तरवृद्धिप्रसङ्गो वक्तव्यः। **अतीतानागतानामिति**। अत्र प्रत्यु- 169.2 (20a–10)
त्पन्नाग्रहणमनावश्यकत्वात्। **उत्पत्तिलाभिकानां चेति**। अत्र प्रायोगिकाग्रहणम-
नावश्यकत्वादेव। **ससंप्रयोगसहभुवामिति**। सवेदनादिसजात्यादीनाम्। **अनाद्यन्त-** 169.4 (20b–1)
**संसारपर्यापन्नानाम्**। अनादावनन्ते च संसारे संगृहीतानां। **अनन्ता** अप्रमेया

169.6 (20b−2) एकस्य प्राणिनः । किं अङ्ग बहूनां । **क्षणे क्षणे उपजायन्ते प्राप्तय** इति । 169.7 (20b−3) अनन्तद्रव्या एव[1] । अनन्तप्राप्तिद्रव्या इत्यर्थः । **अत्युत्सवो बतायं प्राणीनामि-**ति । परिहासवचनमेतत् । **केवलं न प्रतिघातिन्यः** अरूपिणीत्वात् **यतो ऽवकाशं लभन्ते** प्राप्तयः ॥ ४० ॥

V. II. 3.
169.12 (1a−7)

## सभागता सत्त्वसाम्यम्

इति विस्तरः[2] । समानो भागो भजनमेषामिति सभागाः । तद्भावः सभागता । समा- 169.16 (1a−8) नो वा भागो भजनं सभागः[3] । सभाग एव सभागता । यद्योगात्**सभागो** भवति तद्द्रव्यं । **सत्त्वानां साम्यं** सामान्यं सादृश्यमित्यर्थः । सत्त्वग्रहणमसत्त्वनिरासार्थं । सत्त्वानां सत्त्वसंख्यातानां च धर्माणां सादृश्यं सभागता । असत्त्वसंख्यातानां शालियवादीनां नेष्यते । **निकायसभाग इत्यस्याः शास्त्रे संज्ञेति** । ज्ञानप्रस्थानादिके शास्त्रे निकायसभाग इति अनया संज्ञया अयं चित्तविप्रयुक्तो निर्दिश्यते । इह तु श्लोकबन्धानुगुण्यात्

## सभागता

170.1 (1a−9, 10) इति अनया संज्ञयेत्यभिप्रायः । **सा पुनरभिन्ना भिन्ना चेति** । या **सर्वसत्त्ववर्तिनी** । सा प्रतिसत्त्वमन्यान्याप्यभिन्नेत्युच्यते सादृश्यात् । न हि सा यथा वैशेषिकाणामेका नित्या चेति । भिन्ना या[4] क्वचिद्वर्तते क्वचिन्न वर्तते । तत आह । **भिन्ना** 170.5 (1a−11) **पुनरिति** विस्तरः । **धातवस्त्रयः** कामादयः । **गतयः** पञ्च नरकादयः । **योनयश्च-** 170.6 (1b−1) **तस्रो** ऽण्डजादयः । **जातयो** ब्राह्मणादयः । **आदिशब्देन** उपासिकाभिक्षुणीनैवशैक्षनाशैक्षादयः संगृह्यन्ते । 170.7 (1b−2) **स्कन्धायतनधातुत** इति । रूपस्कन्धसभागता यावद्धर्मधातुसभागता । 170.9–11 (1b−3, 4) **अविशिष्टमिति** । सामान्यरूपं । **प्रज्ञप्तिश्चेति** । अभिधानं चेत्यर्थः । **एवं**

---

1 एवम् MSS. ཉིད་ 2 Om. Tib. 3 भागः MSS. སྐལ་པ་མཉམ་པའི་

4 या MSS. भिन्ना या = ཐ་དད་པ་ནི་ ··· གང་ཡིན་.

**स्कन्धादिबुद्धिप्रज्ञप्तयो ऽपि योज्या** इति । यदि स्कन्धसभागताद्रव्यमविशिष्टं न स्यादन्योन्यविशेषभिन्नेषु स्कन्धेषु स्कन्धः स्कन्ध इत्यभेदेन बुद्धिर्न स्यात्प्रज्ञप्तिश्चेति । एवं धात्वादिबुद्धिप्रज्ञप्तयो ऽपि योज्या इत्येके पठन्ति । तेषामेवं वक्तव्यं । यदि सभागतेति विस्तरेण यावदन्योन्यविशेषभिन्नेषु धातुषु कामावचरः कामावचर इति अभेदेन बुद्धिर्न स्यात्प्रज्ञप्तिश्चेति । **चतुःकोटिक** इति । 170.12–15 (1 b – 5)
**स्यात् च्यवेतोपपद्येत** । **न च सत्त्वसभागतां विजह्यान्न च प्रतिलभेतेति** । **सत्त्वसभागतामिति** । सत्त्वानां सभागता सत्त्वसभागता मनुष्यत्वादिलक्षणा । सत्त्वग्रहणं हि धर्मविशेषणार्थं । सत्त्वसभागता ह्यत्र चतुःकोटिके विवक्षिता न धर्मसभागतेति । न तु सत्त्वसत्त्व इत्याकारसभागतेहाभिप्रेता । यदि हि साभिप्रेता स्यात् । तृतीया कोटिर्न सिध्येत गतिसंचारे ऽपि[1] तस्याः सत्त्वसभागतायास्तादवस्थ्यात् । **तत्रैवोपपद्यमान** इति । तद्यथा मनुष्यगतेश्च्युत्वा मनुष्यगतावेवोपपद्यमानः । 170.15 (1 b – 6)
मनुष्यगतेश्च्यवते मरणादुपपद्यते च तस्यामेव प्रतिसंधिबन्धात् । न चासौ मनुष्यसभागतां विजहाति न च प्रतिलभते । तस्या मनुष्यसभागतायास्तादवस्थ्यात् । **द्वितीया[2] नियाममवक्रामन्निति** । स **सत्त्वसभागतां** पृथग्जनत्वस्वभावां सभा- 170.16 (1 b – 6)
गतां **विजहाति** । **आर्यत्वस्वभावां सभागतामपरां प्रतिलभते** । **तृतीया गति-** 170.18 (1 b – 7)
**संचारादिति** । तद्यथा मनुष्यगतेश्च्युत्वा देवगतावुपपद्यमानः । च्यवते तत्रैव मरणादुपपद्यते च प्रतिसंधिबन्धात् । सत्त्वसभागतां मनुष्यसभागतालक्षणां विजहाति । प्रतिलभते च देवसभागतालक्षणामपरामिति । **चतुर्थ्येतानाकारान्स्थापयित्वेति** । पूर्वोक्तकोटिस्वभावप्रकारान्वर्जयित्वेत्यर्थः । तद्यथा जीवन् पृथग्जन आर्यो वा किंचिदलभमानः ॥

**यदि पृथग्जनसभागता नाम द्रव्यमस्ति किं पुनः पृथग्जनत्वेन** आर्य- 170.19 (1 b – 8)
धर्मालाभस्वभावेन कल्पितेन प्रयोजनमिति वाक्यशेषः । पृथग्जनसभागतयैव

---

1 ति MSS. ཀྱང་.    2 °य MSS.

171.1 (1b—9) पृथग्जन इति परिच्छिद्येत यथा मनुष्यसभागतयैव मनुष्य इति । **न हि मनु-
ष्यसभागताया अन्यन्मनुष्यत्वं कल्प्यते** वैभाषिकैरलाभवदन्यस्वभावं । तत्र
च साधनं । न स्वसभागताया अन्यत्पृथग्जनत्वं । स्वसभागताप्रत्ययाभिधेयत्वात् । मनु-
171.2 (1b—10) ष्यत्ववत् ॥ **नैव च लोकः सभागतां पश्यति । अरूपिणीत्वादिति** । न लो-
कश्चक्षुषा सभागतां पश्यत्यरूपिणीत्वाद्रूपवतीत्वाद्रूपस्वभावत्वाद्वा । यथा न पश्य-
ति । एवं न शृणोति यावन्न स्पृशतीति । अनेन प्रत्यक्षासिद्धतां दर्शयति । **न
चैनां प्रज्ञया परिच्छिनत्तीति** । अनेनानुमानेनापि न सिध्यति इति दर्शयति ।
171.4 (2a—1) **प्रतिपद्यते च सत्त्वानां जात्यभेदमिति । सत्या अपि तस्याः कथं तत्र
व्यापार** इति । जात्यभेदप्रतिपत्तौ जात्यभेदप्रतिपत्तिरस्ति । सा तु न सभागतया
द्रव्यान्तरकल्पितया कृता प्रमाणेनानुपलभ्यमानत्वेन तस्या व्यापारासंभवात् ॥ **ब्रूया-
स्त्वं । न निर्निमित्ता सामान्यबुद्धिर्भवितुमर्हतीति । तेन** यन्निमित्तं तस्याः सामा-
न्यबुद्धेः । तत्सभागता नाम द्रव्यमिति[1] । वयमपि तां सामान्यबुद्धिं सनिमित्तां
ब्रूमः । सादृश्यकृता हि सा बुद्धिः । तच्च सादृश्यं न द्रव्यान्तरमिति ब्रूमः ।
171.5 (2a—2) तेनोच्यते । **अपि चा[2]सत्त्वसभागतापि किं नेष्यत** इति विस्तरः । न द्रव्या-
न्तरसभागतानिमित्ता सत्त्वः सत्त्व इति सामान्यबुद्धिः । सामान्याकारप्रवृत्तत्वात् ।
171.6 (2a—3) **शालियवमुद्गमाषादिसामान्यबुद्धिवत्** । शालियवस्वजातिसादृश्यकृता ह्येषा सा-
मान्यबुद्धिनः । च तेषां स्वजातिसादृश्यं स्वतोऽर्थान्तरं भवति ॥ **तासां च सभा-
गतानामिति** विस्तरः । अन्या सत्त्वसभागतान्या धातुसभागतान्यागतिसभागतेति
**अन्योन्यभिन्नाः** सभागता इष्यन्ते । **तासां सभागतेति प्रज्ञप्तिरियं** सभागता इयं
171.10 (2a—4) सभागतेत्यभेदेन **कथं** भवद्भिः **क्रियते** व्यवहारः । प्रत्ययश्च कथं ज्ञायते । यद्य-
त्रापि सभागतान्तरं प्रतिज्ञायेत येन सभागतासामान्यबुद्धिर्भवेत् । भवेत्[3] सोऽयम-

---

1 °व्यतामिति NT. རྫས་ཡིན་ནོ་ཞེས་. 2 वा NC. ཡང་. 3 °वेन्न MSS. भवेत् सो ऽयमपक्षः = ཕྱོགས་སུ་མི་ལྡང་ངོ་.

## Приготовляются к печати: En préparation:

Nyāyapraveça (mūla). Sanscrit text, with Chinese, Tibetan and Mongolian translations. Edited by M. Tubianski.

Kālacakratantra. Ed. Prof. A. Grünwedel.

Pañcarakṣā. Изд. С. Ф. Ольденбург.

Karuṇā-puṇḍarīka. Ed. by Miss C. M. Ridding and E. J. Thomas.

Buddhapratimālakṣaṇa. Изд. С. Ф. Ольденбург.

Saṃtānāntarasiddhi of Dharmakīrti with the Commentary of Vinītadeva, translated from the Tibetan by Th. Stcherbatsky.

Abhidharmakoçabhāṣyam of Vasubandhu, translated from the Tibetan by Th. Stcherbatsky.

Pramāṇasamuccayavṛtti of Dignāga, Tibetan text, ed. by Th. Stcherbatsky.

Pramāṇasamuccayavṛtti of Dignāga, translated from the Tibetan by Th. Stcherbatsky.

Nyāyakaṇikā of Vācaspatimiçra, translated from the Sanscrit by Th. Stcherbatsky.

Çataçāstra, соч. Āryadeva и Vasu, перевод с китайского В. П. Васильева (посмертное издание).

Обозрение китайской трипитаки (Юе-цзан-чжи-цзинь), перевод с китайского В. П. Васильева (посмертное издание).

Nyāyavārtikatātparyaṭīkā of Vācaspatimiçra, translated from the Sanscrit by A. Vostrikov.

Tattvabindu of Vācaspatimiçra, translated from the Sanscrit by A. Vostrikov.

Pramāṇavārtika of Dharmakīrti with the Commentary of Devendrabuddhi, Tibetan text, ed. by A. Vostrikov.

Pramāṇavārtika of Dharmakīrti with the Commentary of Devendrabuddhi, translated from the Tibetan by A. Vostrikov.

A Table of Reasons (Hetucakra) of Dignāga with the Commentary of Bstan-dar-lha-rams-pa, Tibetan and Mongol texts with english translation Introduction and Notes ed. by A. Vostrikov.

Nyāyadvāra of Dignāga, Chinese text with english translation, ed. by M. Tubianski.

Grub-mthaḥ of Ḥjam-dbyaṅs-bžad-pa, translated from the Tibetan by M. Tubianski.

Цена 5 руб.

# BIBLIOTHECA BUDDHICA

## СОБРАНИЕ БУДДИЙСКИХ ТЕКСТОВ,

ИЗДАВАЕМЫХ АКАДЕМИЕЮ НАУК СССР,

ПОД РЕДАКЦИЕЮ АКАДЕМИКА С. Ф. ОЛЬДЕНБУРГА

**Изданы: Publiés:**

I. Çikṣāsamuccaya. Ed. C. Bendall. 5 Fsc.
II. Rāṣṭrapālaparipṛcchā. Publ. par L. Finot. Fsc. I.
III. Avadānaçataka. Ed. J. S. Speyer. Vol. I (4 Fsc.). Vol. II (4 Fsc.).
IV. Madhyamakavṛtti. Publ. par L. de la Vallée Poussin. 7 Fsc.
V. Сборник 300 Бурханов. Изд. С. Ф. Ольденбург. Ч. I. Fsc. I.
VI. А. Грюнведель. Описание буддийского собрания Э. Э. Ухтомского. 2 Fsc.
VII. Nyāyabindu и Nyāyabinduṭīkā (санскритский текст). Изд. Ф. И. Щербатской. Fsc. I.
VIII. Nyāyabindu и Nyāyabinduṭīkā (тибетский перевод). Изд. Ф. И. Щербатской. Fsc. I—II.
IX. Madhyamakāvatāra par Candrakīrti (traduction tibétaine). Publ. par L. de la Vallée Poussin. 5 Fsc.
X. Saddharmapuṇḍarīka. Ed. by Prof. H. Kern and Prof. Bunyiu Nanjio. 5 Fsc.
XI. Nyāyabinduṭīkāṭippaṇī (толкование на сочинение Дармоттары Nyāyabinduṭīkā). Санскритский текст с примечаниями издал Ф. И. Щербатской. 1 Fsc.
XII. Ṭišastvustik, ein in türkischer Sprache bearbeitetes Buddhistisches Sūtra. I. Transscription und Übersetzung von W. Radloff. II. Bemerkungen zu den Brāhmīglossen des Ṭišastvustik-Manuscripts (Mus. As. Kr. VII) von A. Staël-Holstein. 1 Fsc.
XIII. Mahāvyutpatti. Издал И. П. Минаев. Второе издание, с указателем. Приготовил к печати Н. Д. Миронов. 3 Fsc.
XIV. Kuan-ši-im Pusar. Eine türkische Übersetzung des XXV Kapitels der chinesischen Ausgabe des Saddharmapuṇḍarīka. Herausgegeben und übersetzt von W. Radloff. 1 Fsc.
XV. Kien-ch'ui-fan-tsan (Gaṇḍīstotragāthā), сохранившийся в китайской транскрипции санскритский гимн Açvaghoṣa. Издал и при помощи тибетского перевода объяснил А. Сталь-Гольстейн. 2 Fsc.
XVI. Buddhapālita. Mūlamadhyamakavṛtti. Tibetische Übersetzung. Herausgegeben von M. Walleser. Fsc. I—II.
XVII. В. В. Радлов и С. Е. Малов. Сутра Золотого блеска (Suvarṇaprabhāsa). Уйгурская редакция. 8 Fsc.
XVIII. Tārānātha's Edelsteinmine, das Buch von den Vermittlern der sieben Inspirationen. Aus dem Tibetischen übersetzt von A. Grünwedel. 2 Fsc.

*См. на 2-й стр. обложки*